# विश्वविद्या

**VOL-4**

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

Internationally Recognized Refereed & Peer reviewed Research Journal

सम्पादकः

## डा. आर् . विटोबाचार्यः

प्रकाशनम्

**वेद-वेदान्ताध्ययनशोधसंस्थानम्**

**वसन्तकुञ्ज, नवदेहली**

**२०२४**

विश्वविद्या VOL-4

अन्ताराष्ट्रियस्तरे मानिता, सन्दर्भिता प्रवरसमीक्षिता च शोधपत्रिका

सम्पादकः

डा. आर् . विटोबाचार्यः

प्रकाशनम्

वेद-वेदान्ताध्ययनशोधसंस्थानम् , वसन्तकुञ्ज, नवदेहली

2024

पुटसंख्या-122

प्रतयः-50

मूल्यम्-100/-

ISBN-

विन्यासः- श्रीकरः कुलकर्णी

मुद्रणम् - वागर्थ मुद्रणालयः

।।श्रीः।।

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्
श्रीपेजावर-अधोक्षजमठः, उडुपि
श्रीपरमपूज्यानां श्रीविश्वप्रसन्नतीर्थश्रीपादानाम्

## आशीर्वचः

निर्गते सति खद्योते खद्योतो द्योततेतराम् ।
नूनं स एव खद्योतो खद्योतानां प्रभासते ।।

रविः काटश्च खद्योतौ निशि काटो रविर्दिवा ।
विश्वविद्याख्यखद्योतो द्योतिषीष्ट दिवा निशि ।।

नोपरागे प्रकाशेते पुष्पवन्तौ विभावसू ।
विश्वविद्या दोषमुक्ता द्योततां विदुषां हृदि ।।

इति
श्रीविश्वप्रसन्नतीर्थश्रीपादाः

# सम्पादकीयम्

आत्रिवर्षं शैशवम् । ततस्त्रिहायनं पौगण्डम् । इदं बाल्यपदव्यप्-ादेश्यम् । तत्राप्यादन्तजननाच्छिशुः। आत्रिवर्षं बालकः । ततस्त्रीणि वर्षाणि बालः । तत आचतुर्दशं कुमारः । कुमारमुपनीय गुरुकुलं प्रवेशयन्ति । कौमार एवायमधीत्य वेदान् कण्ठगतान् करोति। तत आपीच्यं वयः पञ्चदशं षोडशञ्च । यस्मिन् वयसि प्रथमा रोमराजिः श्मश्रुसङ्घश्चोन्मिषति । संप्रति वेदाङ्गानि वेदान्तञ्चाधिगच्छति । आषोडशाद्यौवनम् ।।

लिखति शिशुः । ता रेखाः । लिखति बालकः । तच्चित्रम् । लिखन्ति बालाः कुमाराश्च । नैतच्चित्रम् । तदिदं लेखनमुच्यते । निबन्ध इति च गीयते । एतस्मिन् वयसि लेखको गुरुमार्गदर्शनमपेक्षते । गुरुदर्शितपथा लिखन्तो बालाः लोकमार्गदर्शकं प्रबन्धमाबध्नन्ति ।

वचनं सुकरम् । लेखनं दुष्करम् । ये सुष्ठु बोधने समर्था भवन्ति तेषां लेखः सुग्रहो मनोहारी च भवति । बोधनसामर्थ्यं श्रवणपठनचिन्तनाभ्यास-जन्यम् । अतः पठनश्रवणादिकं लेखने पर्यवस्यति । लेखनं पठनादेर्निकषो भवति। अनेके गद्यं कवीनां निकषं वदन्ति । वयन्तु सरसं सुबद्धं पद्यम्-ापि च्छात्राणां निकषं ब्रूमः । वज्रं निकषेण परीक्ष्यते । विदग्धाः लेखनेन परीक्ष्यन्ते ।।

दशकृत्वः पठितमपि विस्मरन्ति सद्यो विस्मरणशीलाः । परं सकृल्लिखितं न तथा विस्मरन्ति । अतो लेखाभ्यासः सर्वैर्विधेयः ।

नानाविधानि सुगन्धीनि लेखपत्राणि पद्यपुष्पाणि चात्र विलसन्ति । कानिचन प्रभाते कोरकाणीव विकसन्तीव । एभिः सुमनोभिः समभ्यर्च्यते गुरूणां कुलपतीनामन्तर्यामी ।।

इति

**डा ।। डा. आर् . विटोबाचार्यः**

# Review Board as -

**Dr. Shrinidhi Pyati**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Vinay Desai**
**Ass.** Prof. (**library**)
Poornaprajna Samshodhana Mandiram

**Dr. Hayavadana B. S.**
**Ass.** Prof. (**Research**)
Poornaprajna Samshodhana Mandiram

**Dr. Venkatesha Kulakarni**
**Lecturer-**Poornaprajna Vidyapeetha

**Dr. L. Sudheendra**
**Lecturer-** Poornaprajna Vidyapeetha

# विषयानुक्रमणिका

आशीर्वादः

सम्पादकीयम्

१. भारतीयदर्शनेषु न्यायवैशेषिकदर्शनयोर्योगदानम् - डा.के.शङ्करनारायण अडिग ९

२. शृङ्गारशास्त्रे चुम्बनादिनिरूपणम् – डा. श्रीकान्तबायरि १९

३. संस्कृतवैभवम् – प्रा. एच्.वि. नागराजराव् २५

४. भारतीयसंस्कृतिः संस्कृतभाषा च -डा. एन्.के. सुन्देरेश्वरन् ३१

५. अवयवविमर्शः -विद्वान् ऐतरेय भारद्वाजः ४३

६. पदशक्तिस्वरूपविचारः -विद्वान् विनयकुमारः ५१

७. अपुत्रस्य गतिर्नास्ति - डा. रङ्गनाथकट्टि ५६

8. भगवच्छास्त्रे पञ्चम-षष्ठ-सप्तम-हेतुनिरूपणम् - प्रदीपसिंहाचार्यः 62

9. मोक्षहेतु-भगवद्भक्तिविचारः -डा.आर् विटोबाचार्यः 71

10. गीतावलोकनम् - डा. श्रीनिधि वि 86

11. श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः एकादश-द्वादशाध्यायभाष्यस्य तुलनात्मकमध्ययनम् - श्रीकर कुलकर्णि 102

12. भगवद्रामानुजविरचितगीताभाष्यस्य श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः द्वितीयाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम् -जितामित्र कुलकर्णी 112

# भारतीयदर्शनेषु न्यायवैशेषिकदर्शनयोर्योगदानम्

- डा.के.शङ्करनारायण अडिग
सहाचार्यः, द्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपति

भवन्तः सर्वे जानन्त्येव भारतभूमिरियं सकलदर्शनानाम् उद्गमस्थानमिति ।

दर्शनं नाम वस्तुतत्वनिरूपकः श्रेष्ठपुरुषप्रवर्तितः विशिष्टः शब्दसन्दर्भः । तथा चोक्तं न्यायकोशे - 'दर्शनं तत्वज्ञानसाधनं शास्त्रम् । तच्च दर्शनं द्विविधं वेदबाह्यं प्रथमम्, द्वितीयं वेदापेक्षं वैदिकदर्शनमिति । तत्र बौद्धजैनचार्वाकादिदर्शनानि वेदबाह्यानि । तानि नास्तिकदर्शनानीति कथ्यन्ते । द्वितीयमास्तिकदर्शनं प्राधान्येन षड्विधम् । तानि च-

साङ्ख्य-पातञ्जल-पूर्वोत्तरमीमांसा-न्याय-वैशेषिकदर्शनानीति प्रथितानि । तथा चोक्तम् -

'गोतमस्य कणादस्य कपिलस्य पतञ्जलेः ।

व्यासस्य जैमिनेश्चापि दर्शनानि षडेव हि ।।' इति । अपि च,

'द्वौ योगौ द्वे च मीमांसे द्वौ तर्काविति षड् बुधाः ।।' इति न्यायकोशे । (न्या.को.पृ.३४९)

तत्र प्रमाणादितत्वज्ञानस्य निःश्रेयसोपायत्वप्रतिपादकं प्रमाणादिस्वरूपनिरूपकं च न्यायदर्शनं महर्षिणा गोतममुनिना प्राणायि ।

तत्र न्यायो नाम प्रमाणैरर्थपरीक्षणम् (न्या.वा.पृ.१५) । तदर्थस्तु समस्तप्रमाण-व्यापारादर्थाधिग-ातिर्न्याय इति । यत्र समस्तानि प्रमाणानि अर्थनिर्णायकानि भवन्ति । तादृशन्यायप्रतिपादकस्य न्यायशास्त्रस्य न्यायदर्शनं न्यायविद्या, आन्वीक्षिकी, तर्कविद्या, प्रमाणविद्या, इत्यादीनि नामान्तराणि च सन्ति ।

न्यायशास्त्रे प्रमुखाः ग्रन्थकाराः —

न्यायशास्त्रस्य प्रमुखेषु ग्रन्थकारेषु न्यायसूत्रकर्ता महर्षिः गोतमः प्रथमः । योऽध्यायपञ्चके व्यापृतं न्यायदर्शनं प्रणिनाय । तत्र प्रत्यध्यायमाह्निकद्वयम् । पञ्चस्वप्यध्यायेषु आहत्य अष्टाविंशत्यधिकपञ्चशतानि (५२८) सूत्राणि भवन्ति । न्यायशास्त्रप्रवर्तकोऽयं गौतमो वा गोतमो वा इति संशयोऽस्ति । परन्तु न्यायशास्त्रकर्ताऽयं गोतम एव भवेत् । गौतमस्त्वन्यः योऽहल्यापतिः

। तथा च पद्मपुराणप्रमाणवचनम्-

'कणादेन च सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ।

गोतमेन तथा न्यायं साङ्ख्यं च कपिलेन वै ।।' (पद्म.पु.उ.ख.अ.२०७)

अस्यैव अक्षपादः, अक्षचरण गौतम इत्यादीनि नामानि भवन्ति । अस्य देशविषये ऐतिह्यमिदं जागर्ति यद् गोतमगोत्रापत्यं गोतमनामा महर्षिः मिथिलादेशे न्यायदर्शनं प्रणिनायेति ।

अस्य जीवितकालस्तु (१५०रव.ङ.) क्रिस्तीयसार्धैकशतकं भवेत् ।

वात्स्ययनः — (क्रिस्तीयचतुर्थशतकम्)

वात्स्यायनो न्यायसूत्राणां भाष्यं निर्ममे । अस्यैव पक्षिलस्वामी मल्लनागः कौटिल्यः द्रामिल इति नामान्तराणि तथाचोक्तं त्रिकाण्डशेषकोशे -

'विष्णुगुप्तस्तु कौटिल्यश्चाणक्यो द्रामिलोऽङ्गुलः ।

वात्स्यायनो मल्लनाग पक्षिलस्वामिनावपि ।।' इति ।

उद्योतकरः - (६ रव.ङ.) (क्रिस्तीयषष्ठशतकम्)

अयं न्यायसूत्राणां वार्तिकमकरोत् । अयं तु भारद्वाजगोत्रजः, पाशुपताचार्य इति स्वात्मानं कथयामास । असौ स्वीयग्रन्थे न्यायवार्तिके दिङ्नागनागार्जुनप्रभृतिबौद्धतार्किकान् निराचक्रे ।

वाचस्पतिमिश्राः (८४१ रव.ङ.)

वाचस्पतिमिश्राः न्यायवार्तिकतात्पर्यटीकामकुर्वन् । एते धर्मकीर्तिप्रभृतिभिः बौद्धतार्किकैः न्यायवार्तिके खण्डिते वैदिकन्यायरक्षायै टीकामकुर्वन् । मिथिलावासिन एते महाभागाः ।

एते षड्दर्शनाचार्या इति प्रथिताः । यत एतैः साङ्ख्ये साङ्ख्यतत्वकौमुदी, अद्वैते शङ्करभाष्यस्य भामतीव्यारव्याग्रन्थः, तर्के न्यायवार्तिकतात्पर्यटीका, न्यायकणिका इत्यादयो ग्रन्था रचिताः ।

उदयनाचार्याः — (९८४ रव.ङ.) (क्रिस्तीयदशमशतकम्)

वाचस्पतिमिश्रकृतिषु बौद्धदार्शनिकैः खण्डितेषु मिथिलायां जाताः उदयनाचार्याः न्यायवार्तिकतात्पर्यटीकापरिशुद्धिनामकं ग्रन्थं रचयित्वा न्यायदर्शनम् उद्दध्रुः । एतैर्विरचिता इतरे ग्रन्थास्तु न्यायपरिशिष्टं, किरणावली, न्यायकुसुमाञ्जली आत्मतत्वविवेचनमित्यादयः प्रसिद्धाः ।

श्रीमता गोतमादपि पूर्वोत्पन्नः कणादमुनिः सप्तपदार्थप्रतिपादकानि वैशेषिकसूत्राणि चकार

। तत्र प्रशस्तपादादयः भाष्यटीकादीन् विरचय्य तद्दर्शनं विस्तारयामासुः । अथ कालान्तरे न्यायवैशेषिकदर्शनद्वयं समाहृत्य श्रीमान् गङ्गेशोपाध्यायः तत्वचिन्तामणिनामकं युक्तिजालभूयिष्ठं दृढतरं ग्रन्थं रचयामास । तस्य रघुनाथशिरोमणिः दीधितिनामिकां टीकां, तस्याश्च गदाधरजगदीश-भट्टादयष्टिप्पणीश्च रचयामासुः ।

सर्वेऽप्येते ग्रन्थाः साधारणजनानां दुरवगाहाः दुष्पाठाश्च इत्यालोच्य क्रिस्तीयसप्तदशशतके वङ्गदेशीयः श्रीविश्वनाथन्यायपञ्चाननः काणादं न्यायमतं च सङ्क्षेपीकृत्य भाषापरिच्छेदनामकं कारिकानिबद्धं ग्रन्थं निबध्य तस्य मुक्तावलीनामकं व्याख्यानरत्नं च निर्ममे ।

बालानां सुखेन तर्कबोधाय अन्नम्भट्टः तर्कसङ्ग्रहाख्यं दीपिकाटीकासहितं ग्रन्थं रचयित्वा न्यायवैशेषिकयोरजरामरोऽभूत् । यतः सर्वे तर्कशास्त्रप्रवेशमिच्छव सर्वान् अन्यान् ग्रन्थान् विहाय तदीयं ग्रन्थमेव प्रथममधीयते ।

न्यायदर्शने पदार्थाः —

न्यायदर्शने षोडशपदार्थाः अङ्गीकृताः । तथा हि 'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धा-न्तावयवतर्कनिर्णयवादजल्पवितण्डहेत्वाभासछलजातिनिग्रहस्थनानां तत्वज्ञानान्निःश्रेयसाधि-गमः' इति (न्या.सू.१.१.१) न्यायसूत्रम् ।

तत्र प्रमाणानि -

प्रमा प्रमितिः यथार्थानुभवः (इति अनर्थान्तरम्) एतानि अभिन्नपदार्थवाचकनामानि । एतादृशप्रमासाधनं प्रमाणमिति गीयते । वात्स्यायनेन 'उपलब्धिसाधनानि प्रमाणानि' इति न्यायभाष्ये (१.१.३) प्रमाणलक्षणमाटङ्कितम् । सम्यगनुभवसाधनं प्रमाणम् । सम्यग्ग्रहणं संशयविपर्ययापोहा-र्थमिति न्यायसारे भासर्वज्ञोऽप्याह ।

विविधदर्शनेषु प्रमाणविभागः -

प्रत्यक्षमेकमेव प्रमाणमिति चार्वाकाः । प्रत्यक्षानुमाने द्वे एव प्रमाणे इति बौद्धाः । वैशेषिकास्तु शब्दस्योपमानस्य च प्रामाण्यमङ्गीकृत्यापि ते द्वे अपि अनुमाने अन्तर्भावयन्ति ।

नैयायिकास्तु 'साक्षात्करोमि' 'अनुमिनोमि' 'उपमिनोमि' 'शाब्दयामि' इत्यनुव्यवसायबलात् प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानीति वदन्ति । तथा च गोतमन्यायसूत्रम् ।

'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' (न्या. १.१.४.३)

प्रमेयानि -

प्रमायां यद् भासते तत् प्रमेयम् । तानि च न्यायमते आत्म-शरीरेन्द्रियार्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव -फल-दुःखापवर्गभेदाद् द्वादश ।

एतेषु द्वादशप्रमेयेषु आद्यन्तस्थे आत्मापवर्गाख्ये द्वे प्रमेये मुमुक्षुभिरुपादेये । शरीरादिदुःखा-न्तानि उक्तानि दशप्रमेयानि मुमुक्षुभिर्हेयानि ।

अन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्यं प्रमेयजातं वर्तते । अवान्तरभेदेन तदपरिसङ्ख्येयम् । तदनुक्तौ इदं कारणं भवति । सूत्रोक्तद्वादशप्रमेयमिथ्याज्ञानात् संसारः । तेषां यथार्थज्ञानादेवापवार्गो भवति । न तु द्रव्यादिप्रमेयाणां ज्ञानेन । अतोऽपवर्गसाधनज्ञानविषयाणामेव प्रमेयाणां सूत्रे निरूपणं कृतमस्ति ।

न्यायमते मोक्षः –

आत्यन्तिकी दुःखनिवृत्तिः, एकविंशतिदुःखध्वंसो वा न्यायमते मोक्षः । तत्र दुःखं एकविंशतिप्रभेदभिन्नम् । शरीरं, षडिन्द्रियाणि, तेषां षड्विषयाः, षडिन्द्रियजन्यषड्ज्ञानानि सुखं दुःखं चेति दुःखे एकविंशतिप्रभेदाः । तत्र शरीरं तावत् दुःखायतनत्वाद् दुःखम् । इन्द्रियाणि विषया बुद्धयश्च दुःखसाधनत्वाद् दुःखम् । दुःखं स्वरूपत एव दुःखम् । सुखं तु दुःखाविनाभूतत्वाद् दुःखम् । एवं दुःखम् एकविंशतिप्रभेदभिन्नम् ।

मोक्षे च एतेषां निवृत्तिर्भवति । एतादृशमोक्षस्तु श्रवणादिजनिततत्वज्ञानद्वारा आत्मतत्वसा-क्षात्कारवतः पुरुषश्रेष्ठस्य परमेश्वरानुग्रहवशाद् भवति । मोक्षे सुखानुभवो नास्तीति न्यायमतम् । मोक्षे या दुःखाभावस्थितिः सैव सुखमिति व्यवह्रियते । मोक्षे सुखाङ्गीकारे तदानुषङ्गिकदुःखप्राप्तिरपि भवति । सुखस्य दुःखाविनाभूतत्वात् । सुखसाधनपदार्थाः बाहुल्येन दुःखसम्पादका अपि भवन्ति । अतो नैयायिकैर्मोक्षे सुखं नाङ्गीक्रियते ।

वैशेषिकदर्शनम्

तत्र भगवता महर्षिणा कणादेन प्रवर्तितं शास्त्रं वैशेषिकदर्शनमिति गीयते । इदं च औलूक्यदर्शनं काणाददर्शनमित्यपि नामान्तरेण प्रथितम् । वैशेषिकदर्शनमिति प्रथा कुतोऽस्य सञ्जाता इत्यत्रानेकानि कारणानि निरूपितानि दार्शनिकैः ।

१. इतरदार्शनिकैरनभ्युपगतो विशेषाख्यः नूतनपदार्थ इदम्प्रथमतया एतैः स्वीकृतोऽतस्ते

वैशेषिकाः ।

२. मोक्षस्वरूपविषये एतैरितरदार्शनिकापेक्षया विशेषोऽभ्युपगम्यते । नैयायिकैरेकविंशति-दुःख ाध्वंसः आत्यन्तिकदुःखनिवृत्तिर्वा मोक्ष इत्युक्तम् । एतैः पुन आत्मगतसकलविशेषगुण-ध्वंसो मोक्ष इति आत्मविशेषगुणमवलम्ब्यैव मोक्षस्वरूपं निरुक्तम् । अत एते वैशेषिका इति प्रथिताः ।

वैशेषिकदर्शने प्रमुखग्रन्थकाराः —

१. कणादः —

उलूकमहर्षिकुलोत्पन्नत्वात् कणादस्यैव औलूक्यम् इति नामान्तरम् । महर्षिः कणादः (क्रि.पू.७) वैशेषिकसूत्राणां प्रवर्तकः । अयं कपोतवद् रथ्यां पतितान् तण्डुलकणान् आदायाऽहारं सम्पादयति स्म । अतोऽयं कणादः कणभक्ष इति नाम्ना प्रसिद्धोऽभवत् । अनेन प्रणीतं वैशेषिकदर्शनं आह्निकद्वयघटितदशाध्यायव्यापृतेषु वैशेषिकसूत्रेषु प्रतिपादितम् ।

२. प्रशस्तपादाः (क्रि.श.४) एते वैशेषिकसूत्राणां भाष्यं रचयामासुः ।

एते वैशेषिकदर्शने भाष्यरूपेण स्वतन्त्रमेकं प्रबन्धं रचयामासुः । यश्चैषां प्रबन्धः कणादसूत्रेष्व नुक्तनूतनविषयप्रतिपादको भूत्वा पाश्चात्यव्याख्यानकाराणामादर्शप्रायं बभूव ।

३. श्रीधराचार्यः (क्रि.श.दशमशतकम्)

एतैः प्रशस्तपादभाष्यस्य न्यायकन्दल्याख्या विस्तृता टीका व्यरचि । अद्वयसिद्धिः, तत्वसंवादिनी, सङ्ग्रहटीका, इत्यादय एतेषामितरे ग्रन्थाः ।

वैशेषिकदर्शने पदार्थाः

वैशेषिकदर्शने 'द्रव्यगुणकर्मसामान्यविशेषसमवाया इति षडेव पदार्था अङ्गीकृताः । एतेषां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानान्निःश्रेयसप्राप्तिर्भवति । भावपदार्थाः षट् । अभावोऽपि सप्तमपदार्थो वैशेषिकैरङ्गीकृतः ।

कणादमते द्रव्याणि नवैव

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि इति द्रव्याणि नवैव । तमोऽतिरिक्तद्रव्यमिति भाट्टा वेदान्तिनश्च वदन्ति । परन्तु नैयायिकवैशेषिकयोर्मते तेजोभाव एव तमः । अतिरिक्तद्रव्यत्वे गौरवं स्यात् ।

अथेयं शङ्का भवेत् । तमो दशमं द्रव्यं भवितुमर्हति । तद्धि नीलं तमश्चलतीति चाक्षुषप्रत्यक्ष-सिद्धम्

। तमो द्रव्यं नीलरूपवत्त्वाच्चलनक्रियाश्रयत्वाच्चेत्यनुमानेन तमसो द्रव्यत्वसिद्धौ, गन्धरहितत्वात् पृथिवीभेदः सिद्ध्यति । नीलरूपवत्त्वाज्जलाद्यनन्तर्गतत्वं च सिद्ध्यति । एवं तमसो दशमद्रव्यत्वं सिद्धम् । तथा चोक्तम्—

'तमः खलु चलं नीलं परापरविभागवत् ।

प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ।।' इति ।

तदेतन्मतं निराकुर्वन्ति तार्किकाः । 'तेजोभाव एव तमः' इत्यभ्युपगमेनैवोपपत्तौ द्रव्या-न्तर-कल्पनाया अन्याय्यत्वात् । तत्र रूपवत्ताप्रतीतिर्भ्रमरूपैव । कर्मवत्ताप्रतीतिरपि आलोकाप-सरणनिमित्तकत्वाद् भ्रान्तिरेव । अथैवमत्र शङ्केत प्रतीतेस्तत्रैव भ्रमत्वाङ्गीकारः समुचितो यत्रोत्तर-काले बाधो वर्तते । प्रकृते तु नोत्तरकालीनबाधप्रतीतिरिति चेदत्र तार्किका भणन्ति । तमसोऽति-रिक्तद्रव्यत्वाङ्गीकारेऽनन्तावयवादिकल्पनागौरवापत्त्या लाघवार्थं प्रतीतेर्भ्रमत्वमङ्गीक्रियते इति ।

गुणनिरूपणम् - रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्व-द्रवत्व स्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः इति ।

कर्मनिरूपणम् - उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।

परमपरं च द्विविधं सामान्यम् -

विशेषनिरूपणम् —

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

नित्यद्रव्येषु परमाणुषु परस्परं भेदसाधनायानन्ता विशेषाः काणादैरुररीकृताः ।

तथा चोक्तम्—

'अन्त्यो नित्यद्रव्यवृत्तिः विशेषः परिकीर्तितः' इति ।

विशेषसद्भावे वैशेषिकैरियं युक्तिः प्रदर्शिता ।

द्व्यणुकपर्यन्तानां घटादिद्रव्याणां तत्तदवयवभेदात् परस्परं भेदः साधयितुं शक्यः । एतद्घटः तद्घटभिन्नः एतत्कपालारब्धत्वात् । एतत्कपालः तत्कपालभिन्नः एतत्कापालिकारब्धत्वादित्येवं क्रमेण त्र्यणुकपर्यन्तानामवयविनां परस्परं व्यावृत्तिः सिद्ध्यति । ततः एतद् द्व्यणुकं तद्द्व्यणुकभिन्नं एतत्परमाणु समवेतत्वादित्येवं द्व्यणुकेषु परस्परं भेदसिद्धिर्भवति । परमाणूनां तु निरवयवत्वेनैवंर-

ीत्या भेदोऽशक्यसाधनः । तस्मात् तेषु परस्परं भेदसाधनाय विशेषोऽभ्युपगतो वैशेषिकैः । तथा च 'एतत्परमाणुः तत्परमाणुभिन्नः एतद्विशेषादित्यनुमानेन परमाणूनां परस्परं भेदः सिद्ध्यति । अन्यथा परमाणूनां परस्परं भेदासिद्धौ द्व्यणुकादीनामपि भेदो न सिद्ध्यति । तथा च घटादीनामपि भेदासिद्धिः स्यात् । विशेषेषु कथं परस्परं भेदः सिद्ध्यति इति चेत्, नित्यद्रव्यवृत्तयो विशेषास्तु स्वतो व्यावृत्ता एव । अतस्तत्र व्यावर्तकान्तरापेक्षाभावान्न कश्चिद् दोषः । इति वैशेषिकानामाशयः ।

समवायः - नित्यसम्बन्धः समवायः अयुतसिद्धवृत्तिः

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।

तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः । इति ।

अभावश्चतुर्विधः - प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

३. यद्यपि कणादप्रशस्तपादाभ्यां कण्ठतः षडेव पदार्थाः प्रतिपादिताः । सूत्रे भाष्ये वा नाभावस्य निरूपणमस्ति । परन्तु पश्चादागतैर्वैशेषिकैः पदार्थविभागसन्दर्भेऽभावः सप्तमपदार्थत्वेन न्यरूपि ।

मीमांसकास्तु अभावमधिकरणस्वरूपमिति प्रतिपादयन्ति । तार्किकास्तु प्रमाणसिद्धस्या-भावस्या-नन्तधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तपदार्थत्वकल्पने लाघवसद्भावात् तम-ातिरिक्तमाचक्षते । किञ्च, अभावस्याधिकरणात्मकत्वे 'घटाभाववद् भूतलम्' इति अधिकरण-ाभावयोराधाराधेय-भावावगाहिप्रामाणिक-प्रतीतिर्नसङ्गच्छेत । आधाराधेयभावस्य भेदव्याप्तत्वात् । अतोऽभावोऽतिरिक्त एवाङ्गीकरणीय इति वैशेषिकानां राद्धान्तः ।

तर्कशास्त्रस्य सर्वशास्त्रोपकारकत्वप्रतिपादनम् -

१. न्यायशास्त्रप्रतिपादितप्रमाणस्वरूपविभागादीनि उपजीव्य खलु अन्यानि भारतीयदर्शनानि स्वाभिमतान् अर्थान् व्यवस्थापयामासुः । अतः न्यायशास्त्रं सर्वशास्त्रोपकारकम् इति सर्वेऽभिप्रयन्ति । तथा चाभियुक्तवचनम्- 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इति ।

२. वेदप्रतिपाद्यधर्माधर्मस्वरूपनिर्धारश्च न्यायशास्त्रेणैव भवतीति न्यायशास्त्रं सर्वशास्त्राणां प्रदीप इव वर्तते । तथाचोक्तम् -

प्रदीपः सर्वविद्यानां उपायः सर्वकर्माणाम् ।

आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ।। (न्या.भा. १.१.१)

३. वेदप्रतिपाद्यधर्माधर्मादिस्वरूपं वेदाविरोधितर्कसाहाय्येन ज्ञातव्यमिति मनुरपि न्यायशास्त्रस्य

श्रौतार्थनिर्णयसहकारित्वं प्रत्यपीपदत् ।

'आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।

यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।।' (म.स्मृ.११.१०६)

४. न्यायदर्शनेन किं प्रयोजनमित्यत्र प्रथमसूत्रमेव प्रमाणम् । तत्र प्रमाणप्रमेयादिपदा-र्थ-तत्वज्ञानान्निःश्रेयसाधिगमः इत्युक्तम् । न्यायशास्त्रेण पदार्थतत्वज्ञानं भवति । तेन च समाजस्य हानोपादानोपेक्षाबुद्धिरूपं दृष्टप्रयोजनं सिद्ध्यति ।

५. न्यायशास्त्राध्ययनेनाध्येतॄणां बुद्धिर्निशिता तीक्ष्णा च भवति ।

न्यायवैशेषिकमतयोः क्वचिदंशे साम्यम्, क्वचिदंशे वैषम्यं च-

साम्यम् –

१.उभयोर्दर्शनयोरसत्कार्यवादोऽङ्गीकृतः । साङ्ख्यमते कार्यकारणयोस्तादात्म्यमभ्युपगतम् । अतस्ते तन्तव एव पटात्मना परिणमन्त इति सङ्गिरन्ते । न्यायवैशेषिकदर्शने तु तन्तुभ्यः तद्भिन्नः पटो जायते ।।

२.सकलानां कार्याणां समवायि-असमवायि-निमित्तकारणेभ्य उत्पत्तिरिति उभे अपि प्रतिपादयतः ।

३.आत्माङ्गीकारे साम्यम् । इच्छाद्वेषादिभिरात्माऽनुमेय इति उभे वदतः ।

४.मनसोऽणुत्वेन युगपद् ज्ञानानुत्पत्तिरित्यपि न्यायवैशषिकमतयोः साम्यम् ।

वैषम्यम् –

१.वैशेषिका हेत्वाभासत्रयं प्रतिपादयन्ति । असिद्धिर्विरोधः सन्दिग्धत्वम् अथवा अनैकान्तिकत्वम् इति । नैयायिकास्तु सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासा इति वदन्ति ।

२.प्रमाणविभागविषये मतभेदः । नैयायिकास्तु चतुष्प्रमाणवादिनः । वैशेषिकास्तु शब्दस्योपम-ानस्य च प्रामाण्यमङ्गीकृत्यापि द्वेऽनुमानेऽन्तर्भावयन्ति ।

३.न्यायमते षोडशपदार्थज्ञानान्मुक्तिः । वैशेषिकमते तु द्रव्यगुणादिषट्पदार्थज्ञानान्मुक्तिः ।

४.वैशेषिकाः पीलुपाकवादिनः । नैयायिकास्तु पिठरपाकवादिनः ।

तथाहि । पाको नाम विलक्षणतेजःसंयोगः । तेन पृथिव्यां रूपरसादिपरावृत्तिर्जायते । यथा श्यामो

घटो विलक्षणतेजः संयोगेन रक्तो भवति । हरिद्वर्णयुक्तम् आम्रकदल्यादिफलं पाकेन पीतं भवति । तत्र रूपपरिवर्तनवद् गन्धरसस्पर्शपरिवर्तनमपि जायते । पाकः कुत्र जायत इत्यत्रोभयोर्दर्शनयोर्म्-तिभेदो वर्तते । तत्र पीलुषु परमाणुष्वेव पाक इति वदतां कणादमतानुसारिणां वैशेषिकानामयमाशयः । तेऽवयविनि घटादौ त्र्यणुकद्व्यणुकादौ च पाकं नाभ्युपगच्छन्ति । किन्तु परमाणुष्वेव पाक इति वदन्ति ।

तदित्थम् - अतिवेगवता तेजसा परमाणूनामभिघातसंयोगे सति परमाणुषु पूर्वघ-टनाशकक्रियाविभागादिक्रमेण पूर्वनीलघटो नश्यति । ततः परमाणवः विविक्ताः स्वतन्त्रा भवन्ति । तेषु तदा रक्तघटारम्भकक्रियाविभागादिक्रमेण रक्तघट उत्पद्यते । तत्क्रमस्तु एवं न्यरूपि वैशेषिकैः ।

१. वह्नेरभिघातसंयोगे सति प्रथमं परमाणुषु नीलघटनाशकक्रिया जायते ।

२. ततो क्रियतो परमाणुद्वयविभागः ।

३. तृतीयक्षणे परमाणुद्वयसंयोगनाशः ।

४. चतुर्थक्षणेऽसमवायिकारणसंयोगनाशाद् द्व्यणुकनाशः ।

द्व्यणुकादिनाशक्रमेण नीलघटनाशः ।

५. ततः परमाणुगतनीलरूपनाशः ।

६. ततः स्वतन्त्रेषु परमाणुषु रक्तरूपोत्पत्तिः ।

७. ततो रक्तरूपविशिष्टेषु परमाणुषु रक्तघटारम्भकक्रियादिक्रमेण ।

८. परमाणूनां पूर्वदेशविभागः ।

९. ततः पूर्वदेशसंयोगनाशः ।

१०. ततो रक्तद्व्यणुकारम्भकपरमाणुद्वयसंयोगः ।

११. द्व्यणुकोत्पत्तिः ।

१२. ततो द्व्यणुके रक्तरूपोत्पत्तिः । एवं क्रमेण रक्तघटोत्पत्तिर्वैशेषिकदर्शने उपपाद्यते ।

पिठरेषु घटाद्यवयविषु कपालादिपरमाणुपर्यन्तावयवेषु च एकदैव पाकं वदतां नैयायिकानाम्-यमाशयः । परमाणूनां तेजसाऽभिघातसंयोगे जाते नियमेन परमाणुषु घटनाशकक्रिया जायत इत्यत्र प्रमाणाभावेनावयविन्यपि पाकः स्वीकर्तव्यः । अत एव 'सोऽयं घटः' इति प्रत्यभिज्ञा प्रमात्मिका

भवति । पूर्वोत्तरघटयोरैक्यात् ।

एतन्मते द्व्यणुकत्र्यणुकाद्यनन्तावयविनाशतत्प्रागभावादिकल्पनाभावात् कणादमतापेक्षया लाघवं च वर्तते । अत्र क्षणप्रक्रिया एवं वर्तते । प्रथमक्षणे अवयवेष्वयविष्वप्यैकदैव विलक्षणतेजःसंयोगः ।

२. ततस्तेषु पूर्वनीलादिरूपनाशः ।

३. ततः सर्वत्र रक्तरूपोत्पत्तिर्जायत इति ।

एवंरीत्या न्यायवैशेषिकदर्शनयोर्विषया बहवः सन्ति । परन्तु अत्र यथाशक्ति सङ्गृह्योक्ताः ।

*****

# शृङ्गारशास्त्रे चुम्बनादिनिरूपणम्

– डा. श्रीकान्तबायरि
सहायकसंशोधकः,
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

धर्मार्थकाममोक्षमिति चतुर्विधं पुरुषार्थं लोकाः भजन्ते । तत्र धर्मस्य प्रथमं स्थानं वर्तते । यतो हि जीवने तस्य महत्वं वर्तते । धर्म एव अर्थ-कामौ शुद्धं करोति । कामोऽपि धार्मिकरूपेण आचरिते सति तदपि परलोकाय भवति । यतः मुनयोऽपि धार्मिकरूपिणः कामस्य मनुष्याणां हिताय नैकेषु शास्त्रेषु निरूपणं कृतवन्तः । तेषु एकः ग्रन्थः अनङ्गरङ्गः इति कल्याणमल्लाख्य कविना कृतः ग्रन्थः । तस्मिन् वात्स्यायनकामसूत्रानुसारेण कामितविषयाणां सम्यक् निरूपणमस्ति । तस्मात् गृहीतः एकः विषयः चुम्बनादिनिरूपणम् ।

तत्र केशग्रहणमुक्तमनङ्गरङ्गे—

'स्निग्धा घनाः कुंचितनीलवर्णाः
केशाः प्रशस्तास्तरुणीजनानाम् ।
रागप्रवृद्ध्यै विधिनैव मन्दं
ग्राह्या नरैश्चुम्बनदानकाले ।।' इति । (९.३७)

केशग्रहणविधिश्च चतुर्विधः, समहस्तकरताङ्गवज्रकभुजङ्गवल्लिकाकामावतंसभेदात् । तत्र नायिकाचुम्बनार्थं कराभ्यां नायककृतं चिकुरग्रहणं समहस्तकम् । तदेव एकहस्तेन कृतं रताङ्गवज्रक-मि-त्युच्यते । तथा चानङ्गरङ्गे-

'चिकुरान्परिकृष्य चुम्बते करयुग्मेन पतिः प्रियां यदि ।
समहस्तकमित्यथैकतो यदि हस्तेन रताङ्गवज्रकम् ।।' इति । (९.३८)

रतिसमये संचेष्ट्य केशग्रहणं भुजङ्गवल्लिकेत्युच्यते । तदप्यनङ्गरङ्गे—

'परिवेष्ट्य करेण कुन्तलान्मदनार्तो यदि धारयेत्प्रियाम् ।
रतिकेलिकलापकोविदाः कथयन्तीह भुजङ्गवल्लिकाम् ।।' इति । (९.३९)

रतिप्रारम्भे परस्परचुम्बनाय परस्परालकग्रहणं कामावतंस इत्युच्यते । तथा चानङ्गरङ्गे—

'कर्णप्रदेशस्थकचान्निगृह्य परस्परं चुम्बति यत्र नारी ।

पतिश्च रागात्सुरतावतारे कामावतंसस्स कचग्रहः स्यात् ।।' (९.४०)इति ।।

रत्यर्थतया परिरम्भानन्तरकर्तव्यचुम्बनप्रदेशानाह अनङ्गरङ्गे—

'अधराक्षिकपोलमस्तकं वदनान्तःस्तनयुग्मकन्धरम् ।

विहितानि पदानि पण्डितैः परिरम्भादनु चुम्बनस्य हि ।।' इति ।। (९.११)

तच्च चुम्बनं नवविधम्— निमितम्, स्फुरितम्, घण्टिकम्, तिर्यक्, उत्तरोष्ठम्, पीडितम्, अनुवक्त्रम्, सम्पुटम्, प्रतिबोधम्, समोष्ठं चेति । तत्र कोपाच्चुम्बनमनङ्गीकुर्वत्याः कान्तया बलात्कृतं चुम्बनं निमितमित्युच्यते ।

तथा चानङ्गरङ्गे—

'नारीमुखान्ते वदनं स्वकीयं

समानयेद्यत्र बलेन कान्तः ।

सा नैव चुम्बेदतिकोपयुक्ता

स्याच्चुम्बनं तन्निमिताभिधानम् ।।' (९.१३) इति ।

कान्तपरिचुम्बिताधरा नायिका कान्तस्य मुखे स्वमुखं निवेशयति, स्वयं न चुम्बति, तत्स्फुरितमित्युच्यते ।

तदपि तत्रैव—

'दयितस्य निवेश्य वक्त्रके निजवक्त्रं परिचुम्बिताधरम् ।

न पिबेदबला तदाननं स्फुरिताख्यं परिचुम्बनं तदा ।।' इति । (९.१४)

यत्र कान्ता स्वकरपल्लवेन दयितलोचनयुगमालमाच्छाद्य स्वजिह्वां कान्तानने प्रवेश्य चुम्बति, तत् घण्टिकमित्युच्यते ।

तदपि तत्रैव—

'करेण कान्तस्य निमील्य नेत्रे

जिह्वां मुखान्तर्विनिधाय यत्र ।

चुम्बेद्विलोला तरलायताक्षी-

तद् घण्टिकाख्यं कवयो वदन्ति ।।' हति । (९.१५)

पश्चादवस्थितो नायकः कान्ताचुबुकं करेण परिगृह्य साचीकृतवदनो यत्र चुम्बति, तत्तिर्यग्-ात्युच्यते ।

तदपि तत्रैव—

'करेण कान्ताचुबुकं मृहीत्वा दशेत्पतिः पश्चिमभागवर्ती ।

प्रियाधरं यत्र सु तिर्यगाख्यं प्रोक्तं कवीन्द्रैः खलु चुम्बनं तत् ।।' (९.१६)

इति । यत्र कान्ता तदनार्त्या कान्तस्याधरं चुम्बति, तदानी कान्तकृततदीयोत्तरोष्ठचुम्बनं उत्तरोष्ठमित्युच्यते ।

तदपि तत्रैव—

'दन्तैर्गृहीत्वा मदनार्तिलोलाधरं विचुम्ब्याशु दशेत्स्वभर्तुः ।

कान्तस्तदीयं कथितं मुनीन्द्रैरित्युत्तरोष्ठं परिचुम्बनं हि ।।' इति । (९.१७)

कान्ता यत्र कान्तस्याधरं सम्पुटितकराङ्गुलीभिर्गृहीत्वा चुम्बति, तत्पीडितमित्युच्यते ।

तदपि तत्रैव—

'आदाय दन्तच्छदमाशु पत्युः कराङ्गुलीसंपुटकेन नारी ।

जिह्वाग्रदेशेन धयेद्दशेच्च घटेच्चुम्बनं पीडितसंज्ञितं स्यात् ।।' इति । (९.१८)

पुटिताधरेण कान्तेन चुम्बिताधरा कान्ता स्वाधरसंपुटेन तमपि यत्र चुम्बती, तदनुवक्त्रम्, संपुटम्, केलिजिह्वाननजं चोच्यते ।

तच्च तत्रैव—

'प्रियाधरं स्वाधरसंपुटेन पिबेत्पतिः सापि तथैव भर्तुः ।

तत्संपुटाख्यं त्वनुवक्त्रसंज्ञं स्यात्केलिजिह्वाननजं तदेव ।।' इति । (९.१९)

चिरं सम्प्राप्तनिद्रां कान्तां प्रतिबोधयितुं 'गतः कान्तो यत्र चिरं चुम्बति तत्प्रतिबोधमित्युच्यते । तच्च तत्रैव—

'सम्प्राप्तनिद्रां रहसि स्वकान्तां

चिरं गतश्चुम्बति यत्र भर्ता ।

प्रोक्तं कवीन्द्रैः प्रतिबोधसंज्ञं

तच्चुम्बनं सर्वरसातिरेकम् ।।' इति । (९.२०)

कान्तस्य ओष्ठयोर्जिह्वायां च स्वकीयोष्ठौ जिह्वां च निवेश्य यत्र चुम्बति तत्समोष्ठमित्युच्यते ।

तच्च तत्रैव—

'अधरोष्ठयुगेन कामिनी पतिवक्त्रोष्ठयुगं स्वजिह्वया ।

परिपीड्य विचुम्ब्य नृत्यती कथितं तद्धि समोष्ठसंज्ञितम् ।।' इति ।। (९.२१)

कामिनीनामतिसौख्यावहं नखक्षतं सुरतसमये कर्तव्यमित्युक्तमनङ्गरङ्गे—

'नखं प्रयुक्तं प्रणयाद्रसज्ञैर्यदेतदेवास्ति मनोभवस्य ।

सर्वस्वमन्यत्तु सुखस्य हेतुर्नातोऽस्ति किंचिद्वरकामिनीनाम ।।' इति ।।

तच्च सप्तविधम्— क्षुरितम्, अर्धचन्द्रम्, मण्डलकम्, तरुणम्, मयूरपादम्, शशपादम्, उत्पलपत्रं चेति । तत्र गण्डकुचान्तरेषु संपूर्णनखविलेखनं क्षुरितमित्युच्यते ।

तथा चानङ्गरङ्गे—

'अव्यक्तरेखं कृतरोमहर्षं समर्पितं गण्डकुचान्तरेषु ।

यत्कर्म सम्पूर्णनखप्रभूतं विज्ञास्तदेव क्षुरितं वदन्ति ।।' इति । (९.२४)

ग्रीवाकुचे वक्रनखक्षतम् अर्धचन्द्रम् । पुनस्तदभिमुखप्रयुक्तं मण्डलकमित्युच्यते ।

तथा च तत्रैव—

'ग्रीवाकुचे वक्रनखप्रहारो दत्तोऽर्धचन्द्राख्य उदीरितोऽसौ ।

यद्येतदेवाभिमुखं प्रयुञ्ज्यात्तदा बुधा मण्डलकं वदन्ति ।।' इति । (९.२५)

मूर्धोरुगुह्यकुचदेशेषु द्वित्र्यगुलादधिकपरिमाणं रेखाद्वयं तरुणमित्युच्यते ।

तदपि तत्रैव—

'द्वित्र्यङ्गुलादधिक एव नखप्रहारो

मूर्धोरुगुह्यकुचदेशसमर्पितो यः ।

रेखाद्वयं मदनकेलिकलाविधिज्ञा

प्राहुस्तदेव तरुणं हि नखत्रपाहम् ।।' इति । (९.२६)

चूबुकाग्रे अङ्गुष्ठमाधाय अधःप्रदेशे सर्वनखैः कृतं क्षतं मयूरपादम् । सर्वनखैः कुचाग्रे क्रियमाणं शशमित्युच्यते ।

तथा चानङ्गरङ्गे—

'रेखा कृता सर्वनखैरधस्तादङ्गुष्ठमाधाय तु चूचुके या ।

मयूरपादं किल तां वदन्ति शशं तु तां सर्वनखैः कुचाग्रे ।।' (९.२८) इति ।

कुचगुह्यपृष्ठेषूत्पलपत्राकृतितया क्रियमाणं रेखात्रयं उत्पलपत्रमित्युच्यते ।

तच्च तत्रैव—

'रेखात्रयं पृष्ठकुचेऽथ गुह्ये कृतं भवेदुत्पलपत्रवद्यत् ।

अन्वर्थसंज्ञं प्रवदन्ति तद्धि भर्तु (स्मर्तुं) प्रवासावसरे दिशन्ति ।।' इति ।।

नखक्षतस्य देशकालावुक्तावनङ्गरङ्गे—

'ग्रीवाकरोरुजघनस्तनपृष्ठकक्षाहृत्पाश्र्व-

गण्डविषये नखराः खराः स्युः ।

माने नवीनसुरते विरहे प्रवासे

द्रव्यक्षये च विरतौ च सदा प्रयोज्याः ।।' इति । (९.२२)

नखलक्षणमपि तत्रैव—

'नीरंस्यता१(१. निरेखता) निर्मलतोज्ज्वलत्वं वर्धिष्णुता च स्फुरितत्वमेव१(१. वर्धिष्टगता-र्थस्फुटितत्वमेव) ।

अमार्दवं चेति गुणा नखानां बुधैः षडुक्ताः सुरतप्रसङ्गे ।।' इति ।।

परस्परानुरागाय दन्तक्षतस्य स्थलविशेषे कर्तव्यतां दर्शयति स एव—

'चुम्बप्रदेशेषु सदा विधेयाः पृष्ठाननान्तर्जघनानि हित्वा ।' इति ।

क्षते प्रशस्तान् दन्तांश्चाह स एव—

'दन्ताः प्रशस्ता अतिखर्वरूक्षाः करालबाह्या मलिनाश्च निन्द्याः ।' इति ।। (९.३१)

तच्च दन्तक्षतं सप्तविधम्— गूढकम्, उत्सूनकम्, प्रवालमणिः, (बिन्दुः) तिलबिन्दुः, उन्मण-

डनम्, क्रोडचक्रं चेति । तत्र व्रणं विनैव लौहित्यमात्रापादकं दन्तक्षतं गूढकम् । गण्डाधरयोर्व्यक्तरेखं दन्तपीडनमुत्सूनकमित्युच्यते । (तथा)चानङ्गरङ्गे—

'अधरस्थितरागमात्रकं रदं (लेख्यं) रेखं किल गूढकं विदुः ।

(३.दशन)१रदनच्छदगण्डपीडनादिदमुत्सूनकमुच्यते बुधैः ।।' इति । (९.३२)

क्षतपीडनादिकं विनैव दन्तोष्ठसंयोगः प्रवाळमणिरित्युच्यते ।

तथा चानङ्गरङ्गे-

'दन्तोष्ठयोर्योगविशेषसाध्यः प्रवाळपूर्वो मणिराबिमुक्तः ।

अभ्यासयोगेन च दंपतिभ्यां संसाध्यते नान्यविनोदतस्तु ।।' इति । (९.३३)

ललाटाधरयोः कामिनीदन्तद्वयकृतं क्षतं बिन्दुः । सर्वदन्तैः कृतं तिलिबिन्दुरित्युच्यते ।

तथा चानङ्गरङ्गे—

'अधरे तिलके१(१.तिलशश्च) च कामिनीरदयुग्मेन विडम्बने (विखण्डने) कृते ।

रति (इति) बिन्दुरुदीरितोऽखिलैर्दशनैः स्यात्तिलबिन्दुनामकः ।।' (९.३४)

इति । कपोलवक्षोगलफालदेशेषु दशनाग्रलेख्यमुन्मण्डनमित्युच्यते । तथा अनङ्गरङ्गे—

'कपोलवक्षोगलफालदेशे गण्डस्थले स्याद्दशनाग्रलेख्यम् ।

तन्मण्डनं१(१.तन्मण्डाकारमङ्गनानां) स्याद्धि तदङ्गनानामङ्गेषु शोभां लभते नितान्तम् ।।' (९.३५)इति ।

भर्त्रा स्वप्रस्थानसमये स्वस्मृत्यर्थतया कान्ताशरीरे कृतमखर्व-सान्द्रदशनक्षतं क्रोडचक्रमित्युच्यते ।

तदुक्तमनङ्गरङ्गे—

'अखर्वसान्द्रा दशनावली या कान्ताशरीरे क्रियते स्वभर्त्रा ।

प्रस्थानकाले स्मृतिहेतु पश्चात्तत्क्रोडचक्रं प्रवदन्ति तज्ज्ञाः ।।' इति । (९.३६)

* * *

# संस्कृतवैभवम्

– प्रा. एच्.वि. नागराजराव्

राष्ट्रपतिप्रशस्तिभाक्, मैसूरु

संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः इति दण्ड्युक्तिम् अनुसृत्य पाणिन्यादिभिः महर्षिभि॰ र्याकृतां भाषां संस्कृतं मन्यामहे । प्रायः पुरा प्राकृतादीनां भाषाणां व्याकरणं प्रसिद्धं न बभूव ।

स्वल्पकालानन्तरं संस्कृतव्याकरणमनुसृत्यानुकृत्य वा बह्वीनां भाषाणां व्याकरणानि रचितानि मनीषिभिः । देशभाषाणां व्याकरणानि तत्तद्भाषासु संस्कृतभाषायां वा रचितान्यद्याप्युपलभ्यन्ते । सर्वत्र संस्कृतमेव मार्गदर्शीति तु वैशिष्ट्यम् । वर्णोत्पत्तिविषये स्थानप्रयत्नविवेके च संस्कृतव्याकरण-ोक्तम् अन्यत्रानुसृतं दृश्यते, तत्र नूतनं वस्तु न लभ्यते ।

संस्कृतभाषाया व्याकरणे शब्दसृष्टिक्रमो वैयाकरणैर्दर्शितः । 'आतोऽनुपसर्गे कः' इति पाणिनेः सूत्रम् । व्याकरणपुस्तकेषु गोदः, कम्बलदः, धनद इत्युदाहरणानि दर्शितानि । सूत्रार्थं जानानः सुखदः, दुःखदः, कष्टदः इत्यादीन् अनन्तान् शब्दान् उत्पादयति यथेच्छं प्रयुङ्क्ते च । 'कर्मण्यण्' इति सूत्रेण कुम्भकार इति रूपनिष्पत्तिः व्याकरणे कृता । तां दृष्ट्वा ग्रन्थकारः, काव्यकारः, नाटककार इत्यादीन् शब्दान् बाला अपि निष्पादयन्ति । अत एव संस्कृतशब्दसमृद्धिर्गरीयसी ।

समुद्रस्य अम्बुधिः, वारिधिः, तोयधिः, उदधिः, अम्भोधिः, अब्धिः, जलधिः, पाथोधिः, पायोधिः, पयोधिः, इत्यादयः शब्दाः, सन्ति संस्कृते । आङ्ग्लभाषायां न्त्ळ, त्ङत्ळ इति पदद्वयमेव दृष्टिपथमायाति । अतः शब्दवैपुल्यविषये संस्कृतमेव प्रथमस्थाने वर्तत इति निश्चप्रचम् ।

क्रियापदानां विषयं विचारयामः । अष्टादशशताधिका धातवः संस्कृते विद्यन्ते । उपसर्गयोगेन एकैकस्यापि नानारूपाणि । यथा भवति, प्रभवति, सम्भवति, उद्भवति, पराभवति, अनुभवति, पर्-िरभवति, इत्यादिनि । पुनर्णिजादि प्रत्ययनां योगे भावयति, बुभूषति, बोभूयते, बोभवीति इत्यादीनि भूयांसि रूपाणि । तत्रार्थविषेषद्योतनं च । अथ एव कथयामो वयं - मानवस्य चित्ते उत्पद्यमानानां समेषां भावानाम् अभिव्यक्तौ शक्तानि पदानि अस्यां देवभाषायां सन्तीति । अस्मादेव कारणात् संस्कृतभाषावैभवं भाषन्तरेषु दुर्लभं देदीप्यमानम् उपलभ्यते इति ब्रूमः ।

संस्कृतवैभवमादौ तत्साहित्ये राराज्यते । वेदसाहित्यं तत्र चूडामणीयते । विश्वस्य प्राचीनतमं संरक्षितं साहित्यं वेदसाहित्यमेव । एतद्वैशिष्ट्यं दर्शयितुं विश्वस्य काप्यन्या भाषा न शक्नोति । वेदानां

रक्षायै वेदाङ्गान्याविर्बभूवुः । तत्र विज्ञानमपि स्थानं लेभे । ज्योतिर्विज्ञाने भारतवासिनां निष्णातत्वं परेषाम् असूयायाः निदानम् आसीत् ।

काव्यनाटकादि ललितसाहित्यं यथा संस्कृते विचकास तथा नान्यस्यां कस्यामपि भाषायाम् । अत्र यादृशाः शब्दालङ्कारा अर्थालङ्काराश्च दृश्यन्ते तथान्यत्र भवन्तीति ऊहितुमपि न शक्यते ।

'दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डध्वनि-

ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्ये रणम् ।

वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-

भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ।।'

इति पद्यं संस्कृतभाषायां रचयितुं शक्यम् । किम् आङ्गलभाषायां फ्रेञ्चभाषायां रष्यन्भाषायां वा एतादृशं हृद्यं कर्णानन्दकरं पद्यं विद्यते ?

विद्वन्मानसहंसवैरिकमलासङ्कोचदीप्तद्युते ।

दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।।

साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ।।

इत्यादौ श्लेषभित्तिकाभेदाध्यवसायेन यानि रूपकाणि निर्मितानि तानि कस्यामन्यस्यां भाषायां सम्भवन्ति ? अभिज्ञानशाकुन्तल-मृच्छकटिक-मुद्राराक्षसप्रभृतीनि नाटकानि अद्यापि विश्वस्य नाटकेषु श्रेष्ठानीति सर्वैः परिगण्यन्ते । बाणभट्टस्य कादम्बरी दण्डिनो दशकुमारचरितं च कं न मोहयतः ? जयदेवस्य अष्टपदी कस्य हृदयं कौमल्येन नाकर्षति ? भासकृतं पात्रचित्रणं कं न मुग्धं करोति ? एतादृशं वैभवयुतं साहित्यं दृष्ट्वैवोक्तम् -

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो

भासो हासः कविकुलगुरुः कालिदासो विलासः ।

हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः

केषां नैषा कथय कविताकामिनी कौतुकाय ।।

अन्योऽप्युवाच -

सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते

धृतिर्दाक्षीपुत्रे हरति हरिचन्द्रोऽपि हृदयम् ।

विशुद्धोक्तिः शूरः प्रकृतिमधुरा भारविगिरः

तथाप्यन्तार्मोदं कमपि भवभूतिर्वितनुते ।।

संसकृतवैभवं वस्तुतः शास्त्रसाहित्यम् अवलम्बते इति मनीषिणां मतम् । ललितसाहित्यं सर्वभाषासाधारणम् । शास्त्रसाहित्यं तु संस्कृतस्य स्वम् । नव्यन्यायशास्त्रस्य या परिष्कारशैली दृश्यते सान्यत्र क्वापि न दृश्यते । जीवनसार्थक्यं साधयितुं पुरुषार्थान् अवाप्तुं शास्त्राण्येव मार्गं कल्पयन्ति । संस्कृत एव मन्वादिरचितं धर्मशास्त्रं, कौटिल्यप्रणीम् अर्थशास्त्रम्, वात्स्यायन॰ याहृतं कामशास्त्रं, व्यासप्रोक्तं मोक्षशास्त्रं च वर्तते । अद्य शास्त्राणां प्रायोजनानि स्पष्टीभविष्यन्ति । विशेषतः न्यायशास्त्रस्य । तत्र हि स्वतन्त्रा विचारसरणिः बोभूयते । मोक्षशास्त्रमिति प्रथितं वेदान्तशास्त्रं न केवलं भारतवासिनाम् अपि तु सर्वदेशवासिनां मनस्समाधानाय कल्पते । तत्र विद्यमानं द्वैताद्वैतविशिष्टाद्वैतादिमार्गाः विश्वमेव विस्मयाम्बुधौ मज्जयन्ति ।

वैचारिकं स्वातन्त्र्यं विज्ञानाभिवृद्धौ मुख्यं कारणम् इति विपश्चिताम् अभिप्रायः । वेदान्तक्षत्रे शास्त्रस्य अभिवृद्धौ तदेव कारणम् अभवत् । एकः सिद्धान्तः केनचिदाचार्येण प्रतिष्ठापित इति सर्वे तम् अन्धपरम्परान्यायेन नान्वसरन् । स्वचिन्तनानुसारेण अपरमपि सिद्धान्तं प्रास्तुवन् । अतः चैतन्यं नौतन्यं च दृश्यते । एतद्विषये विद्वद्भिः अद्य विचरयिष्यते इति विश्वसिमि ।

संस्कृतभाषावैभवं वैदिकमतानुसारिभिरेव साधितमिति न भ्रमितव्यम् । बौद्धानां जैनानां च तत्र योगदानमस्ति । यद्यपि भगवान् गौतमबुद्धो भगवान् वर्धमानमहावीरश्च तदनीन्तनीं देशभाषाम् उपयुयुजाते इति सत्यम् । किन्तु कालान्तरे बौद्धा जैनाश्च देवभाषायाः महत्त्वं विज्ञाय तस्यामेव ग्रन्थरत्नानि प्रणिन्युः । अश्वघोषस्य द्वे महाकाव्ये प्रकरणमेकं दर्शनग्रन्थाश्च प्रथन्ते लोके । धर्मकीर्त्यादयोऽपि गम्भीरतमान् ग्रन्थान् रचयाम्बभूवुः । व्याकरणशास्त्रस्याभिवृद्धौ बौद्धानां योगदानं गणनार्हम् । काशिकावृत्तेः प्रणेतारौ जयादित्यवामनौ बौद्धौ । न्यासाख्यायाः व्याख्यायाः कर्ता जिनेन्द्रबुद्धिरपि बौद्धः । रूपावतारस्य प्रणेताद्वितीयो धर्मकीर्तिरपि बौद्धः । एतेषां विषयेऽनादरो न दर्शनीयः ।

जैनधर्मोऽस्मद्देशे प्रबल आसाञ्चक्रे । कर्णाटदेशस्य नानाराजकुलानि जैनधर्मानुयायीनि बभूवुः । जैनदार्शनिकाः कुन्दकुन्दाचार्यादयः प्राकृतभाषाया ग्रन्थान् प्रकृष्टान् निबबन्धुः । तदनन्तरं समन्तभद्रादयः संस्कृतमेव आशिश्रियुः । जैनकवयः श्रेष्ठानि काव्यानि नाटकानि च रचयामासुः ।

धनपालेन कादम्बरीसमाना तिलकमञ्जरी रचिता ।

सोमदेवप्रणीता यशस्तिलकचम्पूः सुप्रसिद्धा-दिगन्तविश्रान्तधवलकीर्तिः कलिकालसर्वज्ञ इति प्रख्यातो हेमचन्द्राचार्यः नैकशास्त्रनदीष्णः । नानाशास्त्रेषु ग्रन्थान् प्राणैषीत् । तस्य शब्दानुशासनं काव्यानुशासनं च लोके प्रथेते । जैनौ रामचन्द्र-गुणचन्द्रौ अलङ्कारशास्त्रेऽपि कृतभूरि-परिश्रमौ । नाट्यदर्पणाख्ये ग्रन्थे तौ सर्वेषां रसानां सुखात्मकत्वम् इति प्राचां सिद्धान्तं खण्डयतः । शोकस्थायिभावकः-करुणः-जुगुप्सास्थायिभावको बीभत्सः, भयस्थायि भावको भयानकः, क्रोधस्थायिभावकश्च रौद्रः । कथं सुखात्मका एते रसा भवेयरिति तौ पृच्छतः ।

तस्मादष्टसु रसेषु चत्वारः (शृङ्गार-हास्य-वीर-अद्भुताः) रसा सुखात्मकाः, अन्ये चत्वारो दुःखात्मका इति तौ आतिष्ठेते । संस्कृतभाषावैभवम् इत्थं जैनग्रन्थेषु शोभमानमाकलनीयम् ।

संस्कृतभाषा सामान्यजनजीवनाद् दूरे क्वापि वने अश्रमे देवालये वा निगूहिता बभूवेति भ्रान्तिर्न करणीया । स्त्रियोऽपि गृहे मातृभाषयेव देवभाषयापि बभाषिरे इति विक्रमाङ्कदेवचरिते बिल्हणोऽभाणीत् ।

ब्रूमः सारस्वतकुलभुवः किं विधेः कौतुकानां
तस्यानेकाद्भुतगुणकथाकीर्णकर्णामृतस्य ।
यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव
प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च ।। इति ।

संस्कृतं न केवलं संस्कृतकाव्ये विललास, अपि तु कन्नड-तेलुगु-मलयाळादिदेशाभाषा-काव्येष्वपि । किमर्थममिति चेत् देशभाषाकवयः उभयभाषाविशारदा आसन् । लीलया ते संस्कृतशब्दान् समासांश्च प्रायुञ्जत । देशभाषाकाव्यरूपेणापि संस्कृतं व्यराजत, स्वप्रभावप्रसररेन स्ववैभवं प्रार्दायदिति विपश्चिद्भिर्ज्ञातमेव ।

स्मृतिग्रन्थाः जनानां दैनिके व्यवहारे मुख्यं पात्रं वहन्ति स्म । याज्ञवल्क्यस्मृतेः मिताक्षराख्यं व्याख्यानम् अधीत्यैव आङ्ग्ला अपि भारतदेशस्य प्रशासनाय नियमान् रूपयामासुरिति न तिरोहितम् ।

संस्कृतभाषायां कविवरेण्यैर्यत्साधितं तदन्यासु भाषासु न शक्यते कर्तुं संस्कृतसाहाय्यं विना । भारवे किरातार्जुनीये पद्यं दृश्यते —

ननो ननुन्नो नुन्नोनो नाना नानानना ननु ।

नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ।।

एतादृशं पद्यं क्वान्यत्र दृश्येत ?

संस्कृतभाषावैभवस्य अन्यदिदं द्योतकं यत्तस्यां द्विसन्धानकाव्यानि त्रिसन्धानकाव्यानि पञ्चसन्धनकाव्यानि च सन्ति ।

एकमेव काव्यं कथाद्वयं कथात्रयं वा कथयतीति अस्या भाषायाः सामर्थ्यविशेषप्रकाशकमिदं वर्तते । यादवराघवीयं यादवराघवपाण्डवीयम् इत्यादि कुतूहलिभिः द्रष्टव्यम् । वेङ्कटाध्वरी राघवयादवीयाख्ये काव्ये अपरं चाद्भुतं साधितवान् । अनुलोमगत्या तत्र पठने राघवस्य कथा दृश्यते, प्रतिलोमगत्या पठने यादवस्य कृष्णस्य कथा लभ्यते ।

वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।

रामोरामाधीराप्यागो लीलामाराध्येवा से ।।

इति तत्राद्यं पद्यम् । एतदृशेन कविना मेधाविना पद्यमेतादृशं सुरभाषायां राचयितुं शक्यम् । नान्यस्यां भाषायामिति वयं मन्महे ।

सुरभाषाया महिम्नः द्यौतकं भवति शास्त्रकाव्यमपि । शास्त्रबोधके काव्यं शास्त्रकाव्यम् । उादहरणं भट्टिविरचितं रावणवधाख्यं कान्यम् । तत्र व्याकरणशास्त्रस्य बोधनाय पद्यानि कविना रचितानि । तिङन्तरूपाणि तद्धितान्तानि सर्वाणि तस्याध्ययनेन ज्ञायन्ते ।

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितृनताप्र्सीत् सममंस्त बन्धून् ।

व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलदातं न्यवधीदरींश्च ।।

इत्यादीनि पद्यानि यस्य कण्ठस्थानि, स वाग्मी भवति, समस्तान् सङ्ख्यावतस्तोषयति । एतादृशं जगन्नाथविजयाख्यं शास्त्रकाव्यं वेङ्कामात्येन कर्णाटकदेशस्थेन व्यरचि अष्टादशे शतमाने इति सगर्वं विज्ञापयामः । नैतादृशं शास्त्रकाव्यं भाषान्तरे दृष्टपूर्वम् । धातुकाव्यमित्यप्येकं काव्यं प्रसिद्धं यत्र भ्वादीनां सर्वेषां धातूनां प्रयोगो दृश्यते । इयं खल्वेका भाषा यस्यां गणितं वैद्यं खगोलविज्ञानम्िाति सर्वे विषयाः काव्यरूपेण वितन्यन्ते । भाषायाः शक्तिरेव विशिष्टा तत्र द्योतते ।

छन्दांसि संस्कृतभाषायामिव भूयिष्ठान्यन्यत्र नोपलभ्यन्ते । एकाक्षरात् छन्दसः आरभ्य षड्विंशत्यक्षरपर्यन्तं संख्यातुमपि कष्टानि अक्षरच्छन्दासि, अर्धसमानि विषमाणि च वृत्तानि,

मात्राच्छन्दांसि आर्यादीनि च वयमत्र पश्यामः ।

नैतावदेव । गेयानि काव्यानि गीतगोविन्दादीनि अस्यां भाषायां विलसन्ति । गीतगङ्गाधरं गीतवीतरागम् इत्यादीनि च शोभन्त देवभाषायाम् । मुत्तुस्वामिदीक्षितादिभिः रागनिबद्धानि गीतानि संस्कृतभाषायां रचितानि अद्यापि गायकैर्गीयमानानि विद्यन्ते ।

अस्मिन् सम्मेलने सुधीभिः उक्तेषु अनुक्तेषु च क्षेत्रेषु संस्कृतभाषायाः महिमाविस्तरेण प्रतिपादयिष्यते । वैदुष्येऽद्य न्यूनता नास्ति । पुरा विश्वविख्यातकीर्तयो यामुनाचार्या जगदुः -

आशैलादद्रिकन्याचरणकिसलयन्यासधन्योपकण्ठात्

आ रक्षोनीतसीतामुखकमलसमुल्लासहेतोश्च सेतोः ।

आ च प्राच्यप्रतीच्यक्षितिधरयुगलादर्कसोमावतंसान्

मीमांसाशास्त्रयुग्मश्रमविमलमना मृग्यतां मादृशोऽन्यः ।। इति ।

पणिहतराजो जगन्नाथोऽपि जगर्ज -

आ मूलाद्रत्नसानोर्मलयवलयितादा च कूलात्पयोधेः ।

यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु ।।

मृद्वीकामध्यनिर्यन्मसृणरसझरीमाधुरीभाग्यभाजां ।

वाचामाचार्यतायाः पदमनुभवितुं कोऽस्तिधन्यो मदन्यः ।। इति ।

अधुनास्यां सभायां सर्वज्ञैः श्रीचरणैर्मण्डितायां यामुनाचार्यसमानाः पण्डितराजसमानाः बुधाः कवयश्च सन्ति । ते संस्कृतभाषावैभवं सर्वतोमुखं विशदयिष्यन्ति ।

विलसतु सुरभाषा सर्वदेशेष्वकुण्ठा

जयतु सकलशास्त्रव्यापृता देववाणी ।

विकसतु विबुधानां गीरियं लोकपूज्या

भवतु च जगदेतत्सर्वदा सौख्यपूर्णम् ।।

श्रीमध्वपादयुगलं सततं नमामि विश्वेशतीर्थचरणौ शिरसा स्मरामि ।

विश्वप्रसन्नयतिवर्यपदारविन्दं नित्यं दधामि हृदये सकलार्थसिद्ध्यै ।।

*****

# भारतीयसंस्कृतिः संस्कृतभाषा च

-डा. एन्.के. सुन्दरेश्वरन्

Professor, Dept. of Sanskrit,

University of Calicut,

Kerala-673 635

कस्याश्चन जनतायाः संस्कृतिः सामान्यतः तदन्तःपातिजनानां समस्तं व्यवहारक्षेत्रम् अभिव्याप्य तिष्ठति । अत एव जनतायाः विचारक्षेत्रेषु समस्तेषु सा प्रतिफलति । परं, वेषभूषादौ, नीतिव्यावहार-कृषि-भोजनादिषु, राज्यतन्त्रे, प्रशासनप्रविधौ, दण्डनीत्यादिव्यवहारविधौ चेति समस्तेषु सामाजिकेषु व्यवहृतिविशेषेषु अभिव्याप्तायाः संस्कृतेः सर्वोप्यंशः सङ्कलय्य एकत्र - विचारपद्धतौ सुदर्शः समुल्लसति । तेन च भाषानिबद्धस्य विचारजातस्य सुनिपुणनिरूपणेन जनतायाः संस्कृतिम् अवगन्तुं शक्यते । संस्कृतभाषानिबद्धा भारतीयसंस्कृतिः अस्माभिर्निरूपणीयत्वेन व्यवसिता अस्ति । सा देशे विदेशेषु च समस्तैः सुधीभिः सुतरां महितत्वेन संश्लोक्यते । अन्यैः संस्कारैरप्रभाविता प्रत्रा वरिष्ठा च सा संस्कृतिः सुविमलधिषणैः प्रज्ञाचक्षुर्भिः ऋषिभिः प्रवर्तिता वरीवर्तीति सुविदितमेव प्रज्ञावताम् । तस्याश्च संस्कृतेर्वाहिनी वाणी नान्या संस्कृतभारत्या इतीदमपि निर्विवादम् । अर्धमागध्यादिषु प्राकृतभाषासु तथा प्राचीनायां द्रमिडभाषायाश्च, यद्यपि दार्शनिका विचारा, निरूपिताः, छन्दोमयी काव्यात्मिका च जागर्ति वाणी, तथापि तदीयं प्रतिपाद्यजातां संस्कृतभाषानिबद्धापेक्षया अतिस्वल्पमेव विषयवैविध्येन । सा चेयं संस्कृतभाषा विश्वभाषासु सरळा मधुरा रम्या प्रौढा च चकास्तीदमपि सर्वैराद्रियत एव । तेन अहो भाग्यम् अहो भाग्यमस्माकं यत् संस्कृतभाषानिबद्धां भारतीयसंस्कृतिमधिकृत्य विचाराय मधुरायाभिप्रेताय प्रेरिता इति ।

किन्तु संस्कृतेरस्या गभीरतां गरिमाणं महिमानश्च दृष्ट्वा कथङ्कारम् अस्या निरूपणं करणीयमित्यत्र चकिता इति कर्तव्यतामूढाश्च स्मः । निरूपणस्यास्य दुश्शकत्वं, 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः'१ इति श्रतिवाक्यं स्मारयति नः । यस्यां संस्कृतौ 'यत्र विश्वं भवत्येकनीळम्'२ इति सामुद्रास्तरङ्गा अपि गर्जन्ति, यत्र च 'धर्मो रक्षति रक्षितः'३ इति तरवोपि नदन्ति मोदेन, यत्संस्कृतिभृति च भुवि 'तेन त्यक्तेन भुञ्जीथाः'४ इति गृहाङ्गणगताः कीरा अप्युद्गिरन्ति, सेयं संस्कृतिः कथं वा मन्दधिषणैरस्मादृशैः अत्यल्पेन कालांशेन निरूपयितुं शक्यते ? यथा वेदान्तदेशिकैरुक्तं

'निश्शेषमम्बरतलं यदि पत्रिका स्यात्सप्तार्णवा यदि मही च मषीभवित्री । वक्ता सहस्रवदनः पुरुषः स्वयं चेल्लिख्येत रङ्गपतिपादुकयोः प्रभावः५ ।। तदेतदत्रापि सङ्गच्छत एव । सेयमपारता न केवलं संस्कृतेर्गभीरतायां वैपुल्ये च, किन्तु संस्कृतभाषायां श्रुति-स्मृतीतिहास-उपवेद-वेदाङ्ग-दर्शन-पुराण-ा-धर्मशास्त्र-व्याकरणन्यायादिशास्त्र-दण्डनीति-कामशास्त्र-काव्य-नाटकादिसाहित्य-कलाशास्त्र-का० यशास्त्र-नाट्यशास्त्रादिरूपेण जाग्रतां विषयाणां वैविध्येऽप्यस्ति ।

परिस्थितावेतस्यां किं वा कुर्मः ? यथाकथञ्चित् करणीयमेवेत्यतः एवं कर्तुमिष्यते । भारतीयसंस्कृतेः आधारस्तम्भभूतान् त्रिचतुरानंशान् आदाय, साहित्ये सामलोड्य, निरूप्य च, तेषाम् अनुपमत्वम् अभिव्याप्तत्वञ्च प्रदर्श्य तद्द्वारा संस्कृतेरस्या वरिमाणं सङ्कीर्तयाम इति ।

धर्मः - अनितरसाधारणः गम्भीरः कल्पः —

भारतीयसंस्कृतेः प्राणत्वेन राराज्यमानः कल्पो भवति धर्मः, यादृशः अन्यत्र संस्कृतिषु न शक्यदर्शः । सरळं तथापि गभीरञ्च भवति धर्मस्य तत्त्वम् । यो जीवनक्रमः, यद्यद् व्यवहृतिजातं, समस्तस्य स्थावरजङ्गमात्मकस्य प्रपञ्चस्य धारणे सुप्रतिष्ठितत्वे सहजस्फुरणे च साहाय्यमाचरति तदेव धर्मः । चराचरस्य जगतः वृत्तिं प्रवृत्तिं च अनुरुध्य वर्तनं धर्मः, प्रतिरुन्धद्वर्तनञ्च अधर्मः । यद्वा समेषां भूतानां सुखावहं जीवनमेव धर्मः । अर्थात्, धर्मः न केवलं तत्कर्तुः - परं समस्तस्य जगतः - सुखमावहतीति । एवं सामान्यं स्वरूपं धर्मस्य । तत्तत्काले तत्तद्देशे तत्तत्कार्येषु च भिद्यते तत्तज्जनैः अनुष्ठेयो धर्मः । अर्थात् प्रातिस्विकतया भिद्यते धर्मः । कथमेतत् ? प्रातिस्विकतया मिथो भिन्नाः, कदाचिद्विरुद्धाश्च धर्माः कृत्स्नस्य जगतः कथं वा सुखं जनयन्ति, अथवा कथं निखिलमिदं जगद् बिभर्तुं शक्नुवन्ति ? महतीयं प्रहेलिका । अत एवोच्यते मनीषिभिः 'धर्मस्य तत्त्वं निहितं गुहायाम्'६ इति । एवं स्थिते 'तस्माच्छास्त्रं प्रमाणं ते'७ इति वचनमनुरुध्य तत्तत्सन्दर्भे तत्तच्छास्त्रोक्तरीत्या कर्तव्यम् इत्युक्तेपि वैषम्यमस्त्येव । नैकैः शास्त्रैः एकस्मिन्नेव सन्दर्भे मिथो वैरुध्येन कर्तव्यानि निर्दिश्यन्ते । किं वा करणीयम् ? एवम् आपाततः सारळ्यं दुर्ग्रहताञ्च युगपद् बिभर्ति धर्मस्य कल्पः । तस्मादेव वेदेषु, शास्त्रेषु, दर्शनेषु, इतिहासपराणेषु च महती चर्चा क्रियते धर्मस्वरूपमधिकृत्य । परं, 'धर्मो वेदमूलम्' इति८, धर्म एव समस्तस्य जगतः प्रतिष्ठेति९, 'सम्यक् पालितो धर्मः अस्मान् रक्षति' इति१० च सर्वैः समाद्रियते । यद्यपि सौगतैः धर्मस्य वेदमूलता नाद्रीयते तथापि तन्मतेऽपि 'धर्मं शरणं गच्छामि' इति शरणत्रितयेन्यतमत्वेन धर्म इति कश्चन कल्पः श्रद्धास्पदत्वेन प्रधानत्वेन च समभ्यर्हितः इति वेदितव्यम् ।

धर्मस्य स्वरूपं निष्कर्षेण निरूपयन्ति धर्मशास्त्राणि (विभिन्नाः स्मृतयः) ऐकस्वर्येण वेदानां धर्ममूलत्वम् आमनन्ति । धर्मस्य स्वरूपं, तथा अनेकान् धर्मिविशेषान्, तेषाम् एकत्र सन्निवेशे सति मिथो बलाबलविचारश्च निरूपयन्ति च । वर्णाश्रमधर्मनिरूपणम् इति महान् विषयः, तथा अनेके अवान्तरविषयाः - यथा श्रौतस्मार्तक्रियाणां स्वरूपं प्रयोगः राजधर्मादिकं, व्यवहारः, प्रायश्चित्तम्, आशौच इति - चर्च्यन्ते महता ग्रन्थसन्दर्भेण धर्मशास्त्रग्रन्थेषु । ज्ञायत एव सुधीभिर्यदेतद् धर्मशास्त्रविषयकं साहित्यं धर्मसूत्राणि, स्मृतयः, निबन्धाः पद्धतयः इति अनेकां विद्यां प्रकारश्चापद्य अतिविपुलमस्तीति ।

धर्मस्य स्वरूपं निरूपयितुमेव प्रवृत्तं शास्त्रमस्ति पूर्वमीमांसाख्यं वैदिकं दर्शनं येन वाक्यार्थनिरूपणाय महद्योगदानं कृतम् ; येन चास्य वाक्यशास्त्रम् इति प्रथा वरीवर्ति ।

शास्त्रस्यैतस्य मूलभूतो ग्रन्थः जैमिनिना मुनिना प्रणीतः यो न केवलं विचारविषयस्य इतरशास्त्रोपयोगित्वेन, अपि तु ग्रन्थशरीरेण च इतराणि दर्शनान्यतिशेते । अस्य धर्माख्यस्य कल्पस्य भारतसंस्कृतौ या रूढमूलता व्यापिता चास्ति तां दर्शयितुमेव इयदुक्तम् । 'चोदनालक्षणोर्थो धर्मः'११ इति, 'यतोभ्युदयनिःश्रेयससिद्धिः स धर्मः'१२ इति नैकधा धर्मस्वरूपं निरूपितं विविधैर्दर्शनैः ।

न केवलं श्रुतयः स्मृतयः दर्शनानि च, किन्तु इतिहासपुराणान्यपि धर्मस्वरूपनिरूपणमेव स्वेषां विषय इति प्रथयन्ति । 'रामो विग्रहवान् धर्मः'१३ इति स्वकाव्यस्य नायकं रामम् अवतारयन् आदिकविः, 'केनचित्पुरुषेण धर्मः यथावदनुष्ठातुं शक्यते किम् ?' इति प्रश्नस्य शक्यत एवेति निदर्शयितुमेव धर्मात्मनो रामस्य अयनमुपवर्णितम् । स्वयं रामः प्रख्यापयति, काममर्थं वा नाहमर्थयामि धर्ममेव केवलमुपाश्रितोहम् इति । आत्मनः प्रतिज्ञां वितथीक्रियमाणाम् अस्थाने आशङ्कमानां कैकेयीं प्रति रामः प्रतिजानीते-

'नाहमर्थपरोदेविलोकमावस्तुमुत्सहे ।
विद्धिमामृषिभिस्तुल्यं केवलं धर्ममाश्रितम् ।।'१४ इति ।

कविराद्यः अन्येषां पात्राणां कथनैरपि नायकस्य रामस्य धर्मात्मतामसकृत् द्रढयति१५ । साम्प्रदायिका अपि धर्ममूलो वेद एव रामायणत्वेन काव्यात्मतां नीत इति दृढं प्रतियन्ति१६ ।

एवमेव महाभारताख्यः सुविख्यातः इतिहासोपि धर्मस्य तत्त्वं विवरीतुमेव प्रवर्तित इति कविवेधसा कृष्णद्वैपायनेन बहुधा व्यञ्जितम् । 'यतो धर्मतस्ततो जयः' इति गान्धारीवाक्यं व्यासस्य भगवतः

प्रतिज्ञावाक्यमिव महाभारतसारसर्वस्वमिव च समाद्रियते सारवेदिभिः । विशिष्य आनुशासनिकशान्तिपर्वणोः पृथुळशरीरयोः धर्मस्वरूपम् आख्यानैरुपाख्यानैश्चानेकैः, महता ग्रन्थेण, अतृप्तेनेव महर्षिणा, निर्वर्ण्यते स्पष्टीक्रियते च । किञ्च

'न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
धर्मो नित्यः सुखदुःखे त्वनित्ये जीवो नित्यो हेतुकस्य त्वनित्यः ।।'१७

इदानीं कृष्णद्वैपायनवाक्यं भारतसावित्री इति समुद्घुष्यते धर्मनिरूपणनिपुणैर्मनीषिभिः । पुराणानामपिगतिरीदृश्ये ।

काव्यनाटकादीनां रसपराणां साहित्यसन्दर्भाणामपि 'रामादिवद्वर्तितव्यं न रावणादिवद्' इति धर्मोपदेश एव परमं लक्ष्यमिति काव्यशास्त्रकारा आमनन्ति । धर्मादिपुमर्थव्युत्पत्तिरेव नाट्यस्य प्रयोजनमिति नाट्यशास्त्रविचक्षणः अभिनवगुप्तपादो मनुते ।

महाकविषु अग्रेसरतः कालिदासस्य कामार्थपरास्वपि कृतिषु धर्मस्वरूपं निरूपितमेव बहुधा बहुशः ।

'रेखामात्रमपि क्षुण्णादा मनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।।'१८ इति,

'स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान् व्यवहारानतन्द्रितः ।।'१९ इति

बहुत्र राजधर्मो महीयते ।

किञ्च पुंसवनादीनां गृह्यकर्मणां विधिवदनुष्ठानस्य वर्णनमपि महाकाव्ययोरुभयोः अनेकत्र धर्मशास्त्रानुसारितया विहितं दृश्यते । 'शरीरमाद्यं खलु धर्मसाधनम्', 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।' इत्यादीनि सूक्ष्मधर्मप्रतिपादकानि कविवाक्यान्यपि सुप्रसिद्धानि । किं बहुना ! शृङ्गाररसप्रधाने अभिज्ञानशाकुन्तले नाटके यद्धर्मपरं वाक्यमुदीरितं कविता, 'सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःरकरणवृत्तयः ।' इति, तत् धर्मशास्त्राचार्येण तन्त्रवार्तिककारेण कुमारिलभट्टेन 'एवं हि विद्वद्वदनाद्विनिर्गतं प्रसिद्धरूपं कविभिर्निरूपितम् ।' इति प्रमाणीकृतम् ।

निवृत्तिधर्मः श्रेयान्

किं वेदविहितानां श्रौतस्मार्तादीनां कर्मणां विधिवदनुष्ठानमेव वा धर्मस्य सार इति चेन्नैव ।

प्रवृत्तिधर्मो निवृत्तिधर्मश्चेति द्विविधो धर्मः । तत्र श्रौतस्मार्तादिकर्मरूपः प्रवृत्तिधर्मः धर्मशास्त्रग्रन्थेषु भूयसा निरूपितः । निवृत्तिधर्मश्च श्रुतिशिरस्सु बहुधा प्रपञ्चितः, यः भगवद्गीतासु तथा ब्रह्मसूत्रेषु च अनूदितो व्याख्यातश्च । किमनयोः प्रवृत्तिनिवृत्तिपरयोः विरोध इति नैवेत्यत्र उपनिषदः तथा अद्वैतवेदान्ताचार्याणां शङ्करभगवत्पादानां भाष्याणि च प्रमाणम् । श्रौतस्मार्तादिकर्मणां विधिवदनुष्ठानेन विधूतपाप्मा विमलचित्तः ज्ञानपरं निवृत्तिमार्गमनुसरेदिति आचार्यसमयः ।

सर्वत्र समदर्शित्वं, सर्वभूतसुहृत्त्वं, अपरिग्रहः, ब्रह्मचर्यम्, सर्वसङ्गपरित्यागः, स्थितपज्ञत्वम् इत्यादयः निवृत्तिधर्मानुष्ठातुः स्वरूपग्राहका धर्माः न विरुध्यन्ते प्रवृत्तिधर्मेण । गौतमेन धर्मसूत्रकारेण अष्टाचत्वारिंशत् संस्काराः परिगण्यन्ते - येषु एकविंशतिः श्रौतकर्माणि, पञ्च महायज्ञाः, चतुर्दश गृह्यकर्माणि इति चत्वारिंशत् कर्मविशेषः । शिष्टा अष्टौ आत्मगुणाः । ते चात्मगुणाः वस्तुतो निवृत्तिपराः । इमे भवन्ति ते - 'दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यम्-ास्पृह'२० चेति । निवृत्तिधर्मे प्रविष्टस्य अनुपेक्षणीया गुणा इमे इति द्रष्टुं शक्यते । अत्रेदमनुसन्धेयं यद् गौतमेन चत्वारिंशत्संस्कारापेक्षया आत्मगुणानां प्रकृष्टत्वमाख्यायते इति । यद्यपि कस्यचित् चत्वारिंशत् संस्कारा अन्यूनतया सन्ति, अष्टानामात्गुणानामभावे तस्य ब्रह्मणः सायुज्यं सालोक्यं च न भवेदिति, प्रत्युत चत्वारिंशत्संस्काराणामेकदशमात्रसद्भावेऽपि महर्षिः२१ ।

निवृत्तिधर्मो ज्ञानवैराग्यलक्षणः परां विद्यां ब्रह्मविद्यापरनाम्नीं वेदयति, या अज्ञान-प्रयुक्तसंसा-रनाशिका अक्षरब्रह्मप्रापिका च । यामेव उपनिषदिति व्यपदिशति श्रुतिमाता । सैव विद्यापदवाच्या । सैव मुक्तिहेतुः । अन्यत्सर्वं वेदवेदाङ्गादि बन्धहेतुकम् अपरा विद्या इति हेयतयोपदिश्यते अधिग-ातब्रह्मतत्त्वस्य । ईदृशी विद्या विश्वस्मिन्नपि विश्वे नान्यत्र संस्कृतौ उपलभ्यते । येन विज्ञातेन सर्वम्-ादं विज्ञातं भवति, येन विदितेन वेदितुः स्वरूपनाशः२२, यच्च तारयति शोकाद्वेत्तारं२३ तादृशस्य अखण्डबोधस्वरूपस्य त्रिकालाबाधितसत्यस्य सान्द्रानन्द-स्वरूपस्य ब्रह्मणः वेदयित्री एव विद्यत्वेन ग्राह्या ; सापि अक्षरस्याधिगमानन्तरं हेयता-कोटावन्तःपतति सर्वैरितरैः साकम् इतीयं सत्योद्घोषणा कुत्र वा अन्यत्र जगति श्रवणगोचरा भवेत् ?

'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति शौनकेन पृष्टो गुरुरङ्गिराः धीरमुद्गिरति' '...द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरम्-ाधिगम्यते ।'' इति । अस्य मुण्डकोपनिषद्वाक्यस्य छायापि अन्यत्र दुर्दर्शैव ।

'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह'२४, 'एतँ ह वाव तपति - किमहँ साधु नाकरवम् । किमहं पापमकरवमिति ।'२५, 'तज्जलानिति'२६, 'तरति शोकमात्मविद्'२७ इत्याद्या गभीरा गिरः भारतीयसंस्कृतेरन्यत्र, श्रुतिशिरांसि विहाय, अन्यत्र, कुत्र वा श्रोतुं समुपलभ्यन्ते ?

तदेतद् गुहा हितं परमं ब्रह्मतत्त्वम् 'अहं ब्रह्मास्मि', 'तत्त्वमसि', इत्यादिभिर्महावाक्यैः लक्षणया बोधयितुं प्रयतन्ते श्रुत्यन्तग्रन्थाः । न केवलम् उपनिषदः इतिहासपुराणानि काव्यनाटकादीनि इति संस्कृतवाङ्मयं समस्तम् अभिव्याप्नोत्येव सेयमन्यादृशी अपूर्वाविद्या । केवलं कुत्रचित्प्रकाशा कुत्रचिच्चाप्रकाशा इत्येव भेदः ।

सत्यम् ।

भारतीयसंस्कृतौ अपरः अपूर्वः अन्यादृशश्च कल्पो भवति सत्यस्य ।

'सत्यमेव जयते नानृतं सत्येन पन्था विहितो देवयानः ।

येनाक्रमन्त्यृषयोह्याप्तकामा यत्र तत्सत्यस्य परमं निधानम् ।।'२८

इति उपनिषन्माता सत्यस्य जगन्निधानत्वं सङ्कीर्तयति । परमं वेदितव्यं ब्रह्म, सत्यमेव इत्यपि श्रुतयः उद्घोषयन्ति ।

'सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान्त्सह । ब्रह्मणा विपश्चितेति'२९ इति तैत्तिरीयोपनिषत् ।

ऋग्वेदे च ऋतम्, सत्यम् इतीमे पदे बहुत्र समानार्थकतया कुत्रचित्सत्रा च प्रयुक्ते दृश्येते । सत्यं च ऋतं च सर्वस्यापि जगत आधारभूते इति मन्त्रद्रष्टारो मुनयः सुदृढं प्रतियन्ति ।

'सत्येनोत्तभिता भूमिः सूर्येणोत्तभिताद्यौः ।

ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः ।।'३०

इति ऋग्वेदः प्रथयति सत्यस्य भूमेराश्रयत्वम् ।

तदेतत्सत्यस्य तत्त्वं भारतीयां संस्कृतिं तदभिव्यञ्जिकां संस्कृतभारतीञ्च समभिव्याप्नोति । 'सत्यं वद, धर्मं चर', 'सत्यान्न प्रमदितव्यम्' इत्याद्यानि तैत्तिरीयामुशासनवाक्यानि सुप्रसिद्धान्येव । जाबालस्य सत्यकामस्य, पितुः सत्यप्रतिज्ञत्वपालकस्य दाशरथेः रामस्य, तथा सत्यप्रतिश्रवस्य हरिश्चन्द्रस्य पुराणप्रसिद्धस्य इति सत्यसंस्तुतिपराः कथाः सर्वविदिता एव ।

श्रीमद्भागवते च पुराणे पूर्णपुण्यावतारो भगवान् श्रीकृष्णः यदा अवततार तदा देवानां स्तुतिर-

ीदृशी आसीत् -

'सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये ।

सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ।।'३१ इति ।

किञ्च तत्रैव पुराणे भगवतो नृसिंहस्य अवतारः, निजभृत्यस्य परमभागवतस्य प्रह्लादस्य वचसः सत्यवचस्त्वभङ्गो मा भूदिति कृत्वा भगवता स्वयं विहित इति वर्ण्यते ।

'सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।

अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ।।'३२ इति ।

एवमेव महाभारतयुद्धे स्वभक्तस्य भीष्मस्य वचः ऋतं कर्तुं भगवान् निजां प्रतिमामपि हित्वा अरिवरं धारयन् क्रोधशावीव तमभ्यधावदिति किञ्चन मनोरमं दृश्यं वर्ण्यते । पाञ्चभौतिकं कलेबरं त्यजन् शान्तनवो भीष्मप्रतिज्ञः तदिदं दृश्यम् एवमनुस्मरति-

'स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः ।

धृतरथचरणोभ्यधावच्चलद्गुर्हरिरिवहन्तुमिभं गतोत्तरीयः ।।'३३ इति ।

एवं सत्यस्य तत्त्वं, लौकिक्यापि दृशा संस्कृतभाषानिबद्धे साहित्ये समुल्लसति । गभीरेषु दार्शनिकविचारेषु च त्रिकालाबाधितस्य सत्यस्यैव नित्यवस्तुनः सर्वोत्कर्षेण उपादेयत्वमुपेयत्वञ्चेति पौनःपुन्येन दृढीक्रियते ।

'असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ।'३४

'यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।

तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।।'३५

'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।'३६

'विज्ञाते तु परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।'

'अथ परा यया तदक्षरमधिगम्यते ।'

इत्यादीनि उच्चावचानि वाक्यान्यत्र निदर्शनम् ।

आचार्यवान् पुरुषो वेद

अन्यादृशम् अपूर्वमन्यत् तत्त्वमस्ति भारतीयसंस्कृतौ-गुरोस्तत्त्वम् । गाढमान्तरं तमः अपनुदतः,

प्रज्ञाचक्षुरुन्मीलयतः, गुरोः महत् स्थानम् कल्पितमस्त्यत्र । नेश्वरतुल्यत्वम्, किन्तु ईश्वरत्वमेव गुरोर्महीयते ।

'ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।

व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ।।'

इति संश्लोक्यते तन्महिमा । किञ्च आचार्योपदेशमपहाय ब्रह्मज्ञानं दुरवापमेवेति वेदान्तिभिः 'आचार्यवान् पुरुषो वेद'३७ इति श्रुतिवाक्यं प्रमाणयद्भिः निगद्यते ।

आचार्यः, उपाध्यायः, गुरुः इत्याद्या अनेके आविष्कृतिप्रकाराः समुपलभ्यन्ते गुरुतत्त्वस्य । तत्तदनुगुणा निरुक्तयश्च उदाह्रियन्ते ।

'त्वत्कारुण्ये प्रवृत्ते क इव न हि गुरुः'३८ इति भक्तकविर्विद्वदग्रणीः नारायणभट्टपादः प्रस्तौति । अनुगृहीतानां भागवतानां, जगत् समस्तं गुरुभूतं सत् शिक्षयति परं तत्त्वमिति तस्याभिप्रेतम् ।

'पृथिवी वायुराकाशमापोग्निरश्चन्द्रमा रविः ।

कपोतोऽजगरः सिन्धुः पतङ्गो मधुकृद् गजः ।।

मधुहा हरिणो मीनः पिङ्गळा कुररोऽर्भकः ।

कुमारीशरकृत् सर्प ऊर्णनाभिः सुपेशकृत् ।।'३९

इति श्रीमद्भागवतपुराणं चतुर्दश अध्यात्मविद्यागुरून् संस्तौति ।

उपसंहारः

एवं संस्कृतभाषानिबद्धे साहित्ये, पदे पदे महिता भगीरा च भारतीयसंस्कृतिः प्रतिभातीति दर्शयितुं तस्यां संस्कृतौ प्रधानभूतान् कांश्चन कल्पनादाय विचारः प्रवर्तितः । इतोप्यन्ते बहवः अंशा - सम्प्रदायसिद्धा आचाराः, कल्पाः, व्यवहाराश्चमहिता महीयन्त एवास्यां संस्कृतौ, येषां प्रतिफलनं च सुदर्शं सद् वरीवर्ति सुरभारत्याम् । तेषु केषाञ्चन नामोल्लेखमात्रमत्र प्रस्तूयते । अतिथिसपर्या, दानम्, प्रणवश्रद्धावागादीनामुपासना, व्रतचर्याप्रकारा बहवः, कर्मज्ञान-भक्त्याख्यास्त्रयो योगाः, भक्तिमार्गस्य सार्वजनीनता सौलभ्यश्च, त्रिगुणसिद्धान्तः, इत्याद्या अन्यादृशा अंशाः संस्कृतेरस्या वैशिष्ट्यं ख्यपयन्ति । सत्स्वप्येषु, सत्यस्य विद्यायाश्च परमं स्थानं वितीर्णमिति द्रष्टव्यम् ।

यच्छास्त्रं परं सत्यं प्रापयति, यश्च गुरूपदेशः वेदयति तत्, तदुभयमपि उपायत्वेन न्यक्करण-ीयमिति व्यक्तं पश्यति महिमा संस्कृतिरियम् ।

'न शास्त्रान्न गुरोर्वाक्यान्न दानान्नेश्वरार्चनात् ।

एष सर्वपदातीतो बोधः सम्प्राप्यते परः ।।'४०

इति निर्भीकं प्रस्तुवत् तदुपपादयति च योगवासिष्ठाख्यं ग्रन्थरत्नमेवम् -

'एतानि कारणान्येव कारणत्वं गतान्यलम् ।

परमात्मैकविश्रान्तौ यथा राघव तच्छृणु ।।

शास्त्रादभ्यासयोगेन चित्तं यातं विशुद्धताम् ।

अनिच्छदेवमेवाशु पदं पश्यति पावनम् ।।'४१

एवमेव अखण्डबोध एव, ज्ञानमेव, परं सत्यवस्तु ; अमृतमक्षरं ब्रह्म च तदेवेति मधुरं गायति श्रुतिमाता ।

शृणुत -

'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।

हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ।।'४२

'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।'४३

एतावन्मात्रमुक्त्वा विरम्यते इति शम् ।

*****

ह्रश्र ष्टु :

१. श्वेताश्वतरोपनिषत् -९ (तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति इति वाक्यशेषः ।)

२. वेनस्तत्पश्यन् भुवनानि विद्वान् यत्र विश्वं भवत्येकनीळम् । महानारायणोपनिषत् - १.३.८

३. धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोऽवधीत् । मनुस्मृतिः - ८.१५

४. ईशावास्योपनिषत् -१

५. पादुकासहस्रम् ३.२

६. तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नैको मुनिर्यस्य वचः प्रमाणम् ।

धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ।। महाभारतम् ।

७. भगवद्गीता १६.२४

८. वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामानस्तुष्टिरेव च ।। मनुस्मृति - २.६

९. धर्मो विश्वस्य जगतः प्रतिष्ठा - महानारायणोपनिषत् - १८

१०. यं पालयसि धर्मं त्वं धृत्या च नियमेन च ।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु । (वाल्मीकिरामायणम् - २.२५.३)

११. जैमिनिसूत्राणि-१.१.३

१२. वैशेषिकसूत्राणि - १.२

१३. वाल्मीकिरामायणम् ३.३७.१३

१४. वाल्मीकिरामायणम् २.६.१६

१५. सीता नायिका भर्तारमुद्दिश्य हनूमन्तं कथयति-
'धर्मापदेशात्त्यजतश्च राज्यं माञ्चाप्यरण्यं नयतः पदातिम् ।
नासीत् व्यथा यस्य न भीर्न शोकः कच्चिच्च धैर्यं हृदये करोति ।।'

लक्ष्मणः तपसा तेजसा च ज्वलन्नपि शूरोपि इन्द्रजितं घ्नन् रामस्य धर्मात्मताप्रतिज्ञामन्त्रेण साकं
प्रहिणोति अमोघं शरम् -
धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।
पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ।।' इति ।

१६. वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना ।।

१७. महाभारतम्, स्वर्गारोहणपर्व, ५.६३

१८. रघुवंशम् १.१६

१९. रघुवंशम् १७.८

२०. गौतमधर्मसूत्राणि १.८.२३-२४

२१. यस्यैते चत्वारिंशत्संस्कारा न चाष्टावत्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं गच्छति ।

यस्तु तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अत स ब्रह्मणः सायुज्यं सालोक्यं गच्छति । (गौतमधर्मसूत्राणि- १.८.२५,२६)

२२. ब्रह्मविद्ब्रह्मैव भवति । मुण्डकोपनिषत् - ९

२३. तरति शोकमात्मवित् । छान्दोग्योपनिषत् - ७.१.३

२४. तैत्तिरीयोपनिषद् २.४.१

२५. तत्रैव

२६. छान्दोग्योपनिषद्-३.१४.१

२७. छान्दोग्योपनिषद्-७.१.३

२८. मुण्डकोपषित् ३.१.६

२९. तैत्तिरीयोपनिषत् २.१.३

३०. 'ऋग्वेदः' १०.८५.१

३१. श्रीमद्भागवतम् १०.२.२६

३२. तत्रैव ७.८.१७

३३. तत्रैव १.९.३७

३४. वाक्यपदीयम्,-२.२३८

३५. श्रीमद्भगवद्गीता,२.४६

३६. तत्रैव २.४५

३७. छान्दोग्योपनिषत् - ६.१४.२

३८. 'त्वत्कारुण्ये प्रवृत्ते क इव नहि गुरुर्लोकवृत्तेऽपि भूमन् सर्वाक्रान्तापि भूमिर्नहि चलति ततः सत्क्षमां शिक्षयेयम् । गृह्णीयामीश तत्तद्विषयपरिचयेप्यप्रसक्तिं समीराद् व्याप्तत्वञ्चात्मनो मे गगनगुरुवशाद्भातु निर्लेपता च ।।' मेल्पुत्तूर् नारायणभट्टपादकृतं नारायणीयस्तोत्रम्- ९३.३

३९. श्रीमद्भागवतम् - ११.७.३३,३४

४०. योगवासिष्ठम् ६-२.१९६.२०

४१. तत्रैव ६२.१९७.१९,२०

४२. महानारायणोपनिषत् १.३.१,२

४३. ईशावास्योपनिषत् - ११

*****

## अवयवविमर्शः

विद्वान् ऐतरेय भारद्वाजः
पूर्णप्रज्ञविद्यापीठम्

इह खलु जगतीतले प्रमेयव्यवस्थापकं खलु प्रमाणपदवाच्यमिति सुविदितम् । तदेतच्च प्रमाणं बहुधा प्रविभक्तम् । परन्तु सत्स्वप्येतेषु विवादेषु न कोऽपि वैदिको दार्शनिकः अनुमानस्य मानताम्-ााशङ्कते ।

तत्राप्यनुमानं नाम 'अनुमितिकरणम्१' । तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधम् । तत्र परोपदेशानपेक्षस्वानुमितिहेतुः स्वार्थम् । यत्परोपदेशमपेक्षते तत्परार्थानुमानम् ।

तस्य च परोपदेशस्य कियन्त्यवयवानि सन्तीत्यत्रास्मिन्विषये महान्मतभेदः दरीदृश्यते । तद्यथा—

१. दाशवयववादः २. पञ्चावयववादः ३. चतुरवयववादः

४. त्र्यवयववादः ५. द्व्यवयववादः ६. एकावयववादः

७. अनियमवादः

दशावयववादः

उपलब्धेषु प्राचीनग्रन्थेषु दशावयवव्यवस्थापि चाक्षुषप्रत्यक्षविषयीभूता भवति । सापि न्यायभाष्य२-न्यायसिद्धान्तमञ्जरीप्रकाश३-मणिप्रकाशादिशु४ प्राचीनन्यायसिद्धान्तानुसारिषु ग्रन्थेषु । तत्र महर्षिणा वात्स्यानेन स्वविरचिते भाष्ये दशावयववादसम्बन्धिनी व्यवस्था इत्थं प्रस्तूयते । यथा —

१. प्रतिज्ञा २. हेतुः ३. उदाहरणम् ४. उपनयः ५. निगमनम् ६. जिज्ञासा ७. संशयः ८. शक्यप्राप्तिः ९. प्रयोजनम् १०. संशयव्युदासः इति ।।

निर्युक्तिगाथानामके ग्रन्थे दशावयवव्याख्यानस्य प्रकारद्वयसंविधानसमस्तीति ज्ञायते । यथा-

प्रथमप्रकारः

१. प्रतिज्ञा २. प्रतिज्ञाविशुद्धिः ३. हेतुः

४. हेतुविशुद्धिः ५. दृष्टान्तः ६. दृष्टान्तविशुद्धिः

७. उपसंहारः ८. उपसंहारविशुद्धिः ९. निगमनम्

१०. निगमविशुद्धिः

द्वितीयप्रकारः

१. प्रतिज्ञा २. प्रतिज्ञाविभक्तिः ३. हेतुः

४. हेतुविभक्तिः ५. विपक्षः ६. प्रतिषेधः

७. दृष्टान्तः ८. आशङ्का ९. आशङ्काप्रतिषेधः

१०. निगमनम्

न्यायभाष्ये कृतमवयवव्याख्यानं निर्युक्तिगाथाग्रन्थीयावयकव्याख्यानतः सर्वथा विभिन्नमस्ति । इदमेव प्रकरणद्वयस्वरूपं वैलक्षण्यं विभिन्नपरम्परायाः प्रतीकभूतं भवति । नवीननैयायिकरीत्यैतेषां प्रथमपञ्चावयवातिरिक्तपञ्चावयववाक्यानां नास्ति किमपि मूल्यम्, सर्वथा निरसनीयाश्च ते सन्ति ।

पञ्चावयवपरम्परा

पञ्चावयवपरम्परां सर्वप्रथममान्वीक्षिकीशास्त्रजन्मप्रदाता महर्षिगौतम एव स्वीकृतवान् । स च गौतमो तां परम्परां सूत्ररूपेण दर्शितवान् । तत्रापि प्रत्येकस्यावयवस्य लक्षणमपि सूत्रद्वारैव स्पष्टं चकार । येषामाशा पश्चात् महर्षिणा वात्स्यायनेन स्वभाष्यद्वारा विशदीकृतः ।

न्यायसूत्रकारद्वारा प्रदर्शिताः पञ्चावयवाः

१. प्रतिज्ञा २. हेतुः ३. उदाहरणम् ४. उपनयः ५. निगमनम्

एतेषामवयवानां महदेवेदं वैशिष्ट्यं यदेते स्वोत्पत्तिकालमारभ्यैव इदानीन्तनकालावच्छेदेनापि स्वनाम्नि किमपि परिवर्तनं परिवर्धनं चानपेक्षमाणा स्वस्वरूपेणावतिष्ठन्ते । यद्यपि अन्यत्र अनेकेषु विषयेषु नव्यनैय्यायिकैर्महत्त्वपूर्णान् परिष्कारान् सम्पाद्य कियन्ति कृतान्यपि परवर्तनानि, कृतानि च तेषां नामान्तराणि, यथा हेत्वाभासप्रकारपरिष्कारेषु सत्प्रतिपक्षासिद्धाबाधिता हेत्वाभासाः प्रकरणसम-साध्यसम-कालातीतशब्देनोच्यन्ते, एतान्येव च तषां सन्ति नामान्तराणि । परन्तु प्रतिज्ञाहेतूदाहरणोपनयनिगमानां पञ्चानामवयवानां नाम्नि प्रयोगे वा वर्तमानकालावच्छेदेनापि किमपि परिवर्तनं परिवर्धनं वा दृष्टिगोचरतां नायाति । अपि तु एते पञ्चावयवाः स्वस्वरूपे एव स्थितिमन्तो दृश्यन्ते ।

वैशेषिकसूत्रेषु यद्यपि अवयवानामुल्लेखो न स्पष्टीकृतो वर्तते तथापि भाष्यकारश्रीप्रशस्तपादेन पञ्चावयवानां प्रयोगः५, सोदाहरणानि च लक्षणानि सुस्पष्टीकृतानि दृश्यन्ते, तदनुसारमेव तत्र पञ्चावयवानां प्रयोगः स्वीकृतो वर्तते, परन्तु तेषामवयवानां सन्ति नामानि पृथक् पृथग्भूतानि इत्यस्ति एतावानेव विशेषः । यथा प्रतिमा-उपदेश-निदर्शन-अनुसन्धान-प्रत्याम्नायपदाभिधेयानि । एतेषु वैशेषिकदर्शनाभिमतेषु पञ्चावयवेषु प्रथमोऽवयवः न्यायसूत्रानुसारी, द्वितीयोऽप्यवयवो वैशेषिकसूत्रेष्वस्मिन्नेव स्वरूपे बाहुल्येनोपलभ्यते । परन्त्वन्तिमानां त्रयाणामवयवानां नामाधेयस्य निर्वचनं स्वयमेव प्रशस्तपादेनैव कृतमिति प्रतीयते ।।

साङ्ख्याचार्यश्रीमाठरमहोदयेन पञ्चावयवनिर्देशावसरे श्रीप्रशस्तपादानामेव अनुगमनं कृतम्-
्६ । इत्यांस्तु विशेषः यदेभिर्निरूपिता त्रयोऽप्यवयवा दृष्टिगोचरतां यान्ति । पक्ष-हेतु-दृष्टान्तानां नामनिर्वचनं सम्पाद्य प्रतिज्ञा-हेतुदाहरणान्यपि निर्दिष्टवन्तः श्रीमाठरमहोदयाः । पञ्चावयवप्रयोगस्तु साङ्ख्यसूत्रेष्वपि मान्योऽस्ति ये च पञ्चावयवा गौतमानुसारं श्रीविज्ञानभिक्षुणा स्पष्टीकृताः ।

चतुरवयववादः

यद्यपि समुपलब्धेषु सर्वेष्वपि दार्शनिकग्रन्थेषु एवं विधा न कापि परम्परा श्रूयते यस्याम्-ावयवचतुष्टयस्य व्यवस्था समुपलभ्येत । अनन्तवीर्यहेमचन्द्राभिधानकैजैनाचार्यैः केवलम्-ावयवचतुष्टयात्मिकायाः परम्पराया मीमांसकपरम्परानाम्ना उल्लेखनं कृतमिति श्रूयते ।

त्र्यवयववादः

अवयवत्रयस्वीकारपक्षे प्रधानतया सङ्ख्य-मीमांसक-अद्वैतवेदान्तिनामेव परिगणनं भवितुम्-ार्हतीति । साङ्ख्यग्रन्थेषु अवयवचर्चा केवलं माठरवृत्ता७वेवोपलभ्यते ।

एतेषां नये पक्ष एव प्रतिज्ञापदप्रतिपाद्यः । मीमांसादर्शने यद्यपि जैमिनिसूत्रेषु तथा शाब-रभाष्येऽवयवचर्चायाः सर्वथा अत्यन्ताभाव एव वर्तते । तथापि कुमारिलभट्ट-पार्थसारथिम्-ाश्र-मानमेयोदयकारनारायणभट्ट-प्रभाकर-शालिकनाथप्रभृतिभिः मीमांसकैस्त्रय एवावयवा अङ्गीकृता इति सुनिश्चितमेतत् । कुमारिलभट्टेनापि त्रयाणामेवावयवानां सविस्तरं वर्णनं कृतम् । तेषामयम्-ाायः प्रतिज्ञा-हेतु-उदाहरणानि, अथवा उदाहरणोपनयनिगमनानि इमे आद्यन्तवन्तस्त्रय एवावयवा आवश्यका । प्रभाकर-शालिकनाथ-नारायणप्रभृतिभिरपि विद्वद्भिस्त्रयाणामेव अवयवानामङ्गीकारो व्यधायि । एतेषां विवेचने एतावानेव विशेषः यदिमे अवयवाः क्रमिकधारां नाङ्गीकुर्वन्ति यथा नैय्-ाायिकास्तां स्वीकुर्वन्ति ।

वेदान्तपरिभाषाकारा८ अपि मीमांसकमतमेवानुसरन्ति । अवयवनिरूपणेऽपि प्रतिज्ञा-हेतूदाहरण-ानि, अथवा उदाहरणोपनयनिगमनानि एते एव आद्यन्तवन्तत्रयोऽवयवाः स्वीकृता भवन्ति ।

धर्मकीर्तेः पूर्ववर्तिनो बोद्धाचार्या अपि पूर्वोक्तांस्त्रीनेवायवान् स्वीकृततवन्तः । आचार्यम्-ैत्रेनापि प्रतज्ञाहेतूदाहरणस्वरूपास्त्रय एवायवाः स्वीकृताः । दिङ्नागेनापि त्रय एवावयवाः स्वीकृताः । पक्षहेतुदृष्टान्तभूता एव त्रयोऽवयवा एतेषां मते सन्ति ।

द्व्यवयववादः

आचायधर्मकीर्तिः जैनतार्किकश्च द्वावेवावयवद्वयवादिनौ स्तः । द्वयोरेतावानेव भेदः यत् प्रथमः (धर्मकीर्तिः) उदाहरणोपनयौ स्वीकरोति अपरश्च प्रतिज्ञाहेतू इति ।

धर्मकीतिः प्रतिज्ञाप्रयोगस्य असाधनाङ्गवचनत्वेन कृत्वा निग्रहस्थाने तमन्तर्भावयति । तेषाम्-ायमाशयः यत् - पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वैस्त्रिभिर्धर्मैः संपन्नो हेतुः साध्यसाधको भवितुमर्हति । व्याप्तिपक्षधर्मतयोरेव अनुमानाङ्गत्वेन आवश्यकत्वेन स्वीकृतत्वात् तत्र चोदाहारणस्य व्याप्तिम्-ूलकत्वेन, हेतोरुपनयस्य वा पक्षधर्मतामूलकत्वेन स्वीकार एव समुचितः, तत्रापि क्रमिकत्वं नापे-क्ष्यते नैयायिकवत्, एवं दृष्ट्या उदाहरणस्य हेतोश्च अथवा उपनयस्य प्राकरान्तरेण स्वीकारेऽपि प्रतिज्ञास्वरूपस्य पक्षप्रयोगस्य निरर्थकत्वेन एवं निगमनस्य पिष्टपेषणतुल्यत्वेन च सर्वथैवानङ्गीका-रात् ।

तेषामिदं कथनमपि समीचीनमेव प्रतिभाति यद् हेतोरुदाहरणस्य वा प्रयोगकाले श्रोतुः पक्षज्ञानस्य स्वयं जायमानत्वेन प्रतिमास्वरूपस्य पक्षज्ञानस्य अनावश्यकत्वेन अवयवत्वं नाङ्गीक्रियताम् ।

जैनविद्वांसोऽनुमानसम्पत्तये प्रतिज्ञाहेत्वोरेवाऽऽवायकतां व्याहरन्ति । यथा बौद्धविद्वांसः पक्ष-प्रय-ोगं प्रतिमास्वरूपमनावश्यकं मन्यन्ते तथैव इमे जैनतार्किका अप्युदाहरणस्य सर्वथेवानावश्यकतां प्रतिपादयन्ति । एतेषां नये एकविधमेव साधनं भवति तच्चाविनाभावभूतम् । अनेनैव अविनाभावभूतेन साधनेन पक्षे साध्यसिद्धिर्जायते, विपक्षे बाधकप्रमाणसत्त्वाद् व्याप्तिनिश्चयोऽपि भवत्येव । अतो व्याप्तिनिश्चयार्थमुदाहरणोपादानं सर्वथा अनावश्यकमेव प्रतिभाति ।

अन्यश्च-

दृष्टान्तस्तु (उदाहरणन्तु) कश्चिदेक एव व्यक्तिविशेषो भवितुर्महति, व्याप्तिश्च सर्वोपसंहा-रकत्वेन सामान्यरूपैव भविष्यति । एकैव हि सा व्याप्तिः सकलधूमसाधारिणी । अतो यदि अस्मिन्

महानसादिरूपे दृष्टान्ते कदाचित् कश्चिद् विवादः समुत्पद्यते तदा तन्निवृत्त्यर्थमुदाहरणान्तरमावश्यकं स्यात्, एवं पुनस्तस्मिन्नप्युदाहरणे काचित् शङ्का जायेत तदा तनिवृत्त्यर्थमुदाहरणान्तरमपेक्षित भविष्यति इत्येवं क्रमेणानवस्थादोषः सुस्पष्ट एवेति विभावयन्तु ।

एकावयववादः

दार्शनिके जगति अवयवप्रयोगकाले केवलमेक एवावयवः सर्वप्रार्थम्येन स्वीकृतो धर्मकीर्तिना । एतस्य एकावयवप्रयोगस्य व्यवस्था धर्मकीर्तिना विशिष्टाधिकारिणां विदुषामेव कृता । परन्तु तेषाम्-ेकमात्रहेतुप्रयोगे उदाहरणमपि समाविष्टं भवति, अतस्तेषामयं हेतुप्रयोगो नोदाहरणशून्यः, एतदर्थम्-ायं हेतुस्वरूपोऽवयवप्रयोगोऽवयवद्वयस्य संयुक्तमेकं रूपान्तरमस्तीत्यत्र नास्ति कश्चिल्लेशतोऽपि सन्देहानध्यवसायावसरः ।

अवयवनियमविमर्शः

तदेवं निरुक्तेऽवयवनियमे बह्वस्वरसं प्रकटयन्त्यनियमविदः । तथाहि— उक्तेऽवयवनियमे किं मानम् ? न च व्याप्तिविशिष्टलिङ्गपरामर्शस्यानुमितिजनकत्वेन यावता तादृशधीस्तावताऽकाङ्क्षा-क्रम्-ेणावयवानामप्रयोगे न्यूनत्वाऽऽपत्तिः । ततश्च साध्यानुपस्थितिदशायां हेत्वाकाङ्क्षानुदयात् तदुपस्थित्यर्थमवश्यं प्रतिज्ञाप्रयोगः । तदुपस्थिते च साध्ये प्रमाणापेक्षायां तच्छामको हेतुरिति धूम्-ादिति तदुपन्यासः । ततोऽस्य सामर्थ्यजिज्ञासायां परामर्विशेषणीभूतव्याप्तेः प्रथममुपस्थाप-नार्थम्-ुदाहरणम् । विशेष्यभूतपक्षधर्मतार्थमुपनयोपयोगः । ततो विशकलितानामनुमितिजनकत्वा-योगात् सर्वस्याप्येकबुद्ध्युपारोहाय निगमनमित्याकाङ्क्षाक्रमेणावयावानां प्रयोगान्न वैय्यर्थ्यमिति वाच्यम् ।

यतो हि—

स्यादेतदेवं यदि परप्रतिज्ञापनार्थमुज्यमानं वाक्यमाप्तवाक्यतया बोधकं स्यात् । न चैतदेवम् । वाक्यप्रयोक्तुरनाप्तत्वेनानाश्वासप्रसङ्गात् । यद्याश्वासस्तर्हि प्रतिज्ञामात्रेणाप्याकाङ्क्षाशान्तेः । इतरथा दशावयवानामप्यबोधकत्वापत्तेः । अपि तु गृहीतव्याप्त्यादिकं पुरुषं प्रति व्याप्त्यादिस्मारकतत्वेन, अगृहीतव्याप्त्यादिकं प्रति तज्जिज्ञासाजनकत्वेनोपयुज्यते । ततश्च न्यायनयानुसारं व्याप्ति-पक्षधर्मता-भ्यां वाऽनियमवादानुमतव्याप्तिसमुचितदेशवृत्तित्वाभ्यां वा यावता तत्स्मृतिः तावदेव प्रयोक्तव्यम् । अन्यथाऽन्वितोपयुक्तापुनरुक्तकृतकार्यप्रयोगात्मकाधिक्यमुद्भाव्येत ।

अनियमवादेऽवयवप्रयोगप्रकारः

नन्वेवं तर्हि कथमवयवप्रयोगोऽभिमतः भवतामिति चेदेवम् -

१. 'पर्वतोऽग्निमान्धूमवत्वान्महानसवत्' इति प्रतिज्ञाहेतूदाहरणैकदेशदृष्टान्तवचनमात्रेण तद्बोधः । न चेत् कथं व्याप्तिस्मृतिरिति वाच्यम् । अनुमानमुद्राभिज्ञस्य व्याप्तिग्रहणस्थले सूचिते तत्स्म-ारणमक्षतमेव । न च व्याप्तिबोधकपदाभावात्कथं तद्बोधः । इतरथा घटभिन्नोनापि पदेन तद्बोधापात इति शङ्क्यम् । भवदुक्तेऽपि यो यो धूमवानित्यादावपि तत्पदाभावोनाशङ्कायास्तुल्य-त्वात् । तत्र तद्बोधाङ्गीकारेऽत्रापि तत्साम्यात् । नापि प्रतिज्ञापदं व्यर्थम् । स्वपक्षं साधयेत्यनुयोगे एव यत्र प्रवृत्तिस्तत्र सपक्षभूतसाध्योपस्थित्यर्थं प्रतिज्ञाया आवश्यकत्वात् ।

२. 'अग्निव्याप्तधूमवत्पर्वतोऽग्निमान्' इति हेतुगर्भप्रतिज्ञामात्रेण वा तदवगमः । लोके शास्त्रे च हेतुगर्भप्रतिज्ञाप्रयोगेण व्युत्पन्नस्य धूमवत्वस्य हेतुत्वज्ञापनात् ।

३. 'अग्निव्याप्तधूमवत्वात्' इति हेतुमात्रेण वा तत्सिद्धिः । न च पक्षासिद्धिः । विवादेनैव प्रतिज्ञासिद्धौ कुतस्तदग्निमानिति प्रश्ने सत्यथवा पर्वतस्याग्निमत्वे किं प्रमाणमिति प्रश्ने सत्यस्य प्रय-ोगस्याभिमतत्वात् । समयबन्धादिना प्रतिज्ञाव्यवहितत्वात्कथं पक्षोपस्थितिरित्यनाशङ्क्यम् । तदुव-रभाविप्रश्नेन तदुपस्थितेरुक्तत्वात् ।

नन्वेवमपि हेत्वाकङ्क्षाशामकेन हेतुना धूमादिति भवितव्यमिति न केनापि प्रकारेण पक्षधर्मताया अलाभ इति चेत्तर्हि तवापि कथं पक्षधर्मता । उपनयेन तल्लाभे मामापि हेतुनैव तल्लाभः । न च बोधकाभावः । पक्षस्य साध्यवत्वे शङ्किते तच्छामकहेतुनावश्यं पक्षसम्बन्धिन एवं तस्य बोधात् । तत एवोपनयोऽप्यधिकः ।

४. 'धूमवन्महानसवत्पर्वतोग्निमान्' इति सप्रतिज्ञाहेतुगर्भदृष्टान्तवचनमात्रेण वा तन्निरूपणम् । न चात्र व्याप्तिपक्षधर्मतानिरूपणोपायाभावः । महानसवदित्यनेन व्याप्तिग्रहस्थलप्रदर्शनेन व्याप्तेः तद्विशषणीभूतेन च धूमवदित्यनेन पक्षधर्मतायाश्च प्रतीतेः ।

५. 'अग्निव्याप्तधूमवान्पर्वतः' इत्युपनयेन वा बोधः ।

६. 'व्याप्तिमद्धूमवत्वात्पर्वतोऽग्निमान्' इति केवलनिगमनेन वा ।।

यद्वा धूमवत्वात् इत्येव हेतुः । नापि तत्र व्याप्त्याद्यपेक्षा । तथैवावयवान्तरेऽपि वह्निमान् इत्येव । न चैवं न्यूनतापत्तिः । धूमवत्वादिति वादिनः प्रथमकक्षा, कथमत्र व्याप्तिरिति द्वितीयकक्षा, यो यो धूमवानिति व्याप्त्यभिधानवादिनस्तृतीयकक्षा, व्याप्तस्य कथं समुचितदेशवृत्तित्वमिति चतुर्थी,

वह्निव्याप्तधूमः पर्वतेऽस्तीत्युपनयवादिनः पञ्चमी कक्षेत्येवंरूपेण कथाप्रवृत्तेः प्रतिवादिन आकाङ्क्षाक्रम्-
ोण व्याप्त्यादेस्तृतीयकक्ष्यासूक्तिसम्भवात् ।

शङ्कानिरासार्थमवयवनियमाक्षेपनिरासः

नन्वावश्यक एवावयवनियमः । तथाहि-

प्रतिज्ञाप्रयोगेण पक्षे वह्निरूपप्रमेये उपस्थिते तत्र तन्निश्चयार्थं हेतुवाक्येन लिङ्गे प्रमाणतयाभिहिते यावल्लिङ्गं विरोधानैकान्तिकानध्यवसितासिद्धि-सिद्दसादनता-बाध-सत्प्रतिपक्षात्मकनिखिलदोष-पङ्कनिमग्नं तावन्न कस्यचिदर्थस्य बोधकमिति स्थिते तद्दोषमूलोत्पाटनायोदाहरणादयोऽपेक्षिताः । तत्रोदाहरणेन व्याप्तौ सिद्धायां तत्सम्बन्धिनां विरोधानैकान्तिकानध्यवसितादोषाण-ां निरासः । उपनयेन पक्षे लिङ्गवृत्तित्वसिद्धेः तदवृत्तित्वप्रयोज्यासिद्धेर्निरासः । निगमनस्य खलु सिद्धे सत्यारभ्यमाणत्वेन नियमार्थत्वात्तस्मादेव नान्यस्मादिति नियमे च सिद्धे तादृशहेत्वनुवादेन सिद्धसाधनतापरिहारः, अन्यनिमित्तसिद्ध्यभावस्य नियमफलत्वात् । अग्निमानेनव न त्वनग्निक इति साध्यनियमानुवादेन च तदभावप्रतिपादकप्रबलप्रमाणविरोधप्रयुक्तबाधस्य, तदभावप्रतिपादक-सम्-ाबलप्रमाणविरोधप्रयुक्तसत्प्रतिपक्षस्य च निरासः सुशक एव । तदेवं पञ्चावयवनियमस्य नितरामुपय-ोगाद्धेतुदोषनिरासे तत्कथमुच्यतेऽयमनुपयुक्तो नियम इतीति चेत् ।

तदतीव मन्दम् । यद्यादावेव सकलशङ्कानिरासस्तर्हि तस्यैव कथापरपर्यायस्य परार्थानुमानापाता-त्तच्छङ्कानिरासकस्य कृत्स्नस्यापि कथायाः परार्थानुमानतापातः । ननु हेत्वाभासादिदोषदुष्टतारूपावा-न्तरशङ्का पञ्चावयवप्रायोगमात्रेणापि निरस्यत इति तावदेवैकं महावाक्यमित्युच्यत इति चेत् तर्हि पर्वतो वह्निमान्न वेत्यादिशङ्कानिवर्तकत्वं प्रतिज्ञादीनामप्यस्तीति तेषामपि प्रत्येकं महावाक्यत्वं स्यात् ।

किञ्च च युगपत्पञ्चावयवप्रयोगेऽपि त्वदभिमतोपनयनिगमनयोरेव प्रत्येकं व्याप्त्याद्यभिधाने शक्तत्वेन नावयवान्तराणामुपयोगः । तस्मान्नवयवान्तराणामुपयोगः ।। उदाहरणदिनियमानपेक्षणम् ।

एवमेवोहरणेऽपि यो यो धूमवानसावग्निमानिति पूर्वभागस्य यथा महानस इत्युत्तरभागस्य वा व्याप्त्युपस्थापकत्वेनान्यतरभागस्य वैय्यर्थ्यम् । अत एव तत्प्रयोगेऽप्याधिक्यं स्यात् ।

नापि तत्र यत्तत्छब्दयोर्विप्स्यावसरः । न च वीप्साभावे व्याप्त्यन्तर्गतं साकल्यं न बुध्येतेति वाच्यम् । 'गौर्न पदा स्पृष्टव्या' इत्यादिषु वीप्साभावेऽपि सर्वोपसंहारय सिद्धेरत्रापि तत्सम्भवात् ।

ननु तर्हि 'यद्यत्पापं प्रतिजहि जगन्नथ तन्मे' इत्यादौ कथं वीप्साप्रयोग इति चेत्तत्र स्पष्टार्थत्वात् । तस्य च विवक्षाधीनत्वान्नियमशरीराप्रवेशणात् । अत एव 'विमतो भिन्नो मुक्तत्वाद्यदित्थं तत्तथा'१० इत्यार्षप्रयोगोप्युपपन्नः ।

उपनयोऽपि हेतुवचनेन गतार्थः । साध्यव्याप्तहेतुमांश्चायमिति त्वदभिमते उपनये व्याप्त्यंशस्योदाहरणसिद्धत्वेन तदुक्तिवैय्यर्थ्यं च ।

निगमनमपि प्रतिज्ञया चरितार्थम् । न चोपसंहारप्रयोजनकं तत् । बहुव्यवधानेन तदनपेक्षणात् । नापि बाधादिनिरासकत्वेन शक्यसमाधानः । उदाहरणादिसिद्धव्याप्त्यादिनैव तत्सिद्धेः ।

अपि च पञ्चावयवनियमस्तावद्विप्रतिपन्नं प्रत्यनुमानेनैव । साध्यः । तत्र पञ्चावयवानुम्-ानेन तत्साधने त्र्यवयवादिनां मतानुसारमाधिक्यम् । तत्परिहाराश्च पुनः पञ्चावयवैरेव क्रियत इत्युक्तावनवस्था स्यात् । तदक्तं—

'त्रिपञ्चावयवामेव युग्मावयविनीमपि ।

नियमाद्योनुमां ब्रूयात्तं ब्रूयाद्यपि तादृषीम् ।।'११ इत्यादिना ।।

तदेवमनियमवादिभिराचार्यैः सर्वथा तन्नियमः निराकृत इत्यलं पल्लवितेन ।

।। श्रीकृष्णार्पणमस्तु ।।

*****

ग्रंथ सूचि :

१. अनुमितिकरणमनुमानम् - तर्कसङ्ग्रहः ।

२. वात्स्यायनः

३. लौगाक्षिभास्करः

४. रुचिदत्तः

५. प्रशस्तपादभाष्यम् -अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः ।

६. माठरवृत्तिः - पञ्चावयवमित्यपरे

७. माठराचार्यः

८. धर्मराजाध्वरीन्द्र

९. अवश्योपादेयानामन्यतमानुपादानं न्यूनम् - प्रमाणपद्धतिः ।

१०. तत्वोद्योतप्रकरणम्

११. श्रीमन्न्यायसुधा

******

# पदशक्तिस्वरूपविचारः

-विद्वान् विनयकुमारः

फोन्-७९७५३७७३८२,

E.mail : vinaykumardesai1008@gmail.com

उपोद्घातः

विदितमेवैतत् तत्र भवतां भवतां यत् सर्वं हि वक्तव्यं श्रोतव्यं च शब्दाधीनमेवेति । स्वविचारान् व्यक्त्यन्तरं प्रति प्रेषयितुं लघुतमं किञ्चन वस्तु अपेक्षते तदस्ति 'शब्दः' । मन्दोऽपि स्वभावान् व्यञ्जयितुं शब्दम् आश्रयत्येव । शब्दरूपप्रमाणाभावे न लौकिकव्यवहारः नापि वैदिकव्यवहारः उपपद्यते । न च धर्माधर्मादिव्यवस्थाऽपि भवति । किं बहुना ? सकलजीवराशिः अन्ध इव निरूद्धनिखिललोकव्यवहारः स्यादिति कविशिरोमणिना दण्डिना काव्यदर्शे उद्घोषितम्-

'इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।

यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते ।।

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।

वाचामेव प्रसादेन लोकयात्रा प्रवर्तत ।।' इति । (काव्यादर्शः १.३-४)

भुवनेऽस्मिन् न केवलं परस्परव्यवहारायैव शब्दज्ञानम् आवश्यकमस्त्यपि तु स्वान्तरिकभावानाम् अभिव्यक्त्यर्थमपि इदं ज्ञानम् अत्यवश्यकं दरीदृश्यते । अत एव भर्तृहरिणा वाक्यपदीये उक्तम्-[- 'अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्' इति । शब्दस्य महत्त्वं प्रतिपादयन् न्यायसूत्रकारः गौतमः भणति यत् 'आप्तोपदेशः शब्दः' इति । शब्दस्य परिभाषा महाभाष्यकारेण एवं प्रतिपादिता यत्- येनोच्चारितेन सास्ना-लाङ्गूल-ककुद-खुर-विषाणिनां सम्प्रत्ययो भवति स शब्दः । अथवा 'प्रतीपदार्थको लोके ध्वनिः शब्दः' इत्युच्यते ।

लौकिकाः जनाः अर्थमनुसृत्य शब्दान् प्रयुञ्जते । वैदिकानामृषीणां च वाचमनुसृत्यार्था वाचि उपतिष्ठन्त इत्ययं लौकिकवैदिकशब्दयोर्व्यत्यासः उत्तररामचरितकृता भवभूतिना उपवर्णितः ।

'लौकिकानां हि साधूनामर्थं वागनुवर्तते ।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।। (उ.रा.चरितम्.१.१०)

'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।।' इति । (त्रि.ता.उ.४.१७, मैत्रा.३.६-२२)

शब्द एव वागिति वेदेषूच्यते । 'वागर्थाविव सम्पृक्तौ' (१.१) इति रघुवंशे कालिदासोऽपि शब्दमेव वाचमिति व्यवाहरत् । तत्र शब्दर्थथोः सम्बन्धरूपा वृत्तिः यस्या अनवगतौ न शाब्दबोधः शक्यसम्भवः तादृशी शाब्दबोधसामग्र्यां प्रधानभूता वृत्तिः अस्य प्रबन्धस्य विषयः । नैकसिद्धान्तर-ीत्या अस्या स्वरूपलक्षण - प्रभेदविचिन्तनमत्र विधीयते ।

वृत्तिः

शब्दजन्यबोधं प्रति न शब्दज्ञानमात्रं कारणम्, किन्तु शब्दनिष्ठवृत्तिज्ञानमपि शब्दजन्यं बोधं प्रति कारणमिति सर्वतन्त्रसिद्धम् । यतो हि न हि शब्दश्रवणमात्रेण बोधः भवति । किन्तु तादृशेनैव शब्देन बोधः जायते यस्य वृत्तिं जानाति श्रोता । अतः शाब्दबोधे कारणीभूतः वृत्तिपदार्थः कः इति जिज्ञासा । तत्रोच्यते पदस्य अर्थेन सह सः बोधानुकूलः सम्बन्धः भवति स एव वृत्तिरिति कथ्यते । यैव हि लोकव्यवहारं नियमयति । वर्तते - शब्दः अर्थे प्रवर्तते अनयो इति वृत्तिः । वर्तमानार्थकाद् वृतुधातोः करणे क्तिन्प्रत्यये सति रूपमिदम् । तथा च स्वीयार्थे शब्दप्रवृत्तिकारणं वृत्तिरित्युक्तं भवति । किं तत् कारणम् ? पदपदार्थयोः सम्बन्ध एव । तथा च अयमत्र बोधक्रमः । प्रथम्-ां पदं श्रूयते । ततश्च ज्ञातसम्बन्धस्य पुरुषस्य सामान्यतः इतरान्वितस्य पदार्थस्य स्मरणं भवति । एकसम्बन्धिज्ञानम् अपरसम्बन्धिनं स्मारयति । कथमन्यथा हस्तिनि दृष्टे, हस्तिपकस्य स्मरणम् ? एवं च शब्दार्थयोः सम्बन्धरूपा वृत्तिः शब्दबोधे प्रधानं पात्रं वहति । इयं च वृत्तिः शक्तिलक्षण-ाान्यतररूपः सम्बन्ध इति नव्यनैयायिकाः । परम्, मतमेतत् खण्डयन्तः व्यासतीर्थाः 'वृत्तिश्च शब्दस्य तात्पर्यरूपम् अर्थप्रतिपादकत्वम्' इति जगुः ।

दार्शनिकप्रपञ्चेषु शब्दः किं कथं च बोधयति इत्यत्र अस्ति महान् विवादः ।

बौद्धाः शब्दानां अर्थासंस्पर्शित्वात् जात्यादीनां च शब्दार्थत्वानुपपत्तेः शब्दार्थयोः सम्बन्धस्य दुर्वचत्वात् वाक्यानां अर्थप्रत्यायकत्वासमर्थनाच्च शब्दः न प्रमाणमिति वदन्ति ।

वैशेषिकास्तु शब्दप्रामाण्यमभ्युपगच्छन्तोऽपि न तस्य अनुमानापेक्षया अतिरिकत्वं मन्यन्ते ।

शब्दस्य प्रामाण्यमङ्गीकुर्वन्तोऽपि मीमांसकाः अपूर्वार्थबोधकः एव सः प्रमाणमिति उद्घोषयन्तोऽपि शब्दसमुदायरूपवाक्यस्य नियोगः अर्थः उत भावना इत्यत्र विवदन्ते ।

शब्दप्रामाण्ये एव दीक्षावन्तः शब्दब्रह्मवादिनो वैयाकरणाः तत्तत्पदाभिव्यक्तैः पदस्फोटादिभिः अर्थः अवबुध्यते इति वदन्ति । अतः तेषां मतेऽपि न साक्षादर्थबोधः ।

परन्तु नैयायिकास्तु सर्वमेतन्निराकृत्य विलक्षणां रीतिम् आतिष्ठन्ते । तेषां मते सर्वोऽपि शब्दः, 'एकसम्बन्धिज्ञानम् अपरसम्बन्धिस्मारकविधया अर्थावबोधकः ।' एवं च शब्दश्रवणेन वृत्त्या अर्थस्य स्मृतिः जायते । तदनन्तरं शाब्दोधः इति तेषां सिद्धान्तः । तदुक्तं किरणावल्यां 'पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः' इति । तत्र पदपदार्थयोः सम्बन्धः वृत्तिशब्दवाच्यः मुख्यगौणभेदेन द्विविधः । तत्र मुख्यवृत्तेः शक्तिः इति गौणीवृत्तेः लक्षणा इति च व्यपदेशः । तत्र शक्तिस्तु अस्मात् शब्दात् अयमर्थो बोद्धव्यः इति ईश्वरेच्छैव । अथवा अर्थप्रकारकशब्दविशेष्यकरूपा 'इदम् अर्थं बोधायतु' इत्याकारिका ।

तत्र पदानां शक्तिः कुत्र इति विषये नैयायिकानां 'जात्याकृतिव्यक्तयः पदार्थः' इति सूत्रमेव प्रमाणम् । एतत्सूत्रगत-व्यावर्तक-तुशब्दानुसारेण (जात्याकृतिव्यक्तिषु) त्रिष्वपि एकैव शक्तिः इति वदन्ति । उदाः —

गां मुञ्च, गां बधान इत्यादौ गोपदोपस्थितव्यक्तेः प्राधान्यम् ।

'गौः न पदा स्पृष्टव्या' इत्यत्र जातिः मुख्या ।

'पिष्टकमयी गौः' इत्यत्र आकृतेः मुख्यत्वम् । इति प्राचीननैय्यायिकाः भणन्ति । परन्तु नवीननैय्यायिकास्तु जात्याकृतिविशिष्टव्यक्तौ पदशक्तिं स्वीकुर्वन्ति । तत्रापि जाति-तद्वैशिष्ट्य-तदाश्रयेषु एका शक्तिः । आकृतौ पृथक् शक्तिः इति तेषां मतम् ।

अत्र व्यक्तिशक्तिवादिनां मते केचन दोषाः सन्ति । व्यक्तिमात्रे शक्तिरुच्यते चेत् - व्यक्त्यानन्त्यात् शक्त्यानन्त्यापत्तिः । एवं जात्युपलक्षिते शक्तिः इत्युक्तेऽपि स एव दोषः । न च उपलक्षणैक्यात् शक्तैक्यम् इति वाच्यम् । उपलक्षणैक्यस्य शक्त्यैक्यानियामकत्वात् यथा च हरिपदात् सूर्याश्वयोः एकत्वोपलक्षितयोः शक्तिग्रहेऽपि शक्यतावच्छेदकस्य सूर्यत्वस्य च अश्वत्वस्य च परस्परं भेदात् उभयोः शक्तिः भिद्यते एव । तथा प्रकृतेऽपि व्यक्तिभेदात् शक्तिभेदः सम्भवत्येव । जातिविशिष्टे शक्तिः इत्यत्रापि शक्तिव्यक्तिसम्बन्धानाम् अनन्तत्वात् शक्त्यानन्त्यापत्तिः । अत्र नैय्यायिकानां समाधानन्तु जात्याकृतिविशिष्टायामेव शक्तिरित्युच्यते । न तु व्यक्तिमात्रे ।

अपि च जात्युपलक्षिते शक्तिरित्यत्र यः दोषः उक्तः सोऽपि नास्ति । यतः जात्याकृत्योः उपलक्षण-

ात्वं न स्वीकृतम् । वस्तुतस्तु उपलक्षणैक्येन शक्त्यैक्यं वक्तुं शक्यते । तदादिपदस्थले उपलक्षणीभूत वक्तृबुद्धिविषयतावच्छेदकस्य ऐक्यात् शक्तैक्यम् उच्यते । परन्तु नैय्यायिकैः द्रव्यादिपदात् अभ्रान्तस्य घटत्वप्रकारकबोधवारणाय घटत्वोपलक्षिते घटे शक्तिः न स्वीक्रियते । अपि च जात्यादिविशिष्टे शक्तिरित्युच्यते चेदपि न शक्त्यानन्त्यापत्तिः । ईश्वरेच्छारूपायाः शक्तेः एकत्वाङ्गीकारात् । अत्र शक्त्यैक्यं च तत्पदजन्यबोधीय-विषयत्वनिष्ठप्रकारतानिरूपित विशेष्यत्वरूपम् । तस्य च एकत्वात् शक्त्यैक्यव्वहारः । तथा च घटत्वनिष्ठघटविषयक-बोधीयविषयतायाः एकत्वात् तादृशविषयताश-ालिसङ्केतरूपशक्तेः एकत्वव्यवहारः । सा च शक्तिः व्याकरणादिप्रमाणेन ज्ञायते इति नैयायिकरीतिः ।

द्वैतवेदान्तरीत्या वृत्तिः -

अस्माकम् अनुभवानुसारेण शब्दार्थयोः औत्पत्तिकः (स्वाभाविकः) कश्चन सम्बन्धः द्वैतवेदान्ते अङ्गीक्रियते । अनुव्याख्याने -

'नित्ययोगोऽपि शब्दानाम् अर्थैर्नैव निषिध्यते' इत्युक्तम् आचार्यैः ।

सिद्धान्तेऽस्मिन् न्यायसिद्धान्तोक्त-इच्छायाः एव शक्तित्वं न स्वीक्रीयते । भिन्नाश्च भिन्नधर्माश्च पदार्थाः निखिला अपि इत्युक्तरीत्या अनुगतजात्यनङ्गीकारात् व्यक्तावेव शक्तिरित्यङ्गीक्रीयते ।

श्रीमदानन्दतीर्थैः एवम् अनुव्याख्याने प्रतिपादितम् । शब्दास्तावत् शक्त्यपेक्षया अर्थगमकाः, प्राथमिकी शक्तिश्च वृद्धव्यवहारात् । स च व्यवहारः अन्विते एव । अतः पदानां योग्येतरान्विते एव शक्तिरित्यङ्गीकरणीयम् । अर्थात् पदार्थान्तरान्वितेन पदार्थेनैव अर्थबोधपुरस्सरं व्यवहारः युच्यते । न हि गौरिति गोशब्दप्रयोगमात्रेण व्युत्पित्सोः ज्ञानं भवति । किन्तु आनय, बधान इत्यादिप्रय-ोगे क्रियाद्यन्वितेनैव गोशब्देन व्युत्पित्सोः ज्ञानं भवति । ततश्च पदानां योग्येतरान्वित-स्वा-र्थाभिधायकत्वम् अनुभवसिद्धत्वात् अङ्गीकृतमस्मिन्मते । उक्तं च आनन्दतीर्थभगवत्पादैः, अनु० यारव्याने- 'शक्तिश्चैवान्विते स्वार्थे शब्दानाम् अनुभूयते' इति विवृतं च एतत्, श्रीमन्न्यायसुधायां श्रीमज्जयतीर्थश्रीचरणैः ।

उपसंहारः -

विषयोऽस्ति विशालः । तथापि यथामति अनेन प्रबन्धेन परिचयप्रयत्न एव कृतो मया । गुण-ैकपक्षपातिनः विद्वांसः तान् दोषान् हंसक्षीरन्यायेन गृह्णन्तु इति सम्प्रार्थये ।

*****

ह्श्र ण्ड्ड :

१. काव्यादर्शः - रचयिता - आचाय दण्डी, प्रसादिनी हिन्दी व्याख्यानसहित- सम्मपादकः - शिवनारायणशास्त्री, २००८

२. उत्तररामचरितम् - रचयिता - भवभूति, सम्पादकः - डा. मुरलीलाल् अग्रवाल्, प्रकाशनसंस्था - भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिटय़ूट्, पुणे, १९९८

३. ऋग्वेदसंहिता - सम्मपादकः- के.एस्. अर्जुन, प्रकाशनसंस्था-चौखण्म्बा संस्कृतप्रकाशनम्, दिल्ली, २०१०

४. अनुव्याख्यानम् - रचयिता - श्रीमदानन्दतीर्थः, सम्पादकः - पि.एस्.शेषगिरि आचार्यः, प्रकाशनसंस्था - तत्त्वसंशोधनसंसत्, उडुपि ।

५. श्रीमन्न्यायसुधा - रचयिता - श्रीमज्जयतीर्थः, सम्मपादकः - श्रीहरिदास्भट्ट्, प्रकाशनम्- पूर्णप्रज्ञविद्यापीठम्, बेङ्गळूरु, २०१०

# अपुत्रस्य गतिर्नास्ति

- डा. रङ्गनाथकट्टि
निदेशकः (प्रभारी),
पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु

'अपुत्रस्य गतिर्नास्ति' इति गरुडपुराणसारेद्धारे तत्र तत्र श्रूयते । तदाऽस्माकं मानसगर्भात् संशयशिशुः समुदेति । तर्हि पुत्रहीनानां का गतिः ? इति । अपि च पुत्रवन्तः सर्वेऽपि सद्गतिं यान्ति वा ? विषयेऽस्मिन् अपि अस्माकं दृष्टिः प्रसारणीया भवति । गरुडपुराणसारोद्धाररीत्या ये पुत्रवन्तः ते सर्वेऽपि सद्गतिं न यान्ति । किन्तु येषां धार्मिकाः पुत्राः ते एव सद्गतिं यान्ति । यतो हि धार्मिकाः पुत्रा एव मृतं पितरं मातरं चोद्दिश्य धर्मशास्त्रोक्तरीत्या और्ध्वदेहिकक्रियां सर्वां कुर्वन्ति । पितृसद्ग-त्यर्थं उक्तमुत्तम-मध्यम-मलिन-षोडश-श्राद्धादिकं कुर्वन्ति । नानाविधदानादिकं 'सपिण्डीकरणं च कुर्वन्ति । अतः येषां धार्मिकपुत्रा त एव सद्गतिं यान्ति नान्ये इति ज्ञायते ।

पुत्रवन्तः के ?

अपि च 'पुत्रवन्तः' इति के कथ्यन्ते ? एकस्मात् पितुर्जातेषु सोदरेषु यः कश्चित् पुत्रवान् चेत्, अन्ये पुत्रहीना अपि पुत्रवन्त एव ते सर्वे कथ्यन्ते इति मनुमहाशयेन उक्तम् । तथा हि- गरुडपुराण-सारोद्धारे-

भ्रातॄणामेकजातानामेकश्चेत् पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्१ ।। १९ ।।
पत्न्यश्च बह्व्य एकस्य चैका पुत्रवती भवेत् ।
सर्वास्ता पुत्रवत्यः स्युः तेनैकेन सुतेन हि२ ।। इति ।

तस्मात् पुत्रहीना अपि स्वीयसोदरपुत्रकृतश्राद्धादिभिः सद्गतिं यान्तीति सिध्यति ।

अपि च महाभारततात्पर्यनिर्णये - किन्दममुनिशापेन स्त्रीसङ्गमसुखेन वञ्चितः पाण्डुः सपत्नीकः तपः कुर्वन् आसीत् । कदाचित् स मुनीनां पुरतः सपत्नीकोऽहं तपः कुर्वन्नेव ब्रह्मलोकं गम्-िष्यामीति स्वीयाशां प्रकटीचकार । मुनयस्तदा तं न्यवारयन् । तेन पुत्रहीनानां ब्रह्मलोकगमने नास्त्यधिकार इति हेतोः मुनयः पाण्डुं न्यवारयन्' इति आपाततः प्रतीयते । परन्तु नैतत् प्रम्-ुखकारणम् । यतो हि कृत-त्रेता-द्वापरयुगेषु पुत्रहीनानां नियोगपद्धत्या स्वीयपत्न्यां पुत्रप्राप्त्यवकाशः

आसीत् । पाण्डुस्तावत् नियोगपद्धत्या पुत्रप्राप्त्यर्थमेव भूमौ जातोऽस्ति' । विना तत्कार्यं तस्य ब्रह्मलोकप्राप्तिर्नास्ति । अतस्तदर्थमेव मुनयस्तं न्यवारयन् न तु पुत्रहीनत्वनिमित्ततः । उक्तं चैतत् म.भा.ता.निर्णये श्रीमध्वाचार्यैः-

'तदा मुनीन्द्रसंयुतः सदो विधातुरुत्तमम् ।
स पाण्डुराप्तुमैच्छत् न्यवारयंश्च ते तदा ।।
यदर्थमेष जायते पुमान् हि तस्य सोऽकृतेः ।
शुभां गतिं न तु व्रजेद् ध्रुवं ततो न्यवारयन् ।।
प्रधानदेवताजने नियोक्तुमात्मनः प्रियाम् ।
बभूव पाण्डुरेव तद् विना न तस्य सद्गतिः ।।'३ इति

यद्यपि, मा भूत् साक्षात् पुत्रोत्पादनम्, मा च भूत् नियोगद्वारा, वा पुत्रोत्पादनम् । तथाऽपि इतरपुण्यकार्यैरेव सद्गतिः प्राप्तुं शक्यते । विषयेऽस्मिन् निदर्शनम् - सन्ध्यावलीपुत्रः धर्माङ्गदः । विदिशानगरस्य नृपतेः रुक्माङ्गदस्य पुत्रः — राजा धर्माङ्गदः । तस्य माता सन्ध्यावली । रुक्म-ाङ्गदस्य एकादशीव्रते महती निष्ठाऽऽसीत् । तस्य राज्ये सर्वेऽपि जना एकादश्युपवासं कुर्वन्ति स्म । तेन नरकं प्रति केऽपि नागुः । यमपत्तनं रिक्तं समजनि ।

तदा ब्रह्मा मोहिनीं प्रेषयामास राजानं प्रति । दृष्ट्वा तां राजा यदा कामयाञ्चक्रे तदा साऽवादीत् एकादशीव्रतं वा त्यज स्वसुतशिरो वा छित्वा दिश' इति । तस्मिन्नवसरे धर्माङ्गदः स्वपितरं प्रतिवदति । 'एकादशीं' सभार्यस्त्वं न त्यज' अहं च न त्यजामि । मम शिर एव छित्वा तस्यै देहि इति । तदनु रुक्माङ्गदः स्वपुत्रस्य शिरश्छेतुं प्रावर्तत । तदा तस्य व्रतनिष्ठया हरिः प्रत्यक्षोऽभूत् । पश्चात् प्रसन्नहरिणाऽऽदिष्टविमानस्थः सन् मातापितृभ्यां सह धर्माङ्गदः सद्गतिं (वैकुण्ठम्)जगाम । इति स्कान्दपुराणे काचन कथा श्रूयते । यद्यपि धर्माङ्गदः साक्षात् सन्तानं न प्राप्तवान् । न वा पाण्डुवत् सन्तानार्थं नियोगं च नाऽश्रितवान् । तथाऽपि एकादशीव्रतनिष्ठयैव वैकुण्ठमाप । अनेन ज्ञायते- अपुत्रा अपि धार्मिकव्रतनिष्ठयैव सद्गतिं लभन्त इति । तथा चोक्तं महाभारततात्पर्यनिर्णये श्रीमन्मध्वचार्यैः-

'अतोऽन्यथा सुतान् ऋते व्रजन्ति सद्गतिं नराः ।
यथैव धर्मभूषणो जगाम सन्ध्यकासुतः ।।'४ इति ।

किञ्च, भागवते चतुर्थस्कन्धे चतुर्थाध्याये अङ्गराजकथाप्रसङ्गे- 'अङ्गराजेनाश्वमेधाख्यो याग-ोऽनुष्ठितः । तस्मिन् यागे हविर्भागान् स्वीकर्तुं देवा नाऽययुः । तेनेदं विदितं भवति पुत्रहीनैः सत्कर्मणि अनुष्ठितेऽपि देवाः न स्वीकुर्वन्ति इति । 'नापुत्रस्य लोकोऽस्ति' इति श्रुतिरपि एतदेव स्वष्टमाचष्ट' इति भागवतस्य गिरिधरव्याख्यायामुक्तम् ।

वस्तुतस्तु -

पुत्रहीनैरप्यनुष्ठितं कर्म देवाः स्वीकुर्वन्त्येव । तेन पुत्रहीनानामपि स्वर्गप्राप्तिर्भवत्येव । तथाऽपि 'कैश्चित् अवश्यं पुत्राः प्राप्तव्याः' इति देवानामस्ति सङ्कल्पः । तादृशैः, विना पुत्रप्राप्तिं कर्मण्यनुष्ठिते तत्र हविर्भागं न स्वीकुर्वन्ति देवाः । तस्मात् तेषां लोकप्राप्तिर्नास्ति । 'नापुत्रस्य लोकोऽस्ति' इति श्रुतिरपि एतदभिप्रायका । तस्मात् सर्वैः सपुत्रैर्भाव्यमिति नास्ति नियमः । एतच्च वामनपुराणे स्पष्टं निरूपितम् ।

अनपत्योऽपि सद्धर्मा लोकजिन्नात्र संशयः ।

देवैस्तु पृथुजन्मार्थे हविरङ्गस्य नो हृतम् ।।

अनपत्यत्वकर्माऽसौ बालहत्याकृतेः पुरा ।

अतो दुष्टोऽभवत् पुत्रः दृष्टो विष्णुरतः प्रभुः५ ।। इति ।

यद्यपि विहितधर्मानुष्ठातॄणां पुत्राभावेऽपि स्वर्गादिलोकप्राप्तिरस्तीति निश्चप्रचम् । तर्हि अङ्गरा-जस्य यज्ञे देवाः हविर्भागं किमर्थं न स्वीचक्रुः ? इति चेत् - इत्थम् । 'महात्मनः पृथोः जन्म भूयात्' इति देवानां सङ्कल्प आसीत् । तदर्थं ते हविर्भागं न स्व्यकुर्वन् । यदि स्वीकुर्युस्तर्हि अङ्गराजः पुत्रकामेष्ट्यां न प्रवर्तेत । तथा च पृथोर्जन्म न स्यात् इति तेषां मनसि भावनाऽऽसीत् । कृतायाम्-ापि पुत्रकामेष्ट्यां वेनाख्यः दुष्टपुत्रः किमर्थं जात इति चेदित्थम् । अङ्गराजेन पूर्वजन्मनि बालहत्या विहिताऽऽसीत् । तस्मात् तस्य पुत्रो न जातः । कृतायामपि पुत्रकामेष्ट्यां तस्य दुष्टपुत्रोऽजनिष्ट । तावता विष्ण्वाराधनाङ्गत्वेन कृता पुत्रकामेष्टिः वृथा जातेति न मन्तव्यम् । इष्टेः प्रभावेन पृथ-ोर्जनितत्वात्, 'तथाऽपि प्राक्तनपापस्य प्रबलत्वात् प्रथमं पृथोर्जन्म नाभूत् । विलम्बः समजनि इति वामनपुराणे कथितम् ।

किञ्च पुत्र इति स उच्यते यः पुन्नामनरकात् पितरौ त्रायते । तथा चोक्तम् - 'त्राता य एव नारकात् स हि पुत्रनामा'६ । तथा च सद्गतिप्रापकः दुर्गतिनिवारक एव पुत्र इति व्यवह्रियते

लौकिकैः । एवं च कूप-तटाको-द्यानादिसत्कर्मभिरपि सद्गतेः प्राप्तुं शक्यत्वात् कूप-तटााकादयोऽपि सन्तानतुल्या एवेति ज्ञेयम् - तथा चोक्तम् -

कूपस्तटागमुद्यानं मण्डपं च प्रपा तथा ।

सद्धर्मकरणं काव्यं सन्तानं सप्तधोच्यते ।। इति ।

विषयेऽस्मिन् अन्यश्च श्लोकः -

तटागं धननिक्षेपोऽग्रहारो देवमन्दिरम् ।

वनं प्रबन्धः सत्रं च सन्तानं सप्तधोच्यते ।।७ इति ।

एवं च 'अपुत्रस्य गतिर्नास्ति' इत्यस्य सुरविरोधी असुर इति वत् पुत्रविरोधी (सत्पुत्रविरोधी) कुपुत्रोऽत्र अपुत्रशब्देन ग्राह्यः । तथा च कुपुत्रवतः सद्गतिः नास्तीति इति श्रुत्यर्थो ज्ञेयः ।।

अपुत्रस्य गतिर्नास्ति

दशरथस्य साक्षाद् भगवान् नारायण एव श्रीरामरूपेण पुत्रोऽभूत् । तथाऽपि तस्यान्त्यकाले पुत्रचतुष्टये तत् कोऽपि नाऽसीत् । पुत्रहीनस्य जटायोः ज्ञातिशून्यायाः शबर्याश्च अन्त्येष्टिं स्वयं भगवान् श्रीरामश्चकार । कुरुकुलसार्वभौमस्य धृतराष्ट्रस्य दुर्योधनादयः शतपुत्रा आसन् । तथाऽपि स एव स्वपुत्रान् उद्दिश्य तर्पणमदात् । लोके तावत्तु, पितृन् उद्दिश्य पुत्रैस्तर्पणं दातव्यम् । परन्तु अत्र तद् विपरीतमभूत् । असारे संसारे कस्य कः ? अत एवोक्तं पुरन्दरदासार्यैः कन्नडभाषायां - यारिगे यारुण्टु एरविन संसार, नीरमेलिन गुळ्ळेयन्ते । निजवल्ल हरिये' इति ।

पुत्रहीनस्य नरकप्राप्तिः सुनिश्चिता । सत्पुत्रवतस्तु पितृऋणान्मुक्तिः' इत्यस्य सन्तानहीनस्य सद्गतिर्नास्ति' इति च शास्त्राणामाशयः, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इति श्रीकृष्ण-ोक्तरीत्या स्ववर्णाश्रमविहितानुष्ठानेनैव मानवाः सद्गतिं लभन्ते'

जीवानां मोक्षप्राप्तौ पुत्राः न कारणानि भवन्ति । 'नान्यः पन्था अयनाय विद्यते' इति श्रुतौ मार्गान्तराणि निषिध्य ज्ञानस्यैव कारणत्वकथनात् । तस्मात् मुमुक्षुभिर्ज्ञानमेव सम्पादनीयं मुख्यतः' इति ज्ञायते ।

अपि च ब्रह्मसुताः नारदमहर्षयः सनक-सनन्दनादयश्च गृहस्थाश्रमं यद्यपि न स्वीचक्रुः । तथा-प्यूर्ध्वरेतसः सन्त एव सद्गतिमायुः । तथा चोक्तं भागवते -

नैते गृहान् ब्रह्मसुता .............. इति ।

न केवलमेतावत् । गङ्गापुत्रैः भीष्माचार्यैः ब्रह्मचर्यव्रतस्य प्रतिज्ञायां कृतायां, देवाः पुष्पवृष्टिं विधाय तामन्वमोदन् । भीष्माचार्यास्तु पुत्रहीना अपि ज्ञानभक्त्यादिभिरेव सद्गतिमापुः । अत। सद्गतिप्राप्तौ ज्ञानभक्त्यादयः प्रधानकारणानि भवन्ति ।

अपि च पुत्रहीनानां मित्रोऽपि पिण्डप्रदानाधिकारी भवति । गुरूणामन्त्यक्रियायां शिष्या अप्यधिकारिणो भवन्ति । पुत्रहीनान् गुरूनुद्दिश्य श्राद्धादिकं कर्तुमर्हन्ति शिष्याः ।

सर्वेषां पुत्रहीनानां मित्रः पिण्डं प्रदापयेत् ।

क्रियालोपो न कर्तव्यः सर्वाभावे पुरोहितः ।। (पद्मपुराणम् - भूमिखण्डे द्वादशाध्याय)

सत्पुत्र एव तारकः

'अपुत्रस्य गतिर्नास्ति' इत्यनेन पुत्रहीनानां सद्गतिर्यथा न भवति इत्यर्थो यथा भासते तथा सपुत्राणां सद्गतिर्भवति इत्यापाततः प्रतीयते परन्तु विचारर्यमाणे, अपुत्रा अपि केचन सद्धर्मानुष्ठाननिष्ठा सद्गतिं व्रजेयुः । सपुत्रा अपि केचन दुर्गतिं व्रजेयुः ।

इति अन्यान्यग्रन्थपरिशीलनेनावगम्यते, तथाहि - लोकेतावत् चतुर्विधाः पुत्रा वर्तन्ते- १. ऋणपुत्रः २. शत्रुपुत्रः ३. उदासीनपुत्रः ४. सत्पुत्र (सेवापुत्रः) इति । तेषु आद्यः ऋणपुत्रकः किं लक्षणम् इति पश्यामः ।

१. ऋणपुत्रः - य एकस्मिन् जन्मनि कस्यचिद् धनिकस्य सकाशाद् ऋणं गृहीत्वा, तस्म-ाद् ऋणादं अमुक्त एव सन् मरणं याति स ऋणग्रहीता आगामिनि जन्मनि पिता भवति । ऋण-ादाता तु पुत्रो भवति । अयमेव ऋणपुत्रः । तस्मिन् जन्मनि सः सदाऽतिदुष्टो कुणहीनोऽविक्रूरश्च भवति । स्वजनेषु सदा निष्ठुरभाषयेव भवति । मिष्टमेव समश्वा। मिष्टानेव भोगान् भुनक्ति । नित्यं द्यूतासक्त सन् चोरकर्मण्यप्यात्मानं योजयति । बन्धुभिर्वार्यमाणोऽपि गृहद्रव्यं विलासार्थं बलादपहरति । मातापितरौ प्रतिदिनं निन्दति । जनान् भीषयन्ति पीडयति च । मातापितरौ नानाविधैरायुधैः प्रहरति । मृते पितरि सति मातरि दौर्जन्यं प्रदर्शयति । पितृप्रीत्यर्थं श्राद्धादिकर्माणि दानानि च न करोति । एवंविधो भवति दुष्टपुत्रः (ऋणपुत्रः) ।

२. शत्रुपुत्रः- शत्रुपुत्रस्तु क्रीडमान एवं मातापितरौ ताडयति । ताडयित्वा प्रहसन् एव गच-छति । एवं बाल्ये वयस्येव स्वपितृषु शत्रुत्वं प्रदर्शयति । दुष्टात्माऽयं पूर्ववैरेण पितरं हत्वा मातरं हिंसितुमायाति ।

३. पुण्यपुत्रः- मातापित्रोः प्राक्तनपुण्येन एतादृशपुत्रो जायते । अयं बाल्य एव स्वलीलाभिः मातापितरौ सन्तोषयति । स्नेहेन प्रियालापैश्च मातापित्रोः सन्तोषं जनयति । मातापित्रोर्मरणानन्तरं तत्स्नेहेन रुदति । श्राद्धादिकर्माणि पिण्डदानादिकां क्रियां च करोति । तेषां सद्गतिर्भूयात्' इति तीर्थक्षेत्रयात्रां कराति । देवऋण-ऋषिऋण-पितृऋण इति ऋणत्रयान्वितः, तेषु स्नेहात् भोजनादिना तान् सन्तर्पयति । मातापित्रोः सुखं येन भवति तत्सर्वं करोति ।

४. उदासीनपुत्रः- यः सर्वदा उदासीनेन भावेन वर्तते स उदासीनपुत्रः । एतादृशपुत्रः कस्यापि किमपि न ददाति । कस्यचित् सकाशात् किमपि न स्वीकरोति, न कुप्यति, न च तुष्यति । सदा सर्वत्रोदासीन एवं तिष्ठति ।

******

१. ग.पु.सा.११.१५

२. ग.पु.सा. ११.१६

३. म.भा.ता.नि.१२.१५-१७

४. म.भा.ता.नि.१२.१८

५. भा.ता.उदा वामनपुराणवचनम्

६. सुमध्वविजयः - २.१७

७. सङ्केतपदकोशादाहृतश्लोकः

# भगवच्छास्त्रे पञ्चम-षष्ठ-सप्तम-हेतुनिरूपणम्

**प्रदीपसिंहाचार्यः**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीवैखानससूत्रस्य सर्वसूत्रोत्तमत्वं प्रतिपादयितुं प्रस्तुतेषु दशविधहेतुषु पञ्चम-षष्ठ-सप्तमहेतूनां विशेषविचारः कृतः अस्ति। तत्र पञ्चमहेतुत्वेन 'निषेकसंस्कारादिबोधकत्वं', षष्ठहेतुत्वेन 'अष्टादशशारीरसंस्कारप्रतिपादकत्वं', तथा च सप्तमहेतुत्वेन 'साङ्गक्रियाकलापवत्त्वं' निरूपितम्। इतरसूत्रकाराणां ग्रन्थेभ्यः वैखानससूत्रस्य वैशिष्ट्यं, तस्य श्रुतिमूलकत्वं, स्वातन्त्र्यं च अत्र सप्रमाणं स्थापितम्।

२. विषय-विवेचनम् (Body of the Article)

भगवच्छास्त्रे दशविधहेतुनिरूपणम्

सत्यनारायणः, मैसूरु

अथ सत्यत्वादिसमस्तकल्याणगुणविशिष्टात् परब्रह्मणः श्रीमन्नारायणादुत्पन्नेन विखनश्शब्दवाच्येन चतुर्मुखब्रह्मणा प्रणीतस्य वैखानससूत्रस्य सर्वसूत्रोत्तमत्वे तत्सूत्रोक्तधर्मानुष्ठानवतां सर्वोत्कृष्टतमत्वे च दशविधहेतवो निरूप्यन्ते । तथाहि अनुमानमेवं भवति । वैखानससूत्रं सर्वसूत्रोत्तमं सर्वसूत्रोत्तमत्वे दशविधहेतुसद्भावात् इति । तथाच- वैखानससूत्रमिति पक्षनिरूपणम् । सर्वसूत्रोत्तमत्वं साध्यम् । तत्र हेतवः दश भवन्ति -तन्मध्ये

५. वैखानससूत्रं सर्वसूत्रोत्तमं निषेकसंस्कारादिबोधकत्त्वात् ।

६. वैखानससूत्रं सर्वसूत्रोत्तमं अष्टादशशारीरसंस्कारप्रतिपादकत्वात् ।

७. वैखानससूत्रं सर्वसूत्रोत्तमं साङ्गक्रियाकलापवत्त्वात् ।

इति पञ्चम-षष्ठ-सप्तमहेतवः ।

अथ पञ्चमहेतुनिरूपणम्

वैखानससूत्रं सर्वसूत्रोत्तमं निषेकसंस्कारादिबोधकत्त्वात् इति अनुमानं अस्य श्रीवैखानससूत्रस्य सर्वोत्तमत्वे तत्सूत्रोक्तधर्मानुष्ठातॄणामपि सर्वोत्कृष्टत्वे च इतरसूत्रेषु मुख्यत्वेनानुपपन्नं निषेकादिसंस्कारादिमत्त्वमस्य सूत्रस्य मुख्यत एवोपपादकम् इति ज्ञापयति । तत्र च निषेकादिसंस्कारबोधकत्वादिति पञ्चमो हेतुर्निरूप्यते । यथा -

"अथ निषेकादिसंस्कारान् व्याख्यास्यामः ऋतुसङ्गमन" [१]

इत्युपक्रम्य "पाणिग्रहणानि" इत्यन्तेन शारीरसंस्कारा निषेकसंस्कारपूर्वकत्वेन प्रतिपादिताः । एतेषां निषेकादित्वे को विशेष इति चेत् – उच्यते । निषेकादिक्रियावतामेव श्रोत्रियत्वं धर्मशास्त्राधिकारित्वं ब्रह्मशरीरित्वञ्च बोधायनादिभिरुक्तम् । तथाहि-

"निषेके गर्भसंस्कारे जातकर्मक्रियासु च ।

विधिवत्संस्कृता मन्त्रैः चीर्णा व्रतसमापनात् ॥

श्रोत्रिया इति विज्ञेयाः शाखापाराश्च ये द्विजाः ।

विधिवत् गृह्यते पाणिं मृतौ चीर्णव्रतास्तु ते ॥

मन्त्रवत्सम्प्रयोगेन ब्राह्मण्यां गर्भमादधुः ।

निषेकाद्याः श्मशानान्ताः सत्क्रिया ब्राह्मणाश्रिताः ॥" [२] इति

याज्ञवल्क्य मन्वादि वाक्यान्यप्येवमेव। बोधायनेन-

"यतो एतद्भुतम्" [३]

इत्यादिना सूत्रादौ विवाहपूर्वकत्वेनोक्तम् ।

आपस्तम्बेन "अथ कर्माण्याचाराद्यानि गृह्यन्ते" [४] इत्यारभ्य "उपनयनं

व्याख्यास्याम" इति ।

भारद्वाजसत्याषाढाभ्यामाश्वलायनेन च

"उक्तानि वैतानिकानि" [५]

इत्यारभ्य वैश्वदेवपूर्वकत्वेन । द्राह्यायणेन

"अथातो गृह्यकर्माणि, उदगयनपूर्वपक्षः" [६]

इत्यारभ्य आचारादित्वेन । कात्यायनश्च

"अथातो गृह्यस्थालीपाकानां कर्म" [७]

इत्यारभ्य प्रतिपादितवान् ।

"अथ निषेकादिसंस्कारान् व्याख्यास्यामः" [१]

इत्यारभ्य निषेकपूर्वकत्वेन भगवता विखनसैव प्रतिपादितम् ।

एवं च निषेकपूर्वकत्वेनोक्तत्वादस्य सूत्रस्य सर्वसूत्रोत्तमत्वं एतत्सूत्रोक्तधर्मानुष्ठानेनैव तत्सूत्रिणां सर्वोत्कृष्टत्वञ्चोपपद्यते इति श्रुतिस्मृतिपुराणादिमुखेन प्रतिपादितमिति निरूपितः पञ्चमो हेतुः ।

इति पञ्चमहेतुनिरूपणम् ।

अथ षष्ठहेतुनिरूपणम्

अथेदानीं श्रीवैखानससूत्रोक्तधर्मानुष्ठातृणामेव सर्वेभ्यः श्रेष्ठतमत्वं सूत्रान्तरेष्वनुक्तं श्रुतिसिद्धाष्टादशसंस्कारवत्वं क्रियाबाहुल्यञ्च सम्भवतीति ज्ञापयितुं 'अष्टादशसंस्कारप्रतिपादकत्वात्' इति षष्ठो हेतुर्निरूप्यते । तथा हि –

"अथ निषेकादिसंस्कारान् व्याख्यास्यामः । ऋतुसङ्गमन-गर्भाधान-पुंसवन-सीमन्त-विष्णुबलि- जातकर्म-उत्थान-नामकरण-अन्नप्राशन-प्रवासागमन-पिण्डवर्धन-चौल-उपनयन-पारायण-व्रतबन्धविसर्ग-उपाकर्म-समावर्तन-पाणिग्रहणानि इत्यष्टदश

संस्काराश्शारीराः" [१]

इति अष्टादशसंस्काराः सूत्रे प्रतिपादिताः । एते च श्रुतिसिद्धाः । यथा मुण्डकोपनिषदि –

"प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।

एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति" [८] इति ।

अत्र केचिदेवमूचुः

"यज्ञस्य ऋत्विजष्षोडश सदस्यस्सप्तदशः यजमानोऽष्टादशः" [९]

इति श्रुत्यनुसारेण 'अष्टादशोक्तमवरं येषु कर्म' इत्यत्र यजमानादय एव विवक्षिता इति । तदसत्- 'अष्टादशोक्तमवरं कर्म येषु' इत्युक्तत्वात् । ऋत्विग् यजमानादयो हि यागकर्तारः न तु कर्म । 'येषु' इत्यस्य पदस्य येषु सूत्रेष्वित्यर्थः । अवरं कर्म जातकादयः, स्मार्तकर्मत्वात् । आत्मगुणरहिता यागादयः जातकर्मादयश्च अदृढाः प्लवाः संसारोत्तारका न भवन्ति । तथा च अत्र अदृढप्लवत्वेन निन्दिताः संस्काराः यागादयश्च आत्मगुणरहिता एव विवक्षिताः । तत्सहितानां तेषां मोक्षसाधकत्वात् ।

अथ अष्टादशस्मृत्युक्तानि अष्टादशपुराणेषूक्तानीति वा मुण्डकश्रुत्यर्थोऽस्तु इति चेत् – तदप्यसत् । स्मृतिपुराणादिषु अष्टादशकर्मेति विशिष्यानुक्तत्वात् । अत्र 'अष्टादशोक्तमवरं कर्म येषु' इति सामान्येनोक्तत्वात् तथोक्तानां यागादीनामप्यपवर्गप्रापकत्वाभावात् पुनरपि जरामृत्युप्रापकत्वाच्च न स्मृतिपुराणेषूक्तानीति वक्तुं युक्तम् । मुण्डकोपनिषदि

"क्रियावानेष ब्रह्मविदां वरिष्ठः" [१०] इति "क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत" [११]

इति च श्रूयते । बोधायनः –

"तस्माद्यः कश्चन क्रियावान् सतामनुमताचारस्स श्रोत्रियस्स एव विज्ञेयस्स एव

विज्ञेयः" [१२] इति ।

किंच- कर्मभूयस्त्वात् फलभूयस्त्वञ्च "यथोपसनं फलम्" [१३] इति न्यायात् सिद्ध्यति । अतः-अष्टादशसंस्कारप्रतिपादकत्वादस्य सूत्रस्य श्रेष्ठत्वम् एतत्सूत्रिणां सर्वोत्कृष्टत्वञ्चोपपद्यत इति निरूपितः षष्ठो हेतुः । इति षष्ठहेतुनिरूपणम् ।

अथ सप्तमहेतुनिरूपणम्

वैखानससूत्रं सर्वसूत्रोत्तमं साङ्गक्रियाकलापवत्त्वात् इति अनुमानेन श्रीवैखानससूत्रस्य इतरसूत्रापेक्षाभावात् स्वातन्त्र्यमस्तीति ज्ञायते । तदर्थं साङ्गक्रियाकलापवत्वादिति सप्तमो हेतुर्निरूप्यते । तथाहि – अत्र सूत्रे अष्टादशसंस्कारः शारीराः प्रसिद्धास्साङ्गाः एव प्रतिपादिताः ।

ननु अङ्कुरार्पण-शताभिषेक-अग्निद्वयसंसर्ग-पुत्रपरिग्रह-ब्रह्ममेध-वृषोत्सर्जनादि-प्रतिपादनाभावात् साङ्गक्रियाकलापवत्त्वं नास्तीति चेत् – तदसत् । इयं शङ्का श्रीवैखानससूत्रस्वरूपानभिज्ञत्वकृता । इदं सूत्रमेकादशप्रश्नात्मकम् । इतोपि परिशिष्टमप्येकमधिकम् अन्ततः उक्तम् । तत्र अङ्कुरार्पणादिकलापानामुक्तिः दृश्यते । तथाच सूत्रे प्रतिपादनाभावो न दोषाय । गृह्यपरिशिष्टे सद्भावात् । गृह्यपरिशिष्टसद्भावः कथमवगम्यते इति चेत् – उच्यते ।

"अथाङ्कुरार्पणविधिं व्याख्यास्यामः" [१४]

इत्यारभ्य खण्डद्वयेनाङ्कुरार्पणमुक्तम् ।

"सायं स्थण्डिले सहस्रं पिष्टेन सोमरूपाणि करोति" [१५]

इत्यत्र विशेषेण स्थण्डिलादिप्रतिपादितम्

"शताभिषेकं पूर्वाह्णे पुण्याहं द्विजभोजनम्" [१६] इत्यारभ्य –

"सायं गोमयसंलिप्ते स्थण्डिले प्रागनुन्नते ।

प्राची रेखा द्विपञ्चाशत्संख्यया तत्र संलिखेत् ॥" [१७]

इत्यादिना शताभिषेकप्रयोगश्च उक्तः । तथा

“धौतवस्त्रधारिणौ स्याताम्” [१८] इत्यारभ्य

“दीपाद्यलङ्कृते गेहे व्रीहीनास्तीर्य तत्र वै ।

शेषहोमेऽनन्तहोमान्ते आसीनं तत्र चर्मणि ।

विसृजामि व्रतश्चेति तद्व्रतं चर्म सन्त्ययेत् ॥” [१९]

इत्यादिना अग्निद्वयसंसर्गप्रकारश्च प्रतिपादितः ॥ पुत्रपरिग्रहप्रकारश्च –

“त्यागविक्रयदानेषु प्रोक्तेष्वपि ततस्स्मृतौ ।

एकं न दद्यान्नो गृह्यात् न स्त्री भर्त्रननुज्ञया ॥” [२०] इत्यादिना

ब्रह्ममेधविधिस्तु –

“संस्कारो ब्रह्मनिष्ठानां सदाचारवतामपि ।

ब्रह्ममेधोऽतिफलदो न सर्वेषां द्विजन्मनाम् ॥” [२१]

इत्यादिना । वृषोत्सर्गविधिस्तु

“वृषोत्सर्गविधिं वक्ष्ये येन प्रेतत्वमोचनम् ।

स्नात्वाऽथ वास्तुहोमान्ते प्रेतत्वस्य विमुक्तये ॥” [२२]

इत्यादिभिः । एवं अत्रानुक्तानि सर्वाणि गृह्यपरिशिष्टे प्रोक्तानि इति वेदितव्यम् ॥

बोधायनादिभिरप्येते साङ्गा एव प्रतिपादिता इति चेत् – न । “सति कुड्ये चित्रकर्म” [२३] इति न्यायेन प्रधानकर्माणि प्रतिपादितानि चेत् अङ्गविचारः कर्तव्यः । सन्ध्योपासने अर्ध्यप्रदानादिकमनुक्तम् । वानप्रस्थाश्रमस्वीकरणादिकमपि न प्रतिपादितम् । वानप्रस्थाश्रमस्वीकरणास्वीकरण-अरण्याहरण-पात्रलक्षणादिषु वैखानससूत्रापेक्षा अस्त्येव । देवताप्रतिष्ठादिकमुक्तं लक्षणं त्वनुक्तम् । आपस्तम्बादिभिः

सन्ध्योपासने अर्घ्यप्रदानादिक-मनुक्तम् ।

आपस्तम्बादिभिः सन्ध्योपासन-अङ्कुर-प्रतिसरदेवताराधन-यज्ञोपवीत-धारणादिक-मप्यनुक्तम् । आपस्तम्बादीनामन्योन्यापेक्षा प्रसिद्धा । अन्योन्यापेक्षा नाम अस्वातन्त्र्यमङ्गहीनवत् । यथाह मनुः –

"यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।

एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥" [२४] इति

अनेन अनन्तस्थिरफलप्राप्तिर्दर्शिता । अतः सूत्रान्तरनैरपेक्ष्यात् सर्वसूत्रोत्तमत्वं स्वातन्त्र्यञ्च घटत इति निरूपितस्सप्तमो हेतुः ।

इति सप्तमहेतुनिरूपणम् ।

३. उपसंहारः (Conclusion)

अनेन प्रकारेण वैखानससूत्रस्य सर्वसूत्रोत्तमत्वे पञ्चम-षष्ठ-सप्तमहेतूनां विवेचनं समाप्तम्। निषेकसंस्कारादित्वेन, अष्टादशसंस्कारवत्त्वेन, साङ्गक्रियाकलापवत्त्वेन च इदं सूत्रं सर्वश्रेष्ठमिति सिद्धम्। सूत्रान्तरनैरपेक्ष्यात्, स्वातन्त्र्यात्, श्रुतिस्मृतिसम्मतत्वाच्च अस्य शास्त्रस्य तथा तत्सूत्रोक्तधर्मानुष्ठानवतां श्रेष्ठत्वं निर्विवादं सिद्ध्यति।

४. सन्दर्भसूची (References)

[१] वैखानसगृह्यसूत्रम् - १.१

[२] मनुस्मृतिः / याज्ञवल्क्यस्मृतिः (धर्मशास्त्रवचनानि)

[३] बोधायनगृह्यसूत्रम् - १.१.१

[४] आपस्तम्बगृह्यसूत्रम् - १.१.१

[५] आश्वलायनगृह्यसूत्रम् - १.१

[६] द्राह्यायणगृह्यसूत्रम् - १.१

[७] कात्यायनगृह्यसूत्रम् - १.१

[८] मुण्डकोपनिषद् - १.२.७

[९] श्रुतिवाक्यम् / ब्राह्मणम्

[१०] मुण्डकोपनिषद् - ३.१.४

[११] मुण्डकोपनिषद् - ३.२.१०

[१२] बोधायनधर्मसूत्रम्

[१३] लौकिकन्यायः (यथोपसनं फलन्यायः)

[१४] वैखानसगृह्यपरिशिष्टसूत्रम् (अङ्कुरार्पणविधिः)

[१५] वैखानसगृह्यपरिशिष्टसूत्रम् (खण्डः - अङ्कुरार्पणम्)

[१६] वैखानसगृह्यपरिशिष्टसूत्रम् (शताभिषेकविधिः)

[१७] वैखानसगृह्यपरिशिष्टसूत्रम् (शताभिषेकप्रयोगः)

[१८] वैखानसगृह्यपरिशिष्टसूत्रम् (अग्निद्वयसंसर्गः)

[१९] वैखानसगृह्यपरिशिष्टसूत्रम् (अग्निद्वयसंसर्गप्रयोगः)

[२०] वैखानसगृह्यपरिशिष्टसूत्रम् (दत्तकविधिः / पुत्रपरिग्रहः)

[२१] वैखानसगृह्यपरिशिष्टसूत्रम् (ब्रह्ममेधविधिः)

[२२] वैखानसगृह्यपरिशिष्टसूत्रम् (वृषोत्सर्गविधिः)

[२३] लौकिकन्यायः (चित्रकर्मन्यायः)

[२४] मनुस्मृतिः - ४.१५९-१६०

५. ग्रन्थसूची (Bibliography)

१. वैखानससूत्रम् (गृह्यसूत्रम्, गृह्यपरिशिष्टसूत्रम्).

२. बोधायनगृह्यसूत्रम्.

३. आपस्तम्बगृह्यसूत्रम्.

४. आश्वलायनगृह्यसूत्रम्.

५. कात्यायनगृह्यसूत्रम्.

६. मनुस्मृतिः.

७. मुण्डकोपनिषद्.

८. याज्ञवल्क्यस्मृतिः

# मोक्षहेतु-भगवद्भक्तिविचारः

**डा.आर् विटोबाचार्यः**
**निदेशकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे मोक्षसाधनभूतायाः भगवद्भक्तेः स्वरूपं, तस्याः ज्ञानकर्मभ्यां वैलक्षण्यं, भक्तिरसस्य अलौकिकत्वं, नामसंकीर्तनस्य माहात्म्यं, नामापराधाश्च विचारिताः सन्ति। विशेषतः मधुसूदनसरस्वतीप्रभृतीनां मतेन भक्तेः लक्षणं, जीवस्य स्वरूपं, भक्तेः पुरुषार्थत्वं च अत्र प्रतिपादितम्। भक्तिः साध्यरूपा साधनरूपा च इति द्विविधा। तत्र भगवदाकारताऽपन्ना चित्तवृत्तिः एव भक्तिरिति निरूपितम्। अत्र रसस्वरूपं, तस्य अप्राकृतत्वं, जीवात्मनः आनन्दरूपत्वं च शास्त्रप्रमाणैः विवेचितम्। अन्ते च कलौ भगवन्नामसंकीर्तनस्यैव सर्वश्रेष्ठसाधनत्वं, नामापराधवर्जनपूर्वकं क्रियमाणस्य कीर्तनस्य मोक्षप्रदत्वं च सप्रमाणं स्थापितम्।

२. विषय-विवेचनम् (Body of the Article)

मोक्षहेतुभगवद्भक्तिविचारः

तत्र भक्तित्वं ज्ञानस्वव्याप्यजातिविशेष इति द्रव्यकिरणावलीप्रकाशे वर्धमानोपाध्यायाः । आराध्यत्वप्रकारकं ज्ञानं भक्तिरिति केचित् । मधुसूदनसरस्वतीप्रभृतयस्तु भगवद्गुणगणश्रवणेन द्रवावस्थां प्राप्तस्य चित्तस्य सर्वेश-विषया धारावाहिकी वृत्तिर्भगवदाकारता भक्तिरित्याहुः । वयन्तु भगवद्विषयकानुरागहेतुक्रियात्वं, भगवदनुरागमात्रोद्देश्यकविहितक्रियात्वं वा भक्तित्वमिति ब्रूमः । अत्र मात्रपदेन स्वर्गाद्युद्देश्यकयागादिव्यवच्छेदः, विहितपदेन भगवदनुरागोद्देशेनानुष्ठित-नरहननादेर्व्युदासः । न च फलभक्तावव्याप्तिः । भगवद्गोचरानुराग-वृत्तिकार्यतासाक्षात्कार-जनकसाक्षात्कारविषयत्वस्य निरुक्तसाक्षात् कारविषयतावच्छेदकधर्मवत्त्वस्य वा विवक्षितत्वात् ।

ननु साध्यरूपाया भक्तेः सुखात्मतया पुरुषार्थत्वेन तत्र प्रवृत्त्युपपत्तावपि साधनभक्तेः स्वयमपुरुषार्थत्वेन तत्र प्रेक्षावतां प्रवृत्तिर्न युक्तेति चेत्? निरुपाधीच्छाविषयत्वरूपपरमपुरुषार्थत्वस्य सुखदुःखाभावयोरेव विश्रान्ततया धर्मार्थयोर्निरुक्त पुरुषार्थत्वाभावेन तयोरपि प्रवृत्त्यनुपपत्तेः, यदि च सुखदुःखाभावान्यतरसाधनत्वेन तयोः पुरुषार्थत्वं तदा भक्तेरपि सुखसाधनतया तत्त्वज्ञानद्वारापवर्गसाधनतया च पुरुषार्थत्वमक्षतमेवेति न तयोरिव तस्यामपि प्रवृत्त्यनुपपत्तिरिति । निरुक्ता च भक्तिर्द्विधा, साध्यरूपा साधनरूपा च, तत्र साध्यरूपा भक्तिरेव फलभक्तिरित्युच्यते । तदुक्तं ग्रन्थकृता- "उक्ता भक्तिर्द्विधा, अनुरागात्मिका फलभक्तिः, साधन-भक्तिश्चेति, तत्र फलभक्तिः साधानानुष्ठानादेव सिद्धेति न विधेया, फले विध्यभावात्" इति ।

भक्तिरसस्वरूपम्

यद्यपि लोके सुखत्वेन व्यवह्रियमाणं न वस्तुतः सुखं, विनाशित्वेन दुःखाधायकत्वाद्, यदाहुर्महर्षिपतञ्जलिपादाः- "परिणामतापसंस्कारदुःखैर्गुणवृत्ति विरोधाच्च सर्वमेव दुःखं विवेकिनः" [१] अत एव दुःखमिश्रितत्वेन सुखस्यापि मधुसंपृक्तगरलवद्धेयत्वात्तदपि दिध्वंसयिषितव्यमेवेति महर्षिगोतमपादा न्यवातिष्ठिपन्, तथाऽपि वास्तविकसुखमलभमानाः संसारिणस्तदाभासेनैव कृतकृत्यं मन्यमानाः समवलोक्यन्ते । वस्तुतः सुखं च "आनन्दं ब्रह्मणो विद्वान्" [२] "तस्यैवानन्दस्यान्येमात्रामुपजीवन्ति" [३] इत्यादिभिर्भगवतीभिः श्रुतिभिरेवावगमितं, तच्चात्मस्वरूपघटकतया परिणामादिदुःखकालुष्यासंपृक्तमित्यात्मस्वरूपावगत्या स्वाव गममौपनिषदप्रस्थानाध्वनीनैः, अतएवेदं विविच्यमानं रसतत्त्वं साहित्यदर्शनपरम-जीवातुरूपात्मस्वरूपोपजीव्यतयाऽऽश्रित्य चतुर्मुखादिभरतमुन्यन्ताचार्याणामार्षप्रमाणो-पबृंहितं न दर्शनान्तरैर्गतार्थमाशङ्कितव्यम्, दर्शनान्तरेषु किल लोकायतिकसौगताना-मात्मनः शाश्वततैव दुर्लभेति निर्दिष्टदूषणं जागरूकमेव।

नैयायिकवैशेषिकाणां मते तन्नित्यत्वेऽपि निरानन्दतैवैतस्य स्वरूपं, सानन्दता तु दुःखवत्ताऽऽवृतैवेति न सिषाधयिषितसिद्धिः, कापिलपातञ्जलानामपि तथात्वेन

तथात्वमेवेति नाभीष्टपूर्त्तिः, अध्वरमीमांसाविदां नयेषु प्रायेणोक्तचर्येवाशान्तिः पूर्वं तदीयव्यक्तेरसत्कल्पत्वात्, अनयैव दिशाऽऽत्मनोऽनानन्दतावादिनामवशिष्टदर्शनानां सिद्धान्तेभ्योऽप्यगतार्थता विवेक्तव्या, औपनिषदसिद्धान्तिनां त्वद्वैतविशिष्टाद्वैतशुद्धा द्वैतद्वैता-द्वैतद्वैतवादिनां पञ्चानामपि प्रस्थानेषु चात्मतत्त्वस्य नित्यतयाऽऽनन्दतया च महतः संवादस्य सत्त्वेऽपि न तथाऽऽनुकूल्यं यादृशप्रयोजनसंपिपादयिषयाऽऽचार्या एतदाविर्बभूवुः, एतच्चानुपदमेव स्वरूपनिर्णये वक्ष्यते ।

भक्तिरसस्वरूपजिज्ञासायां तावदात्मैव रस इति रसदर्शनिनां राद्धान्तः-

"रसो वै सः" [४]

"आनन्दं ब्रह्मणो विद्वान्"

"आनन्दादध्येवेमानि" [५]

इति श्रौतवचनानि स्वरूपतटस्थ-लक्षणाभ्यामात्मानमेव लक्षयन्ति, आत्मा चात्र यद्यपि ब्रह्मपरमात्मादिपर्यायो भगवा-नेवोपक्रमोपसंहारादिभिस्तत्पदास्पदतयाऽवजिग मिषितस्तथाऽपि प्रतिबिम्बतया परिच्छिन्नतया वस्तुतया वा

"यथाऽग्नेर्विस्फुलिङ्गाः" [६]

"ममैवांशो जीवलोके" [७]

"अंशो नानाव्यपदेशाद्" [८]

इत्यादिश्रुतिस्मृतिब्रह्मसूत्रादिभिर्व्यवस्थापितो जीवोऽपि तत्त्वदृशा सच्चिदानन्दात्मा, परन्तु सिन्धोर्बिन्दुरिव तत्स्वभावः कणकल्पः सुतरां तदुपात्तसरणितः सर्वांश एव न तादृशो, नातो जगत्कर्तृत्वाद्यापत्तिरथचैनं तर्कोपष्टब्धानि

"जगद्व्यापारवर्जम्" [९]

इत्यादिप्रमाणान्युपोद्बलयन्ति, अत एवायं तदीय-तटस्थशक्त्यात्मकतया शास्त्रेषु व्यवह्रियते ।

सच्चिदानन्दस्वरूपस्य भगवतः किल तिस्रः शक्तयः शास्त्रप्रमिताः स्वरूपान्तरस्था-बहिरङ्गाख्यास्तस्यां स्वरूपाख्यायां पुनस्तावत्यो भिदाः संधिनीसंविदह्लादिनीनामिकाः, तथा च तत्त्वतो भगवत्स्वरूपसजातीयः सर्वथा तद्विजातीयबहिरङ्गातो विलक्षणः सन् जीवः तटस्थ इति गीयते, एवं चोक्तस्वरूपो जीवोऽपि रसपदवाच्यतां नार्हतीति न, न खलु रससमुद्रस्य बिन्दू रसान्यो भवितुमर्हति, एतदेवाभिप्रेत्य रसशास्त्राचार्याः प्राकृताप्राकृतभेदतो द्वैविध्यं रसस्य संगिरमाणास्तथैवोपापादयन्, मूलं चैतदीयमाग्नेयपुराणादिषु व्यक्तमेव, आचार्यभरतमुनिना तु यानुपचिकीर्षुणा नाट्यशास्त्रं, ते किलानादिकालतो बम्भ्रम्यमाणप्रपञ्चचक्रचङ्क्मणताचणाः अपरिशीलित चरपरमपुमर्थप्रापकपद्धतयः सुकुमारमतयो विविधवासनावासितहृदयाः काव्यार्थचिन्त-नालङ्कर्मीणयोग्यतापरिपचेलिमचातुरीका विनेयाः तानेतान्

"असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" [१०]

इत्यादिस्वरूपेण गुडजिह्विकान्यायेन चरमगन्तव्यदिक्संमुखीनीकर्तुका मेन परमरसास्वादमाधुरीसंपल्लेशोऽपि यदवधि नानुभवगोचरीकार्येत तदवधि कथमिवादसीयमर्मस्पृहायालवोऽमी क्रियेरन्निति विचिन्त्य दुष्करप्रवृत्त्यास्पदानि निःश्रेयसप्रापणपटूनि श्रवणादीनि साधनान्यव्यापार्यापि निखिलानर्थनिदानाज्ञानमनु न्मूल्यापि चिरसंचितचरकर्मकलापान् प्रमुष्यापि जनैर्यथा तादृशं वस्त्वास्वादपदवीं नीयेत यादृशं तत् तान्यव्यापार्य, तदनुन्मूल्य, तान् परिप्लुष्य सूरिभिस्तथा क्रियते, स प्रकारो दिव्यज्ञानमन्दरेण निगमपयोधीन्प्रमथ्य नाट्याम्नायपीयूषवपुराविरकारि, सुतरां प्रथमभूमिकारूढानामधिकारिणामुपकारः प्राकृतरसपरिचयेन यथा सुकरः, न तथाऽप्राकृतरसज्ञापनेनेत्यधिकारानुरूपमुपदेष्टारः श्रद्धेयवचनाः फलेग्रहियत्नाश्च भवन्ति नापरथा, अतो मुनिनाऽस्यैव प्रबन्धो निर्बन्धेनाबन्धि नापरस्य, नैतावता स नास्त्येव नानुमत एव वेत्यवगन्तव्यं, कथमन्यथाऽऽत्मदर्शनासाधनतायामस्य शास्त्रस्य दर्शनता, कथं चोपक्रम एव चतुर्वर्गाप्तिप्रयोजकतोक्तिरस्य संगच्छत कथं च रसताऽपि जीवस्वरूपघटकानन्दस्य रसत्वप्रतिपादिका हि भगवती श्रुतिः उपक्रमोपसंहारादिपरि चारकवृन्दसेविता खलु स्वेष्टमाप्नोति ।

न च तत्सध्रीचीनश्रुतितात्पर्यविषयाभिन्नत्वाज्जीवस्य नोक्तापत्तिरिति वाच्यम्? तयोरभेदस्य याथातथ्यचिन्तायामुदस्यापि संप्रतिपन्नभेदकालेऽभेदोक्तेरनुपयुक्तत्वात्, प्रदर्शितविधया शास्त्रप्रवृत्त्युपजीव्यविरोधाच्च, एतेन ज्ञानकाण्डेन रसकाण्डस्य गतार्थतया काण्डान्तरम्भचर्चा मुधैति वदन्तो निरस्ताः, प्रयोजनपार्थक्यं हि प्रस्थानपार्थक्यं प्रयोजयति, तच्चैहिकमामुष्मिकं वा, उत्कृष्टमपकृष्टं वांशत इत्यन्यदेतद्, इत्थं चैष रसः प्राकृतालम्बनकतया प्राकृत इति व्यवह्रियते, अप्राकृतालम्बनकोऽप्राकृत इति शास्त्रविदां मर्यादा व्यवहारासंकरार्थमादरणीयैव, द्वैविध्यं चैतदाचार्यभरतेनापि बहुशो ध्वनितमप्यनधिकार्यत्वेन नाभिहितं, तदेव पुनराग्नेयादौ स्पष्टमुक्तं नेयता काऽपि क्षतिः ।

यत्तु प्राकृताप्राकृतौ रसौ क्रमेण लौकिकालौकिकावित्युच्येते इति तन्न समीचीनम्, उभयोरप्यलौकिकत्वाद्, न हि जातु लौकिको रसोऽध्यात्मविद्यानां प्रधानत्वेन प्रतिपाद्यो भवितुमर्हति, स हि तृतीयपुमर्थगृह्योऽन्यथा प्रस्थानभेदानुपपत्त्या बाभ्रव्या दिसंहितानामानर्थक्यमापतेदित्यादिर्भूयानुपप्लवः स्याद्, अलौकिकत्वं चैनयोर्लौकिकम र्यादाऽतिशायित्वाद्, दर्शयिष्यते चानुपदमेतद्, प्राकृतत्वं च पादविभूतिविजृम्भितत्वं, त्रिपादवैभवं चाप्राकृतमिति वस्तुस्थितिः, अत्र प्राकृतो रस उच्यते, अप्राकृतस्तु भाव इति नाट्यशास्त्रीया परिभाषा, वस्तुतस्त्वप्राकृतो भक्तिरस उच्यते-रसत्वव्यपदेशजीवा तोस्तादृशानन्दात्म-कताया उभायत्र सत्त्वादिति ।

रसोपलब्धिप्रकारस्त्वेषः- वक्ष्यमाणस्वरूपकैर्विभावानुभावसात्त्विकसंचारिभिर्व्यक् तो व्यक्तिविषयीकृतः स्थाय्येव रसतां भजतेऽयमर्थस्तु यावद्रसदर्शनिभिरनुमोदितोऽपि स्थायिस्वरूपे तदभिव्यक्तौ च प्रक्रियाभेदो मतभेदनिबन्धनोऽस्त्येव-तत्र-आहंकारिके चित्ते कारणविशेषोद्बुद्धसत्त्वे स्वेतरगुणाविभिभूय प्रकाशमाने जातु चिदनुभूतरयादिस् थायिसंस्कारोऽप्युद्बुद्धीभूय प्रतीयमान उपचीयमानः पुष्यमाणोऽभिन्नायमाननेदिष्ठचिच् छत्त्याऽऽत्मीयत्वेन भुज्यमानो रसव्यपदेशभागिति कापिली प्रक्रिया, परन्त्वसौ जड त्वपरप्रकाश्यत्वप्राकृतत्वादिमत्त्वाद्भिन्नमेव वस्तु नास्माकीनो रसः, भौतिके चित्ते

हेतुविशेषादुदितम्रदिमनि मुद्रितो रत्यादिस्थाय्याकारः संस्कारः –बोधकमहिमतिरस्कृतावृतिकचिद्विशिष्टो रस इत्यौपनिषदैकदेशिनां सरणिः, अत्र पूर्वोक्तदोषासत्त्वेऽपि चितोऽङ्गत्वोक्त्या श्रुतिस्वारस्यभङ्गोऽस्त्येव, एतद्दोषं परिहर्त्तुकामैः कैश्चित् स्थाय्यवच्छिन्नभग्नावरणचिदेव रस उक्तः, किन्त्वेवमपि गौणत्वभानप्रयुक्तास्वारस्ये समाहितेऽप्यवहितोतरवाक्यसहितवाक्यैकवाक्यता-स्वारस्यभङ्गस्तदवस्थ एव,

तद् वाक्यं च- "रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति" [११]

इति एतद्वाक्यघटकायंपदार्थकर्तृकलाभायैव भवता रसत्वेन विवक्ष्यतेऽतः स्पष्ट एव स्वारस्यभङ्गो भग्नावरणचैतन्यस्यैवायंपदार्थतया कर्तृकर्मणोरभेदापत्तेः ।

धर्मार्थकामानां स्वतःपुरुषार्थत्वाभावात् तज्जन्यसुखस्यैव पुरुषार्थत्वे गौरवादननुगमाच्च, धर्मजन्यत्वादिविशेषणं परित्यज्य सुखमात्रं पुरुषार्थ इति स्थिते समाधिसुखस्येव भक्तिसुखस्यापि स्वतन्त्रपुरुषार्थत्वात्, तस्य मोक्षसमीपवर्त्तितया मोक्षान्तर्भूतत्वे योगजधर्म्मजन्यतया धर्म्मान्तर्भूतत्वे वाः भक्तिसुखस्यापि भागवतधर्म्मजन्यतया धर्मान्तर्भावस्य श्रद्धाजडान् प्रति वक्तुं शक्यत्वाद् भक्तस्य संसारमोक्षस्यावश्यकत्वाद् मोक्षान्तर्गतो वा भक्तियोगः, तस्मात् पुरुषार्थचतुष्टयान्तर्गतत्वेन वा स्वातन्त्र्येण वाऽयं भक्तियोगः पुरुषार्थः परमानन्दरूपत्वादिति निर्विवादम् ।

ननु तर्हि नामान्तरेण ब्रह्मविद्यैव भगवद्भक्तिरित्युक्तं तथाहि-

"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ।

यज्ञेन दानेन तपसाऽनाशकेन" [१२]

इत्यादिश्रुत्या सर्वसुकृतसाध्यत्वेन ब्रह्मविद्या प्रतिपादिता सर्वापेक्षाऽधिकरणे च तथैव निर्णीता, इहापि पूर्वोदाहृतवचनैः सर्वसुकृतसाध्यत्वेन लक्षणेन भगवद्भक्तेर्ब्रह्मविद्यारूपतायाः प्रतिपादनात्, तस्याश्च निरतिशयपुमर्थत्वस्य चतुर्लक्षणमीमांसया प्रतिपत्तिविप्रतिपत्तिनिवारणेन व्यवस्थापितत्वाद् व्यर्थोऽयं विचारारम्भ इति चेद्? न । स्वरूपसाधनफलाधिकारिवैलक्षणयाद् भक्तिब्रह्मविद्ययोः, द्रवीभावपूर्विका हि मनसो

भगवदाकारता सविकल्पकवृत्तिरूपा भक्तिः, द्रवीभावानुपेताऽद्वितीयात्ममात्रगोचरा निर्विकल्पकमनसो वृत्तिर्ब्रह्मविद्या, भगवद्गुणगरिमग्रन्थनरूपग्रन्थश्रवणंभक्तिसाधनम्, 'तत्त्वमस्या' दिवेदान्तमहावाक्यं ब्रह्मविद्यासाधनम्, भगवद्विषयकप्रेमप्रकर्षो भक्तिफलम्, सर्वानर्थमूलाज्ञाननिवृत्तिर्ब्रह्मविद्याफलम्, प्राणिमात्रस्य भक्तावधिकारः, ब्रह्मविद्यायान्तु साधनचतुष्टयसम्पन्नस्य परमहंसपरिव्राजकस्याधिकारः । सर्वयज्ञदानादिसुकृतसाध्यत्वं समानं भक्तिब्रह्मविद्ययोः स्वर्गविविदिषयोरिव, यथा

"स्वर्गकामो दर्शपौर्णमासाभ्यां यजेत" [१३]

इति स्थित एव स्वर्गसाधनत्वे सर्व्वकामेभ्यो "दर्शपौर्णमासा" विति वाक्येन फलान्तरसाधनत्वमपि बोध्यते, तथा "तमेतं वेदानुवचनेने"त्यादिना स्थित एव फलसाधनत्वे संयोगपृथक्त्वन्यायेन विविदिषासाधनत्वमपि बोध्यते, एवं भक्तिब्रह्मविद्ययोरपि स्वर्गब्रह्मविद्ययोरिव फलसाधनभावाभावश्च तुल्यसाधनसाध्यत्वञ्च भविष्यति, सामग्र्यैक्ये हि कार्य्यैक्यं न तु कारणमात्रैक्यैऽतिप्रसङ्गात् ।

ननु ब्रह्मविद्याऽतिरिक्तत्वे भक्तेः स्वर्गादिवद् निरतिशयपुरुषार्थत्वं न स्यादिति चेद्? न-स्वर्गादे-र्नियतदेशकालशरीरेन्द्रियादिभोग्यत्वेन सर्वत्रोपभोक्तुमशक्यत्वात् क्षयित्वपारतन्त्र्यलक्षणदुःख-द्वयानुविद्धत्वेन निरतिशयत्वाभावेऽपि; भक्तिसुखधारायाः सर्वदेशकालशरीरेन्द्रियादिसाधारणयेन ब्रह्मविद्याफलवदुपभोक्तुं शक्यत्वात् क्षयित्वपार तन्त्र्यलक्षणद्वयानुरोधाभावेन निरतिशयित्वोपपत्तेः, तदुक्तम्-

"हित्वा स्वधर्म्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथ पतेत्ततो यदि ।
यत्र क्व वाऽभद्रमभूदमुष्य किं कोवाऽर्थ आप्तो भजतां स्वधर्म्मतः ॥"

"न वै जनो जातु कथञ्चनाव्रजे न्मुकुन्दसेव्यन्यवदङ्ग! संसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो यतः ॥"

"सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥"

इत्यादि । अत एवापत्तावपि दुःखासंस्पर्शित्वप्रतिपादनायास्पृष्टदुःखमिति विशेषणमुपात्तम्, अत एव च न परिणतिविरसेन स्वर्गादिना साम्यम्, एतेन लौकिकरसवैलक्षण्यमपि व्याख्यातम् । तस्यापि शास्त्राविहितत्वेन पापक्षयाहेतुत्वेनापत्तौ दुःखसंस्पर्शित्वात्, भक्तेस्तु दृष्टादृष्टफलतया महान् विशेषो वक्ष्यते ।

सा च भक्तिः नानाविधा वर्तते । तत्र किंचिदेव भक्तिविशेषवर्णनं क्रियते- कीर्तनमाहात्म्यम्- उक्तं भागवते -

"एतन् निर्विद्यमानानाम् इच्छताम् अकुतोभयम् ।

योगिनां नृप निर्णीतं हरेर्नामानुकीर्तनम् ॥" इति

क्रमसन्दर्भे अयं श्लोकः विस्तृततया व्याख्यातः- तद्यथा तत्रापि सर्वेषाम् एव परमसाधनत्वेन परमसाध्यत्वेन चोपदिशति एतन् निर्विद्यमानानाम् इति ।

टीका च साधकानां सिद्धानां च नातः परम् अन्यच्छ्रेयोऽस्तीत्याह एतदिति । इच्छतां कामिनां तत्तत्फलसाधनम् एतदेव । निर्विद्यमानानां मुमुक्षूणां मोक्षसाधनम् एतदेव । योगिनां ज्ञानिनां फलं चैतदेव निर्णीतम् । नात्र प्रमाणं वक्तव्यम् इत्यर्थः । इत्येषा । नामकीर्तनं चेदम् उच्चैरेव प्रशस्तम् "नामान्यनन्तस्य हतत्रपः पठन्" इत्यादौ ।

अथ पाद्मोक्ता दशाप्यपराधाः परित्याज्याः । यथा सनत्कुमारवाक्यम्

"सर्वापराधकृद् अपि मुच्यते हरिसंश्रयात् ।

हरेरप्यपराधान् यः कुर्याद् द्विपदपांसवः ॥

नामाश्रयः कदाचित् स्यात् तरत्येव स नामतः ।

नाम्नोऽपि सर्वसुहृदो ह्यअपराधात् पतत्यधः ॥" इति ।

अपराधाश्चैते भवन्ति-

"सतां निन्दा नाम्नः परमम् अपराधं वितनुते यतः ख्यातिं यातं कथम् उ सहते तद्विगर्हाम् ।

शिवस्य श्रीविष्णोर्य इह गुणनामादिसकलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः ॥"

"गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनम् ।

नाम्नो बलाद् यस्य हि पापबुद्धिर्न विद्यते तस्य यमैर्हि शुद्धिः ॥"

"धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यम् अपि प्रमादः ।

अश्रद्दधाने विमुखेऽप्यशृण्वति यश्चोपदेशः शिवनामापराधः ॥"

"श्रुत्वापि नाममाहात्म्ये यः प्रीतिरहितोऽधमः ।

अहंममादिपरमो नाम्नि सोऽप्यपराधकृत् ॥" इति ।

अत्र सर्वापराधकृदपीत्यादौ श्रीविष्णुयामलवाक्यम् अप्यनुसन्धेयम् ।

"मम नामानि लोकेऽस्मिन् श्रद्धया यस्तु कीर्तयेत् ।

तस्यापराधकोटीस्तु क्षमाम्येव न संशयः ॥" इति ।

सतां निन्दा इत्यनेन हिंसादीनां वचनागोचरत्वं दर्शितम् । निन्दादयस्तु यथा स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे

"निन्दां कुर्वन्ति ये मूढा वैष्णवानां महात्मनाम् ।

पतन्ति पितृभिः सार्धं महारौरवसंज्ञिते ॥"

"हन्ति निन्दन्ति वै द्वेष्टि वैष्णवान् नाभिनन्दति ।

क्रुध्यते याति नो हर्षं दर्शने पतनानि षट् ॥" इति ।

तन्निन्दाश्रवणेऽपि दोष उक्तः

"निन्दां भगवतः शृण्वन् तत्परस्य जनस्य वा ।

ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥" इति ।

ततोऽपगमश्चासमर्थस्यैव । समर्थेन तु निन्दकजिह्वा छेत्तव्या । तत्राप्यसमर्थनस्वप्राणपरित्यागोऽपि कर्तव्यः । यथोक्तं देव्या

"कर्णौ पिधाय निरयाद् यदकल्प ईशे

धर्मावितर्य् असृणिभि नृभिरस्यमाने ।

छिन्द्यात् प्रसह्य रुशतीम् असतीं प्रभुश्चेज्जिह्वाम् असून् अपि ततो विसृजेत् स धर्मः ॥" इति ।

शिवस्य श्रीविष्णोरित्यत्रैवम् अनुसन्धेयम् । श्रूयतेऽपि

"यद् यद् विभूतिमत् सत्त्वं श्रीमद् ऊर्जितम् एव वा ।

तत् तद् एवावगच्छ त्वं मम तेजोंऽशसंभवम् ॥" इति ।

"ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः" इति ।

"यत्पादनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्नाधिकृतेन शिवः शिवोऽभूत्" इति ।

"सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः ।

विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृक् ॥"

तथा माध्वभाष्यदर्शितानि वचनानि ब्रह्माण्डे

"रुजं द्रावयते यस्माद् रुद्रस् तस्माज्जनार्दनः ।

ईशनादेव चेशानो महादेवो महत्त्वतः ॥"

"पिबन्ति ये नरा नाकं मुक्ताः संसारसागरात् ।

तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः ॥"

"शिवः सुखात्मकत्वेन सर्वसरोधनाद्धरः ।

कृत्यात्मकमिमं देहं यतो वस्ते प्रवर्तयन् ॥"

"कृत्तिवासास्ततो देवो विरिञ्चिश्च विरेचनात् ।

बृंहणाद् ब्रह्मनामासौ ऐश्वर्यादिन्द्र उच्यते ॥"

"एवं नानाविधैः शब्दैरेक एव त्रिविक्रमः ।

वेदेषु च पुराणेषु गीयते पुरुषोत्तमः ॥" इति । वामने च-

"न तु नारायणादीनां नाम्नामन्यत्र संशयः ।

अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ॥" इति । स्कान्दे च

"ऋते नारायणादीनि नामानि पुरुषोत्तमः ।

अदादन्यत्र भगवान् राजेवर्ते स्वकं पुरम् ॥" इति । ब्राह्मे च

"चतुर्मुखः शतानन्दो ब्रह्मणः पद्मभूरिति ।

उग्रो भस्मधरो नग्नः कपालीति शिवस्य च ।

विशेषनामानि ददौ स्वकीयान्यपि केशवः ॥" इति ।

तद् एवं श्रीविष्णोः सर्वात्मकत्वेन प्रसिद्धत्वात् तस्मात् सकाशात् शिवस्य गुणनामादिकं भिन्नं शक्त्यन्तरसिद्धम् इति यो धियापि पश्येद् इत्यर्थः । द्वयो्र अभेदतात्पर्येण षष्ठ्यन्तत्वे सति श्रीविष्णोश्चेत्यपेक्ष्य चशब्दः क्रियेत । तत्प्राधान्यविवक्षयैव श्रीशब्दश्च तत्रैव दत्तः । अत एव शिवनामापराध इति शिवशब्देन मुख्यतया श्रीविष्णु एव प्रतिपादित इत्यभिप्रेतम् । सहस्रनामादौ च स्थाणुशिवादिशब्दास्तथैव । अथ श्रुतिशास्त्रनिन्दनम् यथा पाषण्डमार्गेण दत्तात्रेयर्षभदेवोपासकानां पाषण्डिनाम् । तथार्थवादः स्तुतिमात्रम् इदम् इति मननम् । कल्पनं तन्माहात्म्यगौणताकरणाय गत्यन्तरचिन्तनम् । यथोक्तं कौर्मे व्यासगीतायां

"देवद्रोहाद् गुरुद्रोहः कोटिकोटिगुणाधिकः ।

ज्ञानापवादो नास्तिक्यं तस्मात् कोटिगुणाधिकम् ॥" इति ।

यत्तु श्रुतनाम्माहात्म्यस्याप्यजामिलस्य "सोऽहं व्यक्तं पतिष्यामि नरके भृशदारुणे" इत्येतद् वाक्यं तत् खलु स्वदौरात्म्यमात्रदृष्ट्या । नाममाहात्म्यदृष्ट्या त्वग्रे वक्ष्यते "तथापि मे दुर्भगस्य" इत्यादि द्वयम् । नाम्नो बलाद् इति । यद्यपि भवेन्नाम्नो बलेनापि कृतस्य पापस्य तेन नाम्ना क्षयः । तथापि येन नाम्नो बलेन परमपुरुषार्थस्वरूपं सच्चिदानन्दसान्द्रं साक्षाच्छ्रीभगवच्चरणारविन्दं साधयितुं प्रवृत्तस्तेनैव परमघृणास्पदं पापविषयं साधयतीति परमदौरात्म्यम् । ततः कदर्थयत्येव तं तन्नाम चेति तत्पापकोटिम हत्तमस्यापराधस्यापातो बाढम् एव । ततो यमैर्बहुभिर्यमनियमादिभिः कृतप्रायश्चित्तस्य क्रमेण पात्पाधिकारैरनेकैरपि दण्डधरैर्वा कृतदण्डस्य तस्य शुद्ध्यभावो युक्त एव । नामापराधयुक्तानाम् इत्यादि वक्ष्यमाणानुसारेण पुनरपि सततनामकीर्तनमात्रस्य तत्र प्रायश्चित्तत्वात् । सर्वापराधकृद् अपीत्याद्युक्त्यनुसारेण नामापराधयुक्तस्य भग वद्भक्तिमतोऽप्यधःपातलक्षणभोगनियमाच्च । तत इन्द्रस्याश्वमेधाख्यभगवद्यजनबलेन वृत्रहत्याप्रवृत्तिस्तु लोकोपद्रवशान्तिं तदीयासुरभावखण्डनं च ऋषीणाम् अङ्गीकृतत्वान्न दोष इति मन्तव्यम् ।

अथ धर्मव्रतत्यागेति धर्मादिभिः साम्यमननम् अपि प्रमादः । अपराधो भवतीत्यर्थः । अत एव च

"वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।

तावन्ति हरिनामानि कीर्तितानि न संशयः ॥"

इत्यतिदेशेनापि नाम्न एव माहात्म्यम् आयाति । उक्तं हि "मधुरमधुरम् एतन्मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम्" इति । तथा श्रीविष्णुधर्मे

"ऋग्वेदो हि यजुर्वेदः सामवेदोऽप्यथर्वणः ।

अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥"

स्कान्दे पार्वत्युक्तौ

"मा ऋचो मा यजुस्तात मा साम पठ किञ्चन ।

गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः ॥"

पाद्मे श्रीरामाष्टोत्तरशतनामस्तोत्रे

"विष्णोरेकैकनामैव सर्ववेदाधिकं मतं" इति ।

अथ अश्रद्दधाने इत्यादिनोपदेष्टुरपराधं दर्शयित्वोपदेशस्याह श्रुत्वेति । यतः अहंममादिपरमः अहन्ताममताद्येकतात्पर्येण तस्मिन्ननादरवान् इत्यर्थः । नामैकं यस्य वाचि स्मरणपथगतम् इत्यादौ देहद्रविणादिनिमित्तकपाषण्डशब्देनन् च दशापराधा लक्ष्यन्ते पाषण्डमयत्वात् तेषाम् । तथा तद्विधानाम् एवापराधान्तरम् उक्तं पाद्मवैशाखमाहात्म्ये

"अवमन्य च ये यान्ति भगवत्कीर्तनं नराः ।

ते यान्ति नरकं घोरं तेन पापेन कर्मणा ॥" इति ।

एषां चापराधानाम् अनन्यप्रायश्चित्तत्वम् एवोक्तं तत्रैव

"नामापराधयुक्तानां नामान्येव हरन्त्यघम् ।

अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च ॥" इति ।

अत्र स्तेनप्रभृतिष्वपराधे तु तत्सन्तोषार्थम् एव सन्ततनामकीर्तनादिकं समुचितम् । अम्बरीषचरितादौ तदेकक्षम्यत्वेनापराधानां दर्शनात् । उक्तं च नामकौमुद्याम् "महदपराधस्य भोग एव निवर्तकः तदनुग्रहो वा" इति । तस्माद् अगत्यन्तराभावात् साधूक्तम् "एतन्निर्विद्यमानानां" इति ॥ इति नामस्मरणमाहात्म्यं समर्थितं भवति ।। तदेतन्नामकीर्तनमाहात्म्यं 25 तरंगे -

"रसिकानि कीर्तनानि गायता राधिकापतेः । तस्मिन्नेव रसः स्याच्चेत् तर्हि तद्धि सुगायनम्" इत्यादिना प्रक्रुत्य कीर्तनविधिः वर्णिता ।।

अपरे पुनराचार्या भगवदनुग्रहावगतभगवन्नाममाहात्म्या एवमाहुः ।

द्विविधमधिकारिविशेषणम् ।अर्थसिद्धं, श्रुत्येकसिद्धञ्च ।तत्राद्यं कर्म्मस्वरूपसिद्धावुपयुज्यते । यथा सामर्थ्यविद्वत्तादि । न ह्यसमर्थेनाविदुषा शक्यते कर्म्म कर्तुम् । द्वितीयं तु फलसिद्धौ यथा राजत्वादि, न हि तद्विना कर्म्मस्वरूपं न सिध्यति, अन्येन त्वनुष्ठितात्फलं न भवति ।इदमेवमितिनिश्चयस्तु न श्रुत्येकसिद्धमधिकारिविशेषणम् । "राजाराजसूयेन यजेत" इतिवत्तादृशनिश्चयवान् कुर्यादिति श्रुत्यभावात्, बहुवित्तव्ययाऽऽयाससाध्ये कर्म्मण्यन्वयव्यतिरेकाभ्यां प्रवृत्तिहेतुत्वेन तदुपयोगावधारणाच्च । अत आर्थिकमस्य तत्राधिकारनिमित्तत्वम् । संकीर्त्तने तीषत्प्रयत्नसाध्यत्त्वात् तादृशनिश्चयमन्तरेणापि प्रवृत्तिसिद्धेर्न तस्याधिकारनिमित्तत्त्वम् । यत्तु "अज्ञश्चाश्रद्धधानश्च" इति वचनम्, तदज्ञस्यैवाश्रद्धानस्यापि प्रवृत्त्यभावमात्रपरम् । "यन्नामकीर्त्तने"त्यादिवाक्यत्रयं त्वर्थवादबुद्धिनिषेधपरं न श्रद्धावतोऽधिकारप्रतिपादनपरम् । ।

तदेतदादिकं संगृह्य निरूपितं 247 तरंगे हरिभक्तिसुधासिन्धौ-

"**शास्त्रे नवविधा भक्तिः प्रोक्ता तत्रादिमा श्रुतिः ।**
सा यस्य परिपक्वा स्यात् तस्य सा सुलभाखिला ।।" इत्यादिना ।।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् भगवद्भक्तिरेव परमपुरुषार्थरूपा अस्ति। सा साध्यरूपा साधनरूपा चेति द्विविधा। मोक्षस्य परमं कारणं हरिभक्तिरेव। अत्र भक्तिरसस्य अलौकिकत्वं, तस्य परमानन्दस्वरूपत्वं च प्रतिपादितम्। भगवन्नामसंकीर्तनं कलौ परमं साधनम् अस्ति। तत्र दशापराधानां वर्जनं कृत्वा क्रियमाणं कीर्तनं सद्यः फलदं भवति। तदेवं मोक्षस्वरूपादिनिश्चयानन्तरं तस्य प्रयतमानः भक्तः मोक्षहेतुभूतभक्तिप्रपत्त्यादिना भगवत्प्रीतिसम्पादनमुखेन भगवत्सम्मुखो भूत्वा भगवदेकशरणो मुक्तः भवति।

४. सन्दर्भसूची (References)

[१] पातञ्जलयोगसूत्रम् - २.१५

[२] तैत्तिरीयोपनिषद् - २.४ (तथा च २.९)

[३] बृहदारण्यकोपनिषद् - ४.३.३२

[४] तैत्तिरीयोपनिषद् - २.७

[५] तैत्तिरीयोपनिषद् - ३.६

[६] मुण्डकोपनिषद् - २.१.१ (तथा च बृहदारण्यकोपनिषद् - २.१.२०)

[७] श्रीमद्भगवद्गीता - १५.७

[८] ब्रह्मसूत्रम् - २.३.४३

[९] ब्रह्मसूत्रम् - ४.४.१७

[१०] न्यायवार्त्तिकतात्पर्यटीका (तथा च अन्येषु शास्त्रग्रन्थेषु प्रसिद्धा उक्तिः)

[११] तैत्तिरीयोपनिषद् - २.७

[१२] बृहदारण्यकोपनिषद् - ४.४.२२

[१३] आपस्तम्बश्रौतसूत्रम् (मीमांसान्यायः)

५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भागवतपुराणम्.

२. गोस्वामी, जीवः. क्रमसन्दर्भः (भागवतटीका).

३. सरस्वती, मधुसूदनः. भक्तिरसायनम्.

४. भरतमुनिः. नाट्यशास्त्रम्.

५. पद्मपुराणम्.

६. स्कन्दपुराणम्.

७. हरिभक्तिसुधासिन्धुः.

८. वर्धमानोपाध्यायाः. द्रव्यकिरणावलीप्रकाशः.

९. पातञ्जलयोगसूत्रम्.

# गीतावलोकनम्

**डा. श्रीनिधि वि**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीमद्भगवद्गीतायाः विविधश्लोकानां, ब्रह्मसूत्राणां, तथा च भाष्यकाराणां मतानां तुलनात्मकं विवेचनं कृतम् अस्ति। विशेषतः 'न मे भक्तः प्रणश्यति' (९.३१) इति प्रतिज्ञायाः, 'नासतो विद्यते भावः' (२.१६) इति श्लोकस्य, तथा च 'अन्तवन्त इमे देहाः' (२.१८) इति श्लोकस्य गभीराशयः अत्र विचारितः। गोपालानन्दमुनि-रामानुजाचार्य-मधुसूदनसरस्वती-शङ्कराचार्यादीनां भाष्याणाम् आधारेण जीवस्य नित्यत्वं, देहस्य अनित्यत्वं, भक्तियोगस्य माहात्म्यं, तथा च जीवानां गमनागमनविषये शास्त्रदृष्टिः अत्र प्रपञ्चिता।

२. विषय-विवेचनम् (Body of the Article)

गीतावलोकनम्

"कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" [१] इति गीतायां दृढतया प्रतिजानीते । तदेव पूर्वत्रापि

"नासतो विद्यते भावः नाभावो विद्यते सतः ।

उभयोरपि दृष्टोऽन्तः अनयोस्तत्वदर्शिभिः ॥" [२]

इत्युच्यते इति भाति । तथाहि असतः - असत्कार्यात्, भावः - सुखं नास्ति । सतः - सत्कर्मणः सकाशात् अभावः दुःखं नास्ति । कर्मणि सत्वं मदायत्तं, भक्तः लोकदृष्ट्या दुष्कर्मकृदपि निर्दुष्ट एव भवति । पापलेपस्तस्य नास्ति' इति स्वभक्तेः अकुतोभयत्वं ब्रवीति । तस्य मोक्षः नियतः इति सतात्पर्यं वदति । असच्छब्दस्य असत्कर्मेत्यर्थः "सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते" [३] इति गीताचार्यः ।

तथा च गीतोक्तं 'न प्रणश्यति' इति प्रमेयम् 'अनियमः' [४] इति सूत्रेण सहानुसन्धेयम् भवति । अत्र शङ्कराचार्यः निर्गुणोपासने विद्यमानम् अधिकारमधिकृत्य ब्रवीति । तथाहि तद्भाष्यम् - 'सगुणासु विद्यासु गतिरर्थवती न निर्गुणायां परमात्मविद्यायाम् इत्युक्तम्' इति । अथ च भाष्यान्ते तत्रापि विद्याविशेषात् एषां देवयानप्रतिपत्तिः इति च अत्र अर्थे शङ्करः गीतामुदाजहार - "शुक्लकृष्णे गती ह्येते" [५] इति । एतेन भाष्येण उत्क्रान्तिविषयकगीता अनेन सूत्रेण सहानुसन्धेया इत्यर्थः भवति । परन्तु उत्क्रान्तिविषयकवचनं नात्र प्रसक्तम् । अथ च विद्याधिकारोऽपि नातीव अत्र सङ्गतः ।

सर्वेषां विद्यादीनां यथा योग्यम् उपासनं कृतवतः कस्यचित् किं यदि मोक्षो न भवति? इति प्रश्नो भवति । अत्रार्थे सूत्रकारेण समाधेयं भवति । तदाह- अनियमः सर्वेषामिति । अतः नैतन्मनसि समीचीनतया लगति । रामानुजीयेऽपि एतत्प्रमेयं निरूपितम् । तथाहि तद्भाष्यम् '- 'अनियमः सर्वेषामविरोधात् शब्दानुमानाभ्याम्' ॥ इति ......... अनियम' इति । सर्वासामेवाभ्युदयप्राप्तिफलानां सगुणानां विद्यानामविशेषेणैषा देवयानाख्या गतिर्भवितुमर्हति । नन्वनियमाभ्युपगमे प्रकरणविरोध उक्तः । नैषोऽस्ति विरोधः शब्दानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः । तथाहि श्रुतिः - "तद्य इत्थं विदुः" [६] इति पञ्चाग्निविद्यावतां देवयानं पन्थानमवतारयन्ति "ये चेमेऽरण्ये श्रद्धातप इत्युपासते" [७] इति विद्यान्तरशीलानामपि पञ्चाग्निविद्या समानमार्गतां गमयति ....' इति । अनेन प्रकरणेन ब्रह्मसूत्रभाष्येऽपि एवं गीताभाष्येऽपि समानविषयकत्वं भाष्ययोर्वर्तते । तदेव गोपालानन्दीयव्याख्यायामपि दृश्यते इत्युक्तं भवति ।।

"अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।

अनाशिनः अप्रमेयस्य तस्माद् युध्यस्व भारत ॥ १८ ॥" [८]

अत्र गोपालानन्दभाष्ये – अनाशिनः नाशानर्हस्य अप्रमेयस्य चक्षुरादिकरणैरुपाधिवत् प्रमातुमयोग्यस्य नित्यस्य शरीरिणः प्रतिशरीरं भिन्नस्य जीवात्मनः इमे चक्षुरादिकरणैः

प्रमेयाः देहाः वपूंषि अन्तो विनाशो अस्ति येषां त अन्तवन्त उक्ताः । हे भारत तस्मात् देहात्मनोर्विनाशित्वाविनाशित्वधर्माद् हेतोः युध्यस्व इति व्याख्या कृता । अत्र मधुसूदनस्तु अन्यथा अस्य भावमाह- यथोक्तं मधूसूदनीये-: ननु स्फुरणरूपस्य सतः कथम् अविनाशित्वं तस्य देहधर्मत्वाद् , देहस्य चानुक्षणविनाशाद् इति भूतचैतन्यवादिनस्तान् निराकुर्वन्नासतो विद्यते भाव इत्यतः एतद्विवृणोति अन्तवन्त इति । अन्तवन्तो विनाशिन इमेऽपरोक्षा देहा उपचितापचितरूपत्वाच्छरीराणि । बहुवचनात् स्थूलसूक्ष्मकारणरूपा विराड्सूत्र-अव्याकृताख्याः समष्टि-व्यष्ट्यात्मनः सर्वे नित्यस्याविनाशिन एव शरीरिण आध्यासिकसम्बन्धेन शरीरवत एकस्य आत्मनः स्वप्रकाशस्फुरणरूपस्य सम्बन्धिनो दृश्यत्वेन भोग्यत्वेन चोक्ताः श्रुतिभिर्ब्रह्मवादिभिश्च । तथा च तैत्तिरीयके 'अन्नमयाद्यानन्दमयानन्तान् पञ्च कोशान् कल्पयित्वा तदधिष्ठानम् अकल्पितं "ब्रह्म पुच्छं प्रतिष्ठा" [९] इति दर्शितम् । तत्र पञ्चीकृतपञ्चमहाभूततत्कार्यात्मको विराण्मूर्तराशिरन्नमयकोशः स्थूलसमष्टिः । तत्कारणीभूतो 'पञ्चीकृतपञ्चमहाभूततत्कार्यात्मको हिरण्यगर्भः सूत्रम् अमूर्तराशिः सूक्ष्मसमष्टिः

"त्रयं वा इदं नाम रूपं कर्म" [१०]

इति बृहदारण्यकोक्तान्नात्मकः सर्वकर्मात्मकत्वेन क्रियाशक्तिमात्रम् आदाय प्राणमयकोश उक्तः । नामात्मकत्वेन ज्ञानशक्तिमात्रम् आदाय मनोमयकोश उक्तः । रूपात्मकत्वेन तदुभयाश्रयतया कर्तृत्वम् आदाय विज्ञानमयकोश उक्तः । ततः प्राणमयमनोमयविज्ञानमयात्मैक एव हिरण्यगर्भाख्यो लिङ्गशरीरकोशः । तत्कारणीभूतस्तु मायोपहितचैतन्यात्मा सर्वसंस्कारशेषोऽव्याकृताख्य आनन्दमयकोशः । ते च सर्व एकस्यैवात्मनः शरीराणीत्युक्तम् ।

"तस्यैष एव शारीर आत्मा यः पूर्वस्य" [११]

इति । तस्य प्राणमयस्यैष एव शरीरे भवः शारीर आत्मा यः सत्यज्ञानादिलक्षणो गुहानिहितत्वेनोक्तः पूर्वस्यान्नमयस्य । एवं प्राणमयमनोमयविज्ञानमयानन्दमयेषु योज्यम् ।

अथवेमे सर्वे देहास्त्रैलोक्यवर्तिसर्वप्राणिसम्बन्धिन एकस्यैवात्मन उक्ता इति योजना । तथा च श्रुतिः

“एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥” [१२]

इति सर्वशरीरसम्बन्धिनम् एकम् आत्मानं नित्यं विभुं दर्शयति ।

ननु नित्यत्वं यावत्कालस्थायित्वं तथा चाविद्यादिवत् कालेन सह नाशेऽपि तदुपपन्नम् इत्यत आह अनाशिन इति । देशतः कालतो वस्तुतश्च परिच्छिनस्याविद्यादेः कल्पितत्वेनानित्यत्वेऽपि यावत्कालस्थायिस्वरूपम् औपचारिकं नित्यत्वं व्यवह्रियते ।

“यावद्विकारं तु विभागो लोकवत्” [१३]

इति न्यायात् । आत्मनस्तु परिच्छेदत्रयशून्यस्याकल्पितस्य विनाशहेत्वाभावान्मुख्यम् एव कूटस्थनित्यत्वं न तु परिणामिनित्यत्वं यावत्कालस्थायित्वं चेत्यभिप्रायः ।

नन्वेतादृशे देहिनि किंचित् प्रमाणम् अवश्यं वाच्यम् । अन्यथा निष्प्रमाणस्य तस्यालीकत्वापत्तेः शास्त्रारम्भवैयर्थ्यापत्तेश्च । तथा च वस्तुपरिच्छेदो दुष्परिहरः

“शास्त्रयोनित्वात्” [१४]

इति न्यायाच्च । अत अप्रमेयस्येति इत्युक्तम् ।

“एकधैवानुद्रष्टव्यम् एतदप्रमयं ध्रुवम्” [१५]

“न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयम् अग्निः ।

तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति” [१६]

इति च श्रुतिः। प्रथमवाक्ये अप्रमयम् इत्यस्य अप्रमेयम् इत्यर्थः ।

द्वितीयवाक्यार्थस्तु- स्वप्रकाशचैतन्यरूप एवात्मा तस्य सर्वभासकस्य स्वभानार्थं न स्वभास्यापेक्षा, किन्तु कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थं कल्पितवृत्तिविशेषापेक्षा ।

कल्पितस्यैव कल्पितविरोधित्वात् । इति । यक्षानुरूपो बलिः इति न्यायात् । तथा च सर्वकल्पितनिवर्तकवृत्तिविशेषोत्पत्त्यर्थं शास्त्रारम्भः, तस्य तत्त्वमस्यादिवाक्यमात्राधीनत्वात् । स्वतः सर्वदाभासमानत्वात् सर्वकल्पनाधिष्ठानत्वाद् दृश्यमात्र-भासकत्वाच्च न तस्य तुच्छत्वापत्तिः । तथा च

"एकमेवाद्वितीयं" "सत्यं ज्ञानमनन्तं ब्रह्म" [१७]

इत्यादि शास्त्रम् एव स्वप्रमेयानुरोधेन स्वस्यापि कल्पितत्वम् आपादयति अन्यथा स्वप्रामाण्यानुपपत्तेः ।

**कल्पितस्य चाकल्पितपरिच्छेदकत्वं नास्तीति मतम्** । आत्मनः स्वप्रकाशत्वं च युक्तितोऽपि भाष्यादिषूपपादितम् । तथा हि यत्र जिज्ञासोः संशयविपर्ययव्यतिरेकप्रमाणानाम् अन्यतमम् अपि नास्ति तत्र तद्विरोधि ज्ञानम् इति सर्वत्र दृष्टम् । अन्यथा त्रितयान्यतमापत्तेः । आत्मनि चाहं वा नाहं वेति न कस्यचित् संशयः । नापि नाहम् इति विपर्ययो व्यतिरेकः प्रमा वेति तत् स्वरूपप्रमा सर्वदा अस्तीति वाच्यं तस्य सर्वसंशयविपर्ययधर्मित्वात् ।

"धर्म्यंशे सर्वम् अभ्रान्तं प्रकारे तु विपर्ययः" इति न्यायात् । अत एवोक्तम्

"प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ।

कुर्वन्त्येव प्रमां यत्र तदसम्भावना कुतः ॥" [१८] इति ।

अत्र प्रमाभासो नाम संशयः । स्वप्रकाशे सद्रूपे धर्मिणि प्रमाणाप्रमाणयोर्विशेषो नास्तीत्यर्थः । आत्मनोऽभासमानत्वे च घटज्ञानं मयि जातं न वेत्यादिसंशयः स्यात् । न चान्तरपदार्थे विषयस्यैव संशयादिप्रतिबन्धकत्वस्वभावः । बाह्यपदार्थे क्लृप्तेन विरोधिज्ञानेनैव संशयादिप्रतिबन्धसंभव आन्तरपदार्थे स्वभावभेदकल्पनाया अनौचित्यात् । अन्यथा सर्वविप्लवापत्तेः । आत्ममनोयोगमात्रं चात्मसाक्षात्कारे हेतुः । यस्य च ज्ञानमात्रे हेतुत्वाद् घटादिभानेऽप्यात्मभानं समूहालम्बनन्यायेन तार्किकाणां प्रवरेणापि दुर्निवारं । न च चाक्षुषत्वमानसत्त्वादिसङ्करः ।

लौकिकत्वालौकिकत्ववद् अंशभेदेनोपपत्तेः । सङ्करस्यादोषत्वाच्चाक्षुषत्वादेर्जातित्वान भ्युपगमाद् वा । व्यवसायमात्र एवात्मभानसामग्र्या विद्यमानत्वादनुव्यवसायोऽप्यपास्तः । न च व्यवसायभानार्थं सः । तस्य दीपवत् स्वव्यवहारे सजातीयानपेक्षत्वात् । न हि घटतज्ज्ञानयोरिव व्यवसायानुव्यवसाययोरपि विषयत्वविषयित्वव्यवस्थापकं वैजात्यम् अस्ति व्यक्तिभेदातिरिक्तवैधर्म्यानभ्युपगमात् । विषयत्वावच्छेदकरूपेणैव विषयित्वाभ्युपगमे घटतज्ज्ञानयोरपि तद्भावापत्तिरविशेषात् ।

ननु यथा घटव्यवहारार्थं घटज्ञानम् अभ्युपेयते तथा घटज्ञानव्यवहारार्थं घटज्ञानविषयं ज्ञानम् अभ्युपेयं व्यवहारस्य व्यवहर्तव्यज्ञानसाध्यत्वाद् इति चेत् । का अनुपपत्तिरुद्भाविता देवानांप्रियेण स्वप्रकाशवादिनः । नहि व्यवहर्तव्यभिन्नत्वम् अपि ज्ञानविशेषणं व्यवहारहेतुतावच्छेदकं गौरवात् । तथा चेश्वरज्ञानवद्योगिज्ञानवत् प्रमेयम् इति ज्ञानवच्च स्वेनैव स्वव्यवहारोपपत्तौ न ज्ञानान्तरकल्पनावकाशः । अनुव्यवसायस्यापि घटज्ञानव्यवहारहेतुत्वं किं घटज्ञानज्ञानत्वेन किं वा घटज्ञानत्वेनैवेति विवेचनीयम् । उभयस्यापि तत्र सत्त्वात् । तत्र घटव्यवहारे घटज्ञानत्वेनैव हेतुतायाः क्लृप्तत्वात् तेनैव रूपेण घटज्ञानव्यवहारे अपि हेतुतोपपत्तौ न घटज्ञानज्ञानत्वं हेतुतावच्छेदकम् । गौरवान्मानाभावाच्च । तथा च नानुव्यवसायसिद्धिर्एकस्यैव व्यवसायस्य व्यवस्थातरि व्यवसेये व्यवसाये च व्यवहारजनकत्वोपपत्तेरिति त्रिपुटीप्रत्यक्षवादिनः प्राभाकराः ।

औपनिषदास्तु मन्यन्ते स्वप्रकाशज्ञानरूप एवात्मा न स्वप्रकाशज्ञानाश्रयः कर्तृकर्मविरोधेन तद्भानानुपपत्तेः । ज्ञानभिन्नत्वे घटादिवत् जडत्वेन कल्पितत्वापत्तेश्च । स्वप्रकाशज्ञानमात्रस्वरूपोऽप्यात्मा अविद्योपहितः सन् साक्षीत्युच्यते । वृत्तिमदन्तःकरणोपहितः प्रमातेत्युच्यते । तस्य चक्षुरादीनि करणानि । स चक्षुरादिद्वारा अन्तःकरणपरिणामेन घटादीन् व्याप्य तदाकारो भवति । ततो घटावच्छिन्नचैतन्यं प्रमात्रभेदात् स्वाज्ञानं नाशयदपरोक्षं भवति । घटं च स्वावच्छेदकं स्वतादात्म्याध्यासाद् भासयति । अन्तःकरणपरिणामश्च वृत्त्याख्योऽतिस्वच्छः स्वावच्छिन्नेनैव चैतन्येन भास्यत इत्यन्तःकरणतद्वृत्तिघटानाम् अपरोक्षता । तदेतद्

आकारत्रयम् अहं जानामि घटम् इति । भासकचैतन्यस्यैकरूपत्वेऽपि घटं प्रति वृत्त्यपेक्षत्वात् प्रमातृता । अन्तःकरणतद्वृत्तीः प्रति तु वृत्त्यनपेक्षत्वात् साक्षितेति विवेकः ।

यस्मादेवं प्रागुक्तन्यायेन नित्यो विभुरसंसारी सर्वदैकरूपश्चात्मा तस्मात् तन्नाशशङ्कया स्वधर्मे युद्धे प्राक्प्रवृत्तस्य तव तस्मादुपरतिर्न युक्तेति युद्धाभ्यनुज्ञया भगवान् आह तस्माद् युध्यस्व भारतेति । अर्जुनस्य स्वधर्मे युद्धे प्रवृत्तस्य तत उपरतिकारणं शोकमोहौ । तौ च विचारजनितेन विज्ञानेन बाधितौ इत्यपवादापवादे उत्सर्गस्य स्थितिरिति न्यायेन युध्यस्वेत्यनुवादो न विधिः । यथा कर्तृकर्मणोः कृति इत्युत्सर्गः । उभयप्राप्तौ कर्मणि इत्यपवादः । अकाकारयोः स्त्रीप्रत्यययोः प्रयोगे नेति वक्तव्यम् इति तदपवादः । तथा च मुमुक्षोर्ब्रह्मणोर्जिज्ञासेत्यत्रापवादापवादे पुनरुत्सर्गस्थितेः कर्तृकर्मणोः कृतीत्यनेनैव षष्ठी । तथा च कर्मणि चेति निषेधाप्रसाराद् ब्रह्मजिज्ञासेति कर्मषष्ठीसमासः सिद्धो भवति । तद्वदिवात्रापीति । तदेतत्सर्वमभिप्रेत्य गोपालानन्दभाष्ये अप्रमेयस्य इत्यस्य चक्षुरादिकरणैः उपाधिविषयवत् प्रमातुमयोग्यस्य नित्यस्य शरीरिणः-प्रतिशरीरं भिन्नस्य जीवात्मनः वपूंषि अन्तवन्तः उक्ताः इत्ययमर्थ उक्तः ।। रामानुजभाष्ये देहस्य विनाशित्वे कारणं देहशब्दस्य धातुरूपोल्लेखपुरस्सरं घटादिदृष्टान्तपुरस्सरं एवमेव कर्मावसाने विनाशववत्वं च बृहदारण्यकोपनिषद्वाक्योल्लेखपुरस्सरमुक्तमित्ययं विशेषः अनयोः भाष्ययोः दृश्यते । तथाहि –रामानुजभाष्ये - “दिह उपचये” इत्युपचयरूपा इमे देहा अन्तवन्तः विनाशस्वभावाः । उपचयात्मका हि घटादयोऽन्तवन्तो दृष्टाः । नित्यस्य शरीरिणः कर्मफलभोगार्थतया भूतसंघातरूपा देहाः, “पुण्यः पुण्येन” [१९] इत्यादिशास्त्रैरुक्ताः कर्मावसानविनाशिनः । देहस्तु उपचयात्मकत्वात्, शरीरिणः कर्मफलभोगार्थत्वात्, अनेकरूपत्वात्, व्याप्यत्वाच्च विनाशी । इत्यादि ।।

किंच-

“नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पम् अप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥" [२०]

ननु 'तम् एतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ' [२१] इति श्रुत्या विविदिषां ज्ञानं चोद्दिश्य संयोगपृथक्त्वन्यायेन सर्वकर्मणां विनियोगात् तत्र चान्तःकरणशुद्धेर्द्वारत्वान् मां प्रति कर्मानुष्ठानं विधीयते । तत्र तद् यथेह कर्मजितो लोकः क्षीयत एवम् एवामुत्र पुण्यजितो लोकः क्षीयते [२२] इति श्रुतिबोधितस्य फलनाशस्य सम्भावाज्ज्ञानं विविदिषां चोद्दिश्य क्रियमाणस्य यज्ञादेः काम्यत्वात् सर्वाङ्गोपसंहारेणानुष्ठेयस्य यत् किंचिदङ्गासम्पत्तावपि वैगुण्यापत्तेर्यज्ञेनेत्यादि वाक्यविहितानां च सर्वेषां कर्मणाम् एकेन पुरुषायुषपर्यवसानेऽपि कर्तुम् अशक्यत्वात् कुतः कर्मबन्धं प्रहास्यसीतिफलं प्रत्याशेत्यत आह भगवान् नेहेति ।

अभिक्रम्यते कर्मणा प्रारभ्यते यत् फलं सोऽभिक्रमस्तस्य नाशस्तद् यथेहेत्यादिना प्रतिपादित इह निष्कामकर्मयोगे नास्ति । एतत्फलस्य शुद्धेः पापक्षयरूपत्वेन लोकशब्दवाच्यभोग्यत्वाभावेन च क्षयासम्भवात् । वेदनपर्यन्ताया एव विविदिषायाः कर्मफलत्वाद् वेदनस्य चाव्यवधानेनाज्ञाननिवृत्तिफलजनकस्य फलम् अजनयित्वा नाशासम्भवाद् इह फलनाशो नास्तीति साधूक्तम् । तदुक्तं

"तद् यथेहेति या निन्दा सा फले न तु कर्मणि ।

फलेच्छां तु परित्यज्य कृतं कर्म विशुद्धिकृत् ॥" [२३] इति ।

तथा प्रत्यवायोऽङ्गवैगुण्यनिबन्धनं वैगुण्यम् इह न विद्यते तम् इति वाक्येन नित्यानाम् एवोपात्तदुरितक्षयद्वारेण विविदिषायां विनियोगात् । तत्र च सर्वाङ्गोपसंहारनियमाभावात् । काम्यानाम् अपि संयोगपृथक्त्वन्यायेन विनियोग इति पक्षेऽपि फलाभिसन्धिरहितत्वेन तेषां नित्यतुल्यत्वात् । नहि काम्यनित्याग्निहोत्रयोः स्वतः कश्चिद् विशेषोऽस्ति । फलाभिसन्धितदभावाभ्याम् एव तु काम्यत्वनित्यत्वव्यपदेशः । इदं च पक्षद्वयम् उक्तं वार्तिके

"वेदानुवचनादीनाम् ऐकात्म्यज्ञानजन्मने ।

तमेतम् इति वाक्येन नित्यानां वक्ष्यते विधिः ॥

यद् वा विविदिषार्थत्वं काम्यानाम् अपि कर्मणाम् ।

तमेतम् इति वाक्येन संयोगस्य पृथक्त्वतः ॥" [२४] इति ।

तथा च फलाभिसन्धिना क्रियमाण एव कर्मणि सर्वाङ्गोपसंहारनियमात् तद्विलक्षणे शुद्ध्यर्थे कर्मणि प्रतिनिध्यादिना समाप्तिसम्भवान्नाङ्गवैगुण्यनिमित्तः प्रत्यवायोऽस्तीत्यर्थः । तथास्य शुद्ध्यर्थस्य धर्मस्य तमेतम् इत्यादिवाक्यविहितस्य मध्ये स्वल्पम् अपि सङ्क्षयेतिकर्तव्यतया वा यथाशक्तिभगवदाराधनार्थं किंचिदप्यनुष्ठितं सन् महतः संसारभयात् त्रायते भगवत्प्रसादसम्पादनेनानुष्ठातारं रक्षति ।

"सर्वपापप्रसक्तोऽपि ध्यायन् निमिषम् अच्युतम् ।

भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥" [२५] इत्यादि स्मृतेः ।

'तमेतम् ' इति वाक्ये समुच्चयविधायकाभावाच्चाशुद्धितारतम्यादेवानुष्ठानतारतम्योपपत्तेर्युक्तम् उक्तं कर्मबन्धं प्रहास्यसि इति भावः।

किंच अत्र योगो द्विविधः श्रवणकीर्तनादिभक्तिरूपः, श्रीभगवदर्पितनिष्कामकर्मरूपश्च कीर्तितः । तत्र कर्मण्येवाधिकारः इत्यतः प्राग् भक्तियोग एव निरूप्यते । "निस्त्रैगुण्यो भवार्जुन" [२६] इत्युक्तेर्भक्तेरेव त्रिगुणातीतत्वात् तयैव पुरुषो निस्त्रैगुण्यो भवतीत्येकादशस्कन्धे प्रसिद्धेः । ज्ञानकर्मणोस्तु सात्त्विकत्वराजसत्वाभ्यां निस्त्रैगुण्यत्वानुपपत्तेर्भगवदर्पितलक्षणा भक्तिस्तु कर्मणो वैफल्याभावमात्रं प्रतिपादयति, न तु स्वस्य भक्तिव्यपदेशं प्राधान्याभावादेव । यदि च भगवदर्पितं कर्मापि भक्तिरेवेति मतं, तदा कर्म किं स्यात्? यद्भगवदनर्पितकर्म, तदेव कर्मेति चेन्, न ।

"नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।

कुतः पुनः शश्वदभद्रम् ईश्वरे न चार्पितं कर्म यदप्यकारणम् ॥" [२७]

इति नारदोक्त्या तस्य वैयर्थ्यप्रतिपादनात् । तस्मादत्र भगवच्चरणमाधुर्यप्राप्तिसाधनीभूता केवलश्रवणकीर्तनादिलक्षणैव भक्तिर्निरूप्यते, यथा निष्कामकर्मयोगऽपि निरूपयितव्यः । उभावप्येतौ बुद्धियोगशब्दवाच्यौ ज्ञेयौ

"ददामि बुद्धियोगं तं येन माम् उपयान्ति ते" [२८]

"दूरेण ह्यवरं कर्म बुद्धियोगाद् धनञ्जय" [२९] इति चोक्तेः ।

अथ निर्गुणश्रवणकीर्तनादिभक्तियोगस्य माहात्म्यम् आह नेहेति । इह भक्तियोगेऽभिक्रमे आरम्भमात्रे कृतेऽप्यस्य भक्तियोगस्य नाशो नास्ति । ततः प्रत्यवायश्च न स्यात् । यथा कर्मयोगे आरम्भं कृत्वा कर्मानुष्ठितवतः कर्मनाशप्रत्यवायौ स्याताम् इति भावः ।

ननु तर्हि तस्य भक्त्यनुष्ठातुकामस्य समुचितभक्त्यकरणात् भक्तिफलं तु नैव स्यात् । तत्राह स्वल्पम् इति । अस्य धर्मस्य स्वल्पम् अप्य् आरम्भसमये या किञ्चिन्मात्री भक्तिरभूत् । सापीत्यर्थः । महतो भयात् संसारात् त्रायत एव ।

"यन्नाम सकृच्छ्रवणात् पुल्कसोऽपि विमुच्यते संसाराद्" [३०]

इत्यादिश्रवणात् । अजामिलादौ तथा दर्शनाच्च ।

"न ह्यङ्गोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ।

मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः ॥" [३१]

इति भगवतो वाक्येन सहास्यवाक्यस्यैकार्थम् एव दृश्यते । किन्तु तत्र निर्गुणत्वान्न हि गुणातीतं वस्तु कदाचिद् ध्वस्तं भवतीति हेतुर्उपन्यस्तः । स चेहापि द्रष्टव्यः । न च निष्कामकर्मणोऽपि भगवदर्पणमहिम्ना निर्गुणत्वम् एवेति वाच्यम् "मदर्पणं निष्फलं वा सात्त्विकं निजकर्म तत्" [३२] ॥ इति भगवदर्पितकर्मणः फलश्रवणात् द्विविधयोगनिरूपणमपि समाहितं वेदितव्यम् ।।

द्वितीयाध्याये-

"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।

तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही ॥" [३३]

इति श्लोकस्य सारल्यात् न विशेषतोऽर्थः भाष्यकारैः वर्णितः । परन्तु सूत्रमुखेन दृष्टे सर्वेषामपि गतिसमान्यं भण्यते इति ज्ञायते । भगवानपि-

"बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।

तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥" [३४]

अत्रापि गतिसामान्यमेव भणितम् । परोक्षज्ञानिनोऽपि जायन्ते । अपरोक्षज्ञानिनोऽपि जायन्ते उभयेषामपि जन्मना ज्ञानतिरोभावः सङ्गच्छते । भारते श्रूयते- दुर्योधनोऽपि गतस्मृतिः स्वात्मानमवसादयितुं निरशनमाश्रयते । तदा असुरा आगत्य तं पाताललोकम् आनीय बोधयन्ति । यथोक्तं तात्पर्यनिर्णये-

"ततो निशायां प्राप्तायां स्वपक्षे प्रविषीदति ।

मन्त्रयित्वाऽसुरैः कृत्या निर्मिता होमकर्मणा ।

शुक्रेणोत्पादिता कृत्या सा प्रसुप्तेषु मन्त्रिषु ॥

धार्तराष्ट्रं समादाय ययौ पाताळमाशु च ।

अतः सम्बोधयामासुः दैत्या दुर्योधनं नृपम् ॥

त्वं दिव्यः पुरुषो वीरः स्पृष्टोऽस्माभिः प्रतोषितात् ।

तपसा शङ्कराद् वज्रकायोऽवध्यश्च सर्वदा ॥

अस्माकं पक्षभूतस्त्वं देवानां चैव पाण्डवाः ।

इदानीं सर्वदेवानां वरात् त्वं विजितो रणे ॥

वयं तदा करिष्यामो यथा जेष्यसि पाण्डवान् ।

कृष्णेन निहतश्चैव नरकः कर्ण आस्थितः ॥

स च कृष्णार्जुनाभावं करिष्यति न संशयः ।
भीष्मादींश्च वयं सर्वानाविश्याथ जयामहे ॥
तपसा वर्द्धयिष्यामस्त्वां कर्णादींश्च सर्वशः ।
तस्माद् गत्वा पालयस्व राज्यं राजन्नपेतभीः ॥
इदं कस्यापि नाऽख्येयं सुगुप्तं भूतिवर्द्धनम् ।
इत्युक्त्वा कृत्यया भूयः स्वस्थाने स्थापितो नृपः ॥
उमया निर्मितात्मार्द्धमुत्तरं हरनिर्मितम् ।
ज्ञात्वैवावध्यतां चैव राज्ये बुद्धिं चकार सः ।
नोवाच कस्यचित् नेषु स्वानुभूतं सुयोधनः ।
प्रभातायां तु शर्वर्य्यां पुनः कर्णो वचोऽब्रवीत् ॥
भृत्यैस्तवैव पार्थैर्यन्मोचितोऽसि परन्तप ।
तेन मान्योधिकं लोके यद् भृत्या एव तादृशाः ॥
किमु त्वं राजशार्दूल तदुत्तिष्ठ स्थिरो भव ।
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ।
वहन् द्रुततरं प्रागादवरोहणतः परम् ॥
तमुद्वहन् धरणिधरेन्द्रगौरवं महासुरो विगतरयोनिजं वपुः ।
स आस्थितः पुरटपरिच्छदो बभौ तटिद्द्युमानुडुपतिमानिवाम्बुदः ॥
निरीक्ष्य तद्वपुरलमम्बरेचरं प्रदीप्तदृग्भृकुटितटोग्रदंष्टकम् ।
ज्वलेच्छिकं कटककिरीटकुण्डलत्विषाऽद्भुतं हलधर ईषदत्रसत् ॥
अथागतस्मृतिरभयो रिपुं बलो विहायसोर्ध्वं च हरन्तमात्मनः ।

रुषाऽहनाच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिववज्ररंहा ॥

स आहतः सपदि विशीर्णशीर्षिको मुखाद् वमन् रुधिरमपस्मृतोऽसुरः ।

महारवं व्यसुरपत् समीरयन् गिरिर्यथा मघवत आयुधाहतः ॥" [३५]

तदेवं बलरामस्यापि जातिस्मरणकारणं कृष्णवचनमासीत् ।

अतः गमनागमने एव सूत्रे प्रस्तुते । तथाहि-

"अनिष्टादिकारिणामपि च श्रुतम्" [३६]

इति सूत्रे पुण्यकृत एव गच्छन्ति इति पूर्वस्मिन् प्रकरणे निर्णीतम् । कथमन्ये न गच्छन्तीति प्रश्नः । अतः तदितरेऽपि गच्छन्ति इति उक्तम् 'अनिष्टादि कारिणाम्' इति च श्रुतम् ।

अत्र शाङ्करभाष्यमेवं भवति - 'यतोऽनिष्टादिकारिणामपि चन्द्रमण्डलं गन्तव्यत्वेन श्रुतम् । यथाहि अविशेषेण कौषीतकिनः समामनन्ति - "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" [३७] इति ।

देहारम्भोऽपि च पुनर्जायमानानां नान्तरेण चन्द्रप्राप्तिमवकल्पते । पञ्चम्यामाहुता-वाहुतिसङ्ख्यानियमात् । यस्मात्सर्व एव चन्द्रमसमासीदेयुः । इष्टादिकारिणामितरेषाञ्च समानगतित्वं न युक्तमिति चेत् न, इतरेषां चन्द्रमण्डले भोगाभावात्' ।

रामानुजभाष्ये तु 'केवलेष्टापूर्तदत्तकारिणश्चन्द्रमसं गत्वा सानुशया एव निवर्तन्त इत्युक्तम् इदानीमनिष्टादिकारिणोऽपि चन्द्रमसं गच्छन्ति, नेति चिन्त्यते । ये विहितं कुर्वन्ति, निषिद्धञ्च कुर्वन्ति, न, उभयेऽपि पापकर्माणोऽनिष्टादिकारिणः । किं युक्तम् ? तेऽपि चन्द्रमसं गच्छन्तीति; कुतः ? तेषामपि हि तद्गमनं श्रुतं

"ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति"

इत्यादिविशेषेण सर्वेषामपि गतिश्रवणात्' ।

अत्र माध्वभाष्यम् एवं भवति 'तद्भूय इह शुभकृतो ये वा

अशुभकृतस्तेऽशुभमनुभूयाऽवर्तन्ते पुनः कुर्वन्ति पुनर्गच्छन्ति पुनरागच्छन्ति' इति भावेयश्रुतौ । देहाद्गमनं देहं प्रत्यागमनं परोक्षज्ञानिनाम् अपरोक्षज्ञानिनां विदुषामविदुषामिति सर्वेषामपि समम्, इत्येव सूत्रार्थः । तथा च वासांसि जीर्णानि इत्यनेन कृष्णवचनेन अनिष्टादिकारिणामपि च श्रुतमिति व्यासवचनं निर्णीतम् ।

अथ च उभयोः सम्मेलनेन अपूर्वत्वमपि न नष्टम् । व्यासवचनम् उपलक्षणतया प्रवृत्तं, सर्वविधानां जीविनां गतिमपि लक्ष्ययति । कृष्णवचनन्तु जातिस्मरत्वं बहूनि मे व्यतीतानि इत्यनेन कटाक्षीकृत्य वासांसि जीर्णानि इत्यनेन दृष्टान्तमुखेन जीवनित्यत्वं देहानित्यत्वञ्च लक्ष्ययति । तथा च सूत्रेण गीतायाः गीतया च सूत्रस्य नूतनायामः गोचरो भवति ।।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् भगवद्गीतायाः श्लोकाः न केवलं उपदेशपराः, अपि तु वेदान्तसूत्रैः, उपनिषद्भिः, पुराणैश्च सह संवादिनः सन्ति। 'न मे भक्तः प्रणश्यति' इति वचनं ब्रह्मसूत्रस्य 'अनियमः सर्वेषाम्' इति सूत्रेण सङ्गतं भवति। देहात्मविवेकः, जीवस्य नित्यत्वं, देहस्य अनित्यत्वं च गीतायाः मुख्यः सिद्धान्तः। निष्कामकर्मयोगः चित्तशुद्धिद्वारा ज्ञानसाधनं भवति, तत्र च अभिक्रमनाशादिदोषाः न सन्ति। पुनर्जन्मविषये सर्वेषां जीवानां गतिसाम्यं सूत्रगीतादिभिः प्रतिपादितम् इति निर्गलितार्थः।

४. सन्दर्भसूची (References)

[१] श्रीमद्भगवद्गीता - ९.३१

[२] श्रीमद्भगवद्गीता - २.१६

[३] श्रीमद्भगवद्गीता - १७.२६

[४] ब्रह्मसूत्रम् - ३.३.३१ (अनियमः सर्वेषामविरोधात् शब्दानुमानाभ्याम्)

[५] श्रीमद्भगवद्गीता - ८.२३

[६] छान्दोग्योपनिषद् - ५.१०.१

[७] छान्दोग्योपनिषद् - ५.१०.१

[८] श्रीमद्भगवद्गीता - २.१८

[९] तैत्तिरीयोपनिषद् - २.५.१

[१०] बृहदारण्यकोपनिषद् - १.६.१

[११] बृहदारण्यकोपनिषद्

[१२] श्वेताश्वतरोपनिषद् - ६.११

[१३] ब्रह्मसूत्रम् - २.१.१४ (शङ्करभाष्ये उद्धृतन्यायः)

[१४] ब्रह्मसूत्रम् - १.१.३

[१५] बृहदारण्यकोपनिषद् - ४.४.२०

[१६] कठोपनिषद् - २.२.१५ / मुण्डकोपनिषद् - २.२.१०

[१७] छान्दोग्योपनिषद् - ६.२.१ / तैत्तिरीयोपनिषद् - २.१.१

[१८] वार्तिकम् (सुरेश्वराचार्यः)

[१९] बृहदारण्यकोपनिषद् - ४.४.५

[२०] श्रीमद्भगवद्गीता - २.४०

[२१] बृहदारण्यकोपनिषद् - ४.४.२२

[२२] छान्दोग्योपनिषद् - ८.१.६

[२३] वार्तिकम्

[२४] वार्तिकम् (बृहदारण्यकभाष्यवार्तिकम् - १.१.१५)

[२५] स्मृतिः (विष्णुधर्मोत्तरादि)

[२६] श्रीमद्भगवद्गीता - २.४५

[२७] श्रीमद्भागवतपुराणम् - १.५.१२

[२८] श्रीमद्भगवद्गीता - १०.१०

[२९] श्रीमद्भगवद्गीता - २.४९

[३०] श्रीमद्भागवतपुराणम् - ६.१६.४४

[३१] श्रीमद्भागवतपुराणम् - ११.२९.२०

[३२] श्रीमद्भागवतपुराणम् - ११.२५.२३

[३३] श्रीमद्भगवद्गीता - २.२२

[३४] श्रीमद्भगवद्गीता - ४.५

[३५] महाभारततात्पर्यनिर्णयः - मध्वाचार्यः

[३६] ब्रह्मसूत्रम् - ३.१.१२

[३७] कौषीतकि-उपनिषद् - १.२

५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भगवद्गीता.

२. बादरायणः. ब्रह्मसूत्रम्.

३. शङ्कराचार्यः. ब्रह्मसूत्रभाष्यम् / गीताभाष्यम्.

४. रामानुजाचार्यः. श्रीभाष्यम् / गीताभाष्यम्.

५. मध्वाचार्यः. ब्रह्मसूत्रभाष्यम् / महाभारततात्पर्यनिर्णयः.

६. मधुसूदनसरस्वती. गूढार्थदीपिका.

७. गोपालानन्दमुनिः. गीताभाष्यम्.

८. उपनिषदः.

९. श्रीमद्भागवतपुराणम्.

# श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः एकादश-द्वादशाध्यायभाष्यस्य तुलनात्मकमध्ययनम्

**श्रीकर कुलकर्णि**
**संशोधनसहायकः**

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीरामानुजाचार्य-श्रीगोपालानन्दमुनिविरचितयोः गीताभाष्ययोः एकादश-द्वादशाध्यायविषयिणी तुलना कृता अस्ति। एकादशाध्याये विश्वरूपदर्शनप्रसङ्गे भाष्यकारयोः मतभेदः, शब्दार्थविवेचनं, तथा च भगवतः सर्वात्मत्व-सर्वव्यापकत्वयोः स्वरूपं विमृष्टम्। द्वादशाध्याये सगुण-निर्गुणोपासनयोः (भक्तियोग-अक्षरयोगयोः) तारतम्यं, भक्तस्य लक्षणानि, तथा च एकान्तिकभक्तेः श्रेष्ठत्वं प्रतिपादितम्। विशेषतः गोपालानन्दमुनिना दर्शिताः अक्षरब्रह्मोपासनादिविशेषाः अत्र विचारिताः।

२. विषय-विवेचनम् (Body of the Article)

श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः एकादशाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

एकादशाध्यायारम्भे पूर्वाध्यायसारः एवं रामानुजभाष्ये उक्तः- तद्यथा - "एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतः सर्वात्मत्वं तत एव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित् वं चोक्तम्" इति । अत्र स्पष्टतया पूर्वाध्यायार्थः न झटिति ज्ञायते । भगवतः सर्वात्मत्वप्रतिपादनमुखेन भगवतः विभूतयः उक्ताः इति परामर्शेन बोद्धव्यो भवति । दशमाध्यायस्तु विभूतिवर्णनाध्याय इति प्रसिद्धम् । तस्योल्लेख एव न कृतः रामानुजभाष्ये अवतारिकायाम् । गोपालानन्दभाष्ये तु स्पष्टमुक्तं- "पूर्वं दशमाध्याये

सर्वकारणत्वसर्वनियन्तृत्वादिसकलैश्वर्यसम्पन्नस्य परमेश्वरस्य विभूतयो निरूपिताः" ।।

"अध्यात्मसंज्ञितम्" इत्यस्य व्याख्याने देहात्मविवेकविषयकं वचः "अशोच्यानन्वशोचस्त्वम्" [१] इत्यारभ्य प्रवृत्त इति गोपालानन्दभाष्ये । तदसंगतमिति भाति। यतः श्रीकृष्णवचने देहानित्यत्वोपदेशः "न त्वेवाहं जातु नासम्" [२] इत्यारभ्येति ज्ञायते । अत एव रामानुजभाष्ये तथैवोल्लिखितः । तेन पूर्वश्लोकोदाहरणस्य भावः न स्पष्टीभवति ।।

तथा "भवाप्ययौ हि भूतानाम्" [३] इति श्लोकस्य व्याख्याने हिशब्दार्थः भाष्ययोरन्यथा व्याख्यातः दृश्यते । हिशब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थ इति रामानुजीये । "हि निश्चितम्" इति गोपालानन्दभाष्ये । कथमेवं एकस्यैव शब्दस्यैतादृशविभिन्नार्थत्वमुक्तमिति न ज्ञायते ।।

दशमाध्यायान्ते उक्तस्य व्याप्तरूपस्य विश्वरूपापरनामकस्य वर्णनमस्मिन्नध्याये क्रियते ध्यानसौकर्याय ॥ तत्रादावर्जुनो विश्वरूपं दिदृक्षुः प्रार्थयते । भगवान् स्वविश्वरूपस्य मांसचक्षुषा द्रष्टुमशक्यत्वात् दिव्यचक्षुर्दानपूर्वकं स्वविश्वरूपमाविष्कृत्य पश्येत्यर्जुनं विधत्ते ॥

अनेकमुखबाहूरुपादाद्यवयवोपेतम् अनेकदिव्याभरणमेकोद्यतायुधम् अनेकादित्यसङ्काशं सर्वाश्चर्यमयं तद्रूपं तत्रैकदेशे कृत्स्नं जगद् दृष्ट्वा विस्मयाविष्टो हृष्टरोमा धनञ्जयो देवं शिरसा प्रणम्य अञ्जलिपुटं कृत्वा विज्ञापयते । हे भगवन् जगद्व्याप्ते त्वद्विश्वरूपे नाभिकमले स्थितं ब्रह्मणं तदङ्कगं हरं तदङ्ग विशेषेषु सर्वदेवांश्च पश्यामि । अनन्तमिदं रूपम् । त्वमेव परमाक्षरो भगवान् । यदि मद्वदन्येऽपि रूपमेतत् पश्यन्ति तर्हि मद्भीता भवेयुः । सर्वेऽस्मदीयाः कौरवेयाश्च ते वक्त्राणि त्वरमाणा विशन्ति ।

केचिद्दशनान्तरेषु विलग्नाः सञ्चूर्णितशिरसो दृश्यन्ते । तवोग्रा भासो जगत्समग्रं प्रतपन्ति । को भवानुग्ररूप इति । ज्ञातभगवत्स्वरूपोऽपि पार्थो विशेषज्ञानार्थं

पृच्छतीति द्रष्टव्यम् ॥

एवमर्थितो भगवानाह । कालोऽहं लोकान् संहर्तुं प्रवृत्तः । त्वदादीन् कश्चित् विहायान्ये सर्वे नावशिष्यन्ति । तस्माद्युद्धसन्नद्धो भव । मयैव हतांस्त्वं जहि । समृद्धं राज्यं भुंक्ष्वेति । एतच्छ्रुत्वाऽतिभीतोऽर्जुनः पुनर्भगवन्तं स्तुत्वा वारंवारं नत्वा प्रार्थयते ।

हे भगवन् ! त्वं सखेति मत्वा हे कृष्ण! हे यादव! हे सखेति यत्सम्बोन्धितो विहारशय्यासनभोजनेष्वसत्कृतश्च तत् त्वामहमप्रमेयं समक्षं क्षामये । मम सर्वापराधं सोढुमर्हसि , पुत्रस्य पितेव सख्युः सखेव प्रियायाः प्रिय इव । अदृष्टपूर्वं रूपं दृष्ट्वा रोमाञ्चितोऽस्मि भीतोऽस्मि । तदेव चतुर्भुजं सौम्यं रूपं पुनर्दर्शयेति ॥

तदा भगवान् स्वविश्वरूपदर्शनस्य दौर्लभ्यं महाधिकारिभिर्भक्त्यैव लभ्यत्वमपि स्पष्टीकृत्य स्वकीयतया प्रदर्शनीयं चतुर्भुजरूपं दर्शयित्वाऽर्जुनमाश्वास्ते । अर्जुनेन "इदं मानुषं रूपं दृष्ट्वा प्रसन्नचित्तः पूर्वस्वभावं प्राप्तश्चाहम्" इति विज्ञापितो भगवान् एवंविधरूपस्य ज्ञानं दर्शनं प्रवेशनं चानन्यया भक्त्या शक्य इत्युक्त्वा फलस्नेहहीनतया स्ववर्णाश्रमोचितानुष्ठानरूपकर्म भक्तिपूर्वकं कुर्वित्याज्ञापयते ॥

अथ च एकादशाध्याये षोडशसङ्ख्याके श्लोके "अनेक बाहूदरवक्त्रनेत्रम्" [४] इति भगवद्रूपानुवर्णने प्रमेयमिदं स्फुटं ज्ञायते । सर्वत्र विद्यमानेषु भगवद्रूपेषु अभेदः गीतासु गूढतया प्रतिपादितः इति कुत इति चेत् । अविकार्यत्वम् अभेदानुपपत्या न युज्यते । तथाहि अनेकबाहूदरवक्रनेत्रत्वे सति एकत्वम् अभेदं विना नोपपद्यते भगवद्रूपाणामभेदोस्तीति । तस्मिन्नेवाध्याये विंशतिमे श्लोके –

"द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः" [५]

इति सर्वत्रव्याप्तत्वम् एकेनेति अभेदश्चोक्तः । "सर्वतः पाणिपादं तत्" [६] इत्यनेनापि । "बहिरन्तश्च भूतानाम्" इति आविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् । इत्यादिष्वपि ।।

गीतायां परमात्मनः सर्वस्थानस्थितत्वं वारं वारं भण्यते । तदिह किञ्चित् चिन्त्यते । "तेजोभिरपूर्य जगत्समग्रम्" [७] इति तेजसा व्याप्तत्वं भणितम् । भासा व्याप्तिरिति स्वरूपेण व्याप्तिरिति भवति । "सर्वं समाप्नोषि ततोऽसि सर्वः" [८] इत्यत्रापि सर्वत्रव्याप्तिः भणिता । सर्वशब्दप्रवृत्तिनिमित्तञ्च भणितम् ।

"सर्वतः पाणिपादं तत्, सर्वतोऽक्षिशिरोमुखम् ।

सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।

असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।

बहिरन्तश्च भूतानाम् अचरं चरमेव च ।

सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥" [६] इति ।

"सहस्रशीर्षापुरुषः" [९] इति यत् पुरुषसूक्ते सहस्रशब्दः वर्तते तस्य आनन्त्यम् अर्थः इति अनेन श्लोकेन ज्ञायते । सर्वव्याप्तकरचरणादिमत् सर्वत्र व्याप्तम् अक्षिशिरोमुखादिकम् । कर्णाश्च सर्वत्र व्याप्ताः । सर्वेषामिन्द्रियाणां गुणाः सर्वेषामिन्द्रियाणां भवन्तीति सर्वेन्द्रियगुणाभासः । सर्वपार्थिवेन्द्रियवर्जितः इति सर्वेन्द्रियविवर्जितः । सर्वभृत् यः सर्वं भरति । तथापि तत्तत्वम् असक्तं - मानसिकसङ्गरहितम् । सत्व-रजस्-तमोगुणानां परिणामः नास्तीति निर्गुणम् । तथापि गुणभोक्तृ-सत्व-रजस्-तमोगुणप्रभवविषयादि भोक्तृ । अनेन परमात्मनः विरुद्धगुणानाम् एकत्र समाहारः इत्यादिकं सर्वं समाहितं भवति । भूतानां बहिः अन्तश्च परमात्मा वर्तते इत्युक्तं भवति । अन्तः वर्तमानं रूपत्रयमेव विश्व-तैजस-प्राज्ञभेदेन वर्तत इति उपनिषिः ज्ञेयम् । तथा च गीतोपनिषदां सामरस्यं परस्परं वर्ण्यवर्णकत्वञ्च ज्ञेयं भवति ।

एतेन पाणिपादादिषु सर्वत्र विद्यमानेष्वपि तत्कृतभेदः परमात्मस्वरूपे न वर्तत इति ज्ञायते । "नेह नानास्ति किञ्चन" [१०] इति हि श्रुतिः । उपनिषत्सु

परमात्मायतनानि दैहिकस्थानानि निरूपितानि । तत्रपि प्रश्नः जागर्ति किं परमात्मा भिन्नस्थानेषु वर्तमानः भिन्नः भेदं प्राप्नोति उत न इति । तच्च समाधानं सूत्रेषु कथमुक्तमिति विवेचनीयं भवति ।

"न भेदादिति चेन्न प्रत्येकमतद्वचनात्" [११] इति सूत्रमिदं कस्यापि अभेदसाधनाय प्रवृत्तमिति न विवादः । उत्तरत्र सूत्रे "न भेदादिति चेत्" इति सूत्रप्रवृत्तिदर्शनात् । चेदित्यस्य सहयोगेन पूर्वपक्षमिति भासते । सः कः जीवो वा देवो वा इति प्रश्नः । स्थानतोऽपि स्थानभेदेऽपि परस्य ब्रह्मणः उभयिलङ्गत्वम्, उभयविधत्वं न इति शाङ्करभाष्यस्य स्थूलः सारः । नैतत्सम्यगिति भाति । प्रथमतः लिङ्गशब्दस्य विषयत्वमिति अर्थं स्वीकृत्य शाङ्करभाष्यं प्रवृत्तम् ।

लिङ्गशब्दस्य विषयत्वमित्यर्थः न कुत्रापि भवति । कथञ्चित् - आर्थिकार्थो वा भवतु तथापि सूत्रार्थोऽयं न भवति । सूत्रार्थस्तु ब्रह्मणः अपास्तसमस्तविशेषत्वं प्रतिपादयति । अपास्तसमस्तविशेषत्वं ब्रह्मविदवाच्यमित्यत्र "अशब्दम् अस्पर्शम्" इति श्रुतिं प्रमाणयति । नैतत्समीचीनमिव, साधनविचारोऽयम् अध्यायः । साधने प्रवृत्तं जिज्ञासुं प्रति प्रथमेन पादेन वैराग्यम् उपदिश्यते । द्वितीयेन पादेन तत्वविचारः उपदिश्यते । तृतीयेन पादेन परापरब्रह्मविद्यागुणोपसंहारः प्रतिपाद्यते । चतुर्थेन पादेन निर्गुणविद्यायाः अन्तरङ्ग बहिरङ्गसाधनविचारः क्रियते इति नैतत्साधनोपयुक्तं भवति । साधनप्रवृत्तौ वैराग्यमावश्यकम् । परन्तु द्वितीयपादविषयभूतं तत्त्वं पदार्थपरिशोधनं साधने न अवश्यकम् । यतो हि साधने प्रश्रयः आवश्यकः । अहं नीचः भगवान् उच्चः इत्यात्मकः । तत् त्वं पदजिज्ञासया प्रश्रय एव न घटते । यतो हि -

"सर्वान् वेदानधीत्यैव प्रज्ञाधिक्येन हेतुना ।
श्वेतकेतुरहङ्कारात् प्रायशो नास्मि मानुषः ।
देवो वा केशवांशो वा नैषा प्रज्ञान्यथा भवेत् ।
एवं महत्वबुध्यैव दर्पपूर्णोऽभ्यगात् पितुः ।"

"पितोवाच कुतः पुत्र स्तब्धता त्वामुपागता ।

प्रायो नारायणं देवं नैव त्वं पृष्टवानसि ॥

यस्मिन् ज्ञाते त्वविज्ञातज्ञानादीनां फलं भवेत् ।

प्राधान्यात् सदृशत्वाच्च तदधीनमिति स्फुटम् ॥" [१२]

इति प्रमाणनेदं विज्ञायते । अतः सर्वशक्तः सर्वज्ञः भगवान् त्वम् इत्युक्ते अहङ्कारो भूयानेव भवेत् । अतः तत् त्वं पदयोः अर्थस्य यथा प्रतीतार्थवर्णने साधने विघ्न एव भवेत् । अतः प्रश्रयार्थं स्वाहङ्कारदमनार्थं भगवन्महिमैव ज्ञेयः इति ।।

अथ द्वादशाध्यायगतभाष्यद्वयस्य तुलनात्मकमध्ययनम्

एकादशाध्यायावतरणिकाभाष्ये गोपालानन्दीये पूर्वाध्यायसार एवं प्रकटितः- "पूर्वमेकादशाध्याये अर्जुनाय विश्वरूपं निर्गुणे अक्षरब्रह्मरूपे तेजःपुंजे धृतगदाचक्रं द्विभुजरूपं च श्रीहरिणा दर्शितम्" इति । परं तु रामानुजभाष्ये अर्जुनस्य वैशिष्ट्यप्रतिपादनपुरस्सरं भगवतः वैशिष्ट्यमपि अनवधिकेत्यादिविशेषणेन प्रतिपादितम् । "भक्तियोगनिष्ठानां प्राप्यभूतस्य परस्य ब्रह्मणो भगवतो नारायणस्य निरङ्कुशैश्वर्यं साक्षात्कर्तुकामायार्जुनाय अनवधिकातिशयकारुण्यौदार्यसौशील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शितम्" उक्तं च । "तत्त्वतो भगवज्ज्ञानदर्शनप्राप्तीनामैकान्तिकात्यन्तिकभगवद्भक्त्येकलभ्यत्वम्" इति रामानुजीये अवतारिकाभाष्यम् । किंच स्वैश्वर्यं दर्शितमिति रामानुजीयोक्तस्य विवरणं धृतगदाचक्रं द्विभुजरूपं इति गोपालानन्दीयोक्तमिति न संगच्छत इति भाति । यतः द्विभुजरूपस्य ऐश्वर्यद्योतकत्वाभावात् , सहस्रभुजत्वादेरेव तथात्वाच्च । तेन द्विभुजरूपदर्शनोक्तिः कथमस्मिन् प्रसंगे संगता स्यात् इति न विद्मः ।

द्वादशाध्यायप्रतिपाद्यनिरूपणावसरेपि परब्रह्मोपासकानां श्रैष्ठ्यमाख्यायत इत्युक्तं गोपालानन्दीये । तस्य कारणमुक्तं रामानुजीये । यथोक्तं - "आत्मप्राप्तिसाधनभूतादात्मोपासनाद्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च

श्रैष्ठ्यम्" इति ।। किंच भगवदुपासनोपायश्च, तदशक्तस्याक्षरनिष्ठता, तदपेक्षिताश्चोच्यन्ते इति रामानुजीयभाष्योक्त्या गोपालानन्दभाष्ये स्पष्टमुक्तस्य अक्षरब्रह्मोपासक-परब्रह्मोपासकभक्तस्वरूप- एकान्तभक्तिसाधनत्वादीनामपि उल्लेखः सूक्ष्मतया कृत एवेति सर्वमनवद्यम् ।।

"अभ्यासेप्यसमर्थोऽसि" [१३] इति श्लोकव्याख्यानावसरे रामानुजीयभाष्ये-मत्कर्मशब्दार्थः "मदीयानि कर्माणि आलयनिर्माण-उद्यानकरण-प्रदीपारोपण-मार्जन-अभ्युक्षण-उपलेपन-पुष्पाहरण-पूजाप्रवर्तन-नामसंकीर्तन-प्रदक्षिण-स्तुति-नमस्कारादीनि" इति उक्तः । गोपालानन्दीये मार्जनेति समान्योनानुक्त्वा "मन्दिरमार्जन" इति स्पष्टभाव उक्तः । तथा भागवतवचनमप्यधिकमुदाहृतम् ।

"एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।

त एवात्मविमोक्षाय कल्पन्ते कल्पिताः परे" [१४] इति ।।

अयं गोपालानन्दीय एवेति विशेषः ।।

अध्यायसारस्तु अक्षरब्रह्मोपासनयोर्मध्ये किं गरीय इति वर्ण्यतेऽस्मिन्नध्याये । तत्रादावर्जुनो देवदेव्युपासकयोर्मध्ये को गरीयान् केषां श्रेष्ठत्वं केषां कनिष्ठत्वमिति पृच्छति । तत्रायं भगवतः परिहारक्रमः ।

भगवदुपासका एव योगशब्दितमोक्षोपायवत्सु श्रेष्ठाः । कुत इति चेत् - यद्यपि देव्युपासनयाऽपि मोक्षो भवति, तथापि देव्युपासनद्वारको मोक्षमार्गः क्लेशाधिक्यवान् । देव्या उपासने विशेषेण जितेन्द्रियत्वं सर्वत्र समबुद्धित्वं सर्वभूतहितकरत्वं सुद्धाचारश्चावश्यकः । एतान् विना न देवीप्रसादः ।

तेन विना नेश्वरप्रसादः । यावताऽऽयासेन देव्युपासनं तन्न्यूनायासेन अत्र भगवदुपासनं सुशकम् ॥ अतो रमाब्रह्मादिपरिवारयुक्ततया भगवदुपासनं कार्यम् । तदशक्तौ भगवद्विषयकज्ञानं सम्पाद्यम् ।

प्रत्याहाररूपाभ्यासेन मनस्समाधानाय यतितव्यम् । तत्राप्यशक्तौ

भगवद्विषयककर्मानुष्ठेयम् । तत्राप्यशक्तौ देवतान्तरविषयककर्म कृत्वाऽन्ते भगवति समर्प्य सर्वकर्मफलत्यागं कुर्यात् ॥

अज्ञानपूर्वकाभ्यासाज्ज्ञानं श्रेयः । ज्ञानपूर्वकसकामध्यानात् निष्कामध्यानं श्रेयः । तस्मादपरोक्षज्ञानं श्रेयः । तदनन्तरं मोक्षो भवत्येव । भगवत्प्राप्तौ भक्तिरेव प्रधाना । द्वेषाभावो मैत्री कारुण्यं निर्ममत्वं निरहङ्कारत्वं साम्यं क्षमा सन्तोषः तत्त्वनिश्चयोऽनपेक्षता शौचं दाक्ष्यं सर्वारम्भपरित्याग इत्यादयो धर्मा भगवत्प्रीतिकराः ॥

तत्र तावत् "तमेवं विद्वानमृत इह भवति", [१५] "तमेव विदित्वाऽतिमृत्युमेति", [१६] "तरति शोकमात्मवित्" [१७] इत्यादौ भगवज्ज्ञानस्य मोक्षसाधनत्वं प्रतीयते । ज्ञानं च नोपासनं विना निष्पद्यत इति तदुपासनमपि मोक्षसाधनमेष्टव्यम् । श्रूयते च "मुमुक्षुभिः साधुभिः पूतपापैः" इति भगवदुपासनं मोक्षहेतुरिति । तथा च यथा भगवदुपासनं मोक्षसाधनं तथा श्रीदेव्युपासनमपि,

"श्रियं वसाना अमृतत्वमायन्" , [१८]

"अनाद्यनन्तनं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते",

"उपास्य तां श्रियमव्यक्तसञ्ज्ञां भक्त्या मृत्योर्मुच्यते सर्वबन्धैः"

इत्यादौ मोक्षसाधनं प्रतीयते । न चैवं प्रतीयमानमप्यव्यक्तोपासनस्य मोक्षसाधनत्वम् उपचरितमेव, "अन्तवत्तु फलं तेषाम्" [१९] इत्युक्तन्यायेन ब्रह्माद्युपासनस्येव तदुपासनस्याप्यन्तवत्फलत्वादिति वाच्यम् । वैषम्यात् । युक्तं ब्रह्माद्युपासनस्य मोक्षसाधनताया उपचरितत्वकल्पनम् । तेषां जननमरणादिदोषवत्त्वेन तदुपासनस्य जननमरणादिराहित्यरूपमोक्षसाधनत्वस्यासम्भवात् । श्रीदेव्यास्तु

"चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते" , [२०]

"चतुःशिखण्डा युवतिः सुपेशाः",

"अहं रुद्रेभिर्वसुभिश्चरामि", "यं कामये तंतमुग्रं कृणोमि",

"अहं सुवे पितरमस्य मूर्धन्" "परो दिवा पर एना",

"त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया", "त्वया जुष्टश्चित्तं विन्दते वसु"

इत्यादौ नित्ययौवनज्ञानमयत्वसर्वदेवपूज्यत्वादिमहामाहात्म्यवत्त्वेन आवेदिताया मोक्षहेतुज्ञानविषयत्वासम्भवाभावाद्, वास्तवमेव तदुपासनस्यापि मोक्षसाधनत्वमिति भगवदुपासना-अव्यक्तोपासनरूपमार्गद्वयेन एकमेव मोक्षरूपं फलं प्राप्नुवतां मध्ये के श्रेष्ठा इति साधकबाधकप्रमाणाभावात् संशयः कस्यचिदविदिततत्त्वस्य पुंसो भवतीति तदनुजिघृक्षया "भगवदुपासका एव श्रेष्ठाः" इति जानन्नप्यर्जुनः तत्र स्वविदिते युक्तिजिज्ञासया वा परकीयसंशयाध्याहारेण अपृच्छदित्युच्यते अर्जुन उवाच एवं सततयुक्ता इति ॥

३. उपसंहारः (Conclusion)

अनेन प्रकारेण एकादश-द्वादशाध्याययोः गोपालानन्द-रामानुजभाष्ययोः तुलना समाप्ता। एकादशाध्याये गोपालानन्दमुनिना 'अध्यात्मसंज्ञितम्' इत्यस्य, तथा 'हि' शब्दस्य च कृतं व्याख्यानं रामानुजमतात् किञ्चित् भिन्नं दृश्यते। द्वादशाध्याये तु गोपालानन्दभाष्ये स्पष्टतया देवदेव्युपासनस्य, अक्षरब्रह्मोपासनस्य च विचारः कृतः। यद्यपि श्रीदेव्याः उपासना मोक्षदात्री इति श्रुतिभिः सिद्ध्यति, तथापि सा क्लेशकारिणी इति मत्वा, भगवदुपासना एव सुलभा श्रेष्ठा च इति निष्कर्षः अत्र स्थापितः।

४. सन्दर्भसूची (References)

[१] श्रीमद्भगवद्गीता - २.११

[२] श्रीमद्भगवद्गीता - २.१२

[३] श्रीमद्भगवद्गीता - ११.२

[४] श्रीमद्भगवद्गीता - ११.१६

[५] श्रीमद्भगवद्गीता - ११.२०

[६] श्रीमद्भगवद्गीता - १३.१३ (एकादशाध्यायसन्दर्भेऽपि उपयुज्यते)

[७] श्रीमद्भगवद्गीता - ११.२४

[८] श्रीमद्भगवद्गीता - ११.४०

[९] पुरुषसूक्तम् (ऋग्वेदः १०.९०)

[१०] बृहदारण्यकोपनिषद् - ४.४.१९ / कठोपनिषद् - २.१.११

[११] ब्रह्मसूत्रम् - ३.२.११

[१२] छान्दोग्योपनिषद् - ६.८.७ (श्वेतकेतु-उपाख्यानम्) / महाभारतम्

[१३] श्रीमद्भगवद्गीता - १२.१०

[१४] श्रीमद्भागवतपुराणम् - १.५.३४

[१५] पुरुषसूक्तम् / तैत्तिरीयारण्यकम्

[१६] श्वेताश्वतरोपनिषद् - ३.८

[१७] छान्दोग्योपनिषद् - ७.१.३

[१८] श्रीसूक्तम् (खिलऋक्)

[१९] ब्रह्मसूत्रम् (अन्तवत्त्वधिकरणम्) / गीता ७.२३

[२०] ऋग्वेदः - ४.५८.३ (महानारायणोपनिषद्, लक्ष्मीपरतया व्याख्यातम्)

५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भगवद्गीता.

२. रामानुजाचार्यः. गीताभाष्यम्.

३. गोपालानन्दमुनिः. गीताभाष्यम्.

४. बादरायणः. ब्रह्मसूत्रम्.

५. श्रीमद्भागवतपुराणम्.

६. उपनिषदः (छान्दोग्य, श्वेताश्वतरादयः).

# भगवद्रामानुजविरचितगीताभाष्यस्य श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः द्वितीयाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

जितामित्र कुलकर्णी
संशोधनसहायकः

१. शोधसारः (Abstract)

अस्मिन् शोधप्रबन्धे श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य रामानुजभाष्य-गोपालानन्दभाष्ययोः तुलनात्मकं अध्ययनं कृतम् अस्ति। अत्र विशेषतः 'न त्वेवाहं जातु नासम्' (२.१२) तथा 'नेहाभिक्रमनाशोऽस्ति' (२.४०) इति श्लोकयोः व्याख्याने विद्यमानं वैलक्षण्यं विमृष्टम्। रामानुजभाष्ये कर्मयोगस्य माहात्म्यं, अभिक्रमनाश-प्रत्यवाययोः अभावश्च स्पष्टीकृतः, यत्र गोपालानन्दभाष्ये भगवतः व्यक्तमूर्तेः (साकाररूपस्य) उपासनायाः एकान्तिकभक्तेः च महत्त्वं प्रतिपादितम्। अपि च, देहात्मविवेकः, जीवस्य नित्यत्वं, तथा च युद्धस्य धर्म्यत्वविषये उभयोः भाष्ययोः साम्य-वैषम्य-विचारः अत्र कृतः।

२. विषय-विवेचनम् (Body of the Article)

भगवद्रामानुजविरचितगीताभाष्यस्य श्रीगोपालानन्दमुनिविरचितगीताव्याख्यायाः द्वितीयाध्यायभाष्यद्वयस्य तुलनात्मकमध्ययनम्

अनुराग आचार्यः, पूर्णप्रज्ञविद्यापीठम्

“न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः” (२.१२) [१] इति श्लोकस्य गोपालानन्दभाष्ये 'अत्र विशेषः श्रीमद्रामानुजाचार्यविरचितगीताभाष्यतोऽवगन्तव्यः' । इति वदन् गोपालानन्दभाष्यकारः किमपि विशेषं व्यत्यासं वा नोल्लिलेख ।

किं च उत्तरत्र -

“नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥" (२.४०) [२]

इति श्लोकस्य भाष्यं एवं व्यरचि भगवद्रामानुजाचार्यैः – "इह कर्मयोगे नाभिक्रमनाशोऽस्ति । अभिक्रमः आरम्भः । नाशः फलसाधनभावनाशः । आरब्धस्यासमाप्तस्य विच्छिन्नस्यापि न निष्फलत्वम् । आरब्धस्य विच्छेदे प्रत्यवायोऽपि न विद्यते । अस्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोऽपि महतो भयात् संसारभयात्त्रायते । अयमर्थः "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते" [३] इति उत्तरत्र प्रपञ्चयिष्यते । अन्यानि हि लौकिकानि वैदिकानि च साधनानि विच्छिन्नानि न फलाय भवन्ति प्रत्यवायाय च भवन्ति ।" अस्य अयमभिप्रायः – अत्र कर्मयोगे अभिक्रमस्य नाम फलसाधनभावस्य नाशः नास्ति । इति चेत्यदिकोपि कर्मारम्भं कृत्वा तादृशकर्मणः समाप्ति न संपादयति चेदपि, मध्ये अवरुद्धस्यापि तादृशकर्मणः निष्फलत्वं नास्ति । एवंप्रारब्धस्य नाम आचरितुं उद्युक्तस्य कर्मणः मध्ये परित्यागात् आरब्धस्य अन्त्यगमनाभावप्रयुक्तः कोपि प्रत्यवायोपि नास्ति । यतः कर्मयोगस्य स्वल्पानुष्ठाने कृतेपि तस्य फलं महदेव भवति । यतः अग्रे गीतायां षष्ठाध्याये "न हि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति" [४] इति स्वयं भगवान्गीताचार्यः वक्ष्यति । यः धर्मः, मोक्षसाधनत्वेन अनुष्ठीयमानः अस्ति सः कल्याणशब्देन व्यपदिश्यते । तादृशधर्मानुष्ठाता च कल्याणकृत् इतिशब्देन अत्र बोध्यते । स्वल्पधर्मानुष्ठातुरपि कल्याणकृतः कदापि दुर्गतिप्राप्त्यवसरोपि नास्ति इति भगवतः आशयः इति ।

केचित्तु गोपालानन्दभाष्यस्याभिप्रायमेवं वर्णयन्ति । अस्य श्लोकस्य पूर्वार्धं नैव व्याख्यातम् अपितु उत्तरार्धमेव व्याख्यातम्। तद्यथा - भगवतः व्यक्तायां मूर्तविषये कस्यचित्पुरुषस्य स्वल्पा अपि निष्ठा अस्ति चेदपि सा एव निष्ठा तं महद्भ्यः भयेभ्यः अनिष्टेभ्यो वा रक्षति इति । यथा यदा अर्जुनः महाभारतयुद्धनिरतो बभूव तदानीं तैः महान्तः क्लेशाः अनुभोक्तव्याः आपतिताः । तथापि तादृशैः सर्वैरपि क्लेशैः सः निवारितः बभूव। अत्र कारणं किं इति चेत् मानुषरूपेण मूर्तीभूतस्य भगवतः श्रीकृष्णस्य विषये तदीया निष्ठा एव । तस्मात् स एव एकान्तिकभक्तः इति

व्यपदिश्यते । यः मानुषरूपेण अवतीर्णस्य भगवतः विषये दृढतमविश्वासवान्, यश्च इतरसर्वापेक्षया भगवन्तमेव अधिकं मनुते स एव उत्तमसत्सङ्गी इति कथयितुं योग्यो भवति इति ।

एवंरीत्या अस्य श्लोकस्य व्याख्यानावसरे प्रकारभेदः दृश्यते ।

इतः परं द्वितीयाध्यायार्थसंग्रहः क्रियते । विषीदन्तमर्जुनं प्रति भगवान् एवं उपदिशति – हे अर्जुन

"यान् त्वम् अन्वशोचः ते न शोकार्हाः, यान् त्वं भाषसे ते मनीषोत्थवादा एव । नतु प्राज्ञवादाः । कुतो न ते शोच्याः? कथं मम वादाः प्रज्ञावादाः?" इति चेत् प्राज्ञाः जीवत इव मृतान् प्रत्यपि नैव शोचन्ति । कुतो न शोचन्ति इति चेत् किं जीवनाशं आशङ्क्य शोक उत देहनाशम् । जीवो नित्यः अनादित्वात् मद्वत् । देहनाशस्त्वनिवार्यः । देहभिन्नात्माभावात् । देहनाश एव आत्मनाश इति नाशङ्कनीयम् । देहभिन्नात्मनः देहावस्थाविशेषकौमाराद्यनुभववतः सद्भावात् । कौमारदेहहानेऽपि यौवनदेहप्राप्तेः, यौवनदेहहानेऽपि जीर्णदेहेप्राप्तेश्च यथा शोकाभावः तथा एतद्देहहानेऽपि देहेन्तरप्राप्तिसद्भावात् । तथाऽपि एतद्देहहाने तद्दर्शनस्पर्शनाद्यभावेन दुःखप्राप्तिरिति न मन्तव्यम् । केवलदर्शनादिना सुखदुःखाद्यप्राप्तेः, परन्तु अभिमानसहिततद्दर्शनादिनैव तत्प्राप्तेः । अतो अभिमानं त्यक्त्वा अदर्शनादिनिमित्तकदुःखं विफलीकुरु ॥

युद्धं कृत्वा बन्धुमरणे अभिमानत्यागेन शोकतरणादपि युद्धत्याग एव वर इति न मन्तव्यम् । अभिमानत्यागेन न केवलमिदानीं प्रसक्तस्य दुःखस्याभावः, किन्तु समग्रसांसारिकदुःखहानिरिति गुणलाभात् । किञ्च दुष्टहननस्य सत्कर्मत्वात् सत्कर्मणश्च नियमेन सुखप्रदत्वात् शोको न कार्यः । तस्मात् युद्ध्यस्व ॥ जीवस्य नित्यत्वे युक्तिरप्यस्ति । तथाहि जीवो नित्यः नित्यव्याप्तपरमात्मनः प्रतिबिम्बत्वात् यो नैवं स न नैवं यथा आदर्शे घटादिप्रतिबिम्ब इति प्रयोगस्याभिमतत्वात् ॥

अयं भावः - प्रतिबिम्बनाशो हि बिम्बनाशेन वा बिम्बसन्निधिनाशेन वा उपाधिनाशेन वा भविता । जीवबिम्बस्य परमात्मनो नित्यत्वात् व्याप्तत्वाच्च

नाद्यद्वितीयपक्षौ सम्भावितौ । तृतीयपक्षस्तु परिदृश्यमानदेहाख्योपाधेः नाशेऽपि स्वरूपभूतसूक्ष्मदेहाख्योपाधिसद्भावाद् अपहस्तितः ।

"जीवो न जायते म्रियते वा" [५] इति काठकश्रुतिरप्यस्ति । एवञ्च जीवनित्यत्वज्ञाने सति अहं हन्मि इति वा स हत इति वा भ्रान्तिर्नोदेति । यथा पुरुषो जीर्णवस्त्रं त्यक्त्वा नूतनं गृह्णाति तथा जीर्णं शरीरं विहाय नूतनशरीरं स्वीकरोति । तथाच युवदेहहानेन जीर्णदेहलाभेऽपि यदा न शोकः तदा जीर्णदेहहानेन नूतनदेहलाभे सुतरां शोको न कार्यः । जीवस्य स्वभावतो नाशाभावेऽपि शस्त्रादिना नाशसम्भव इति न मन्तव्यम् । जीवस्य छेदनाद्यनर्हत्वात् । जातस्य च मरणावश्यम्भावात् शोको न कार्यः । पूर्वोक्तदिशा जीवपरमात्मज्ञानी दुर्लभः ॥

किञ्च धर्म्यात् युद्धात् श्रेयस्करं क्षत्रियस्य नास्ति । विष्णुवैष्णवद्वेषितदनुबन्धिनिग्रहरूपमिदं युद्धं स्वधर्म इत्यवेक्ष्य शरीरकम्पनं त्यज । सुखहेतुभूतपुण्यवन्त एव क्षत्रिया ईदृशं युद्धं लभन्ते । तथा च धर्म्ययुद्धत्यागे स्वधर्महानेन पापावाप्तिः, कीर्तिहानिश्च भवति । कथं कीर्तिहानिः पार्थो बन्धुदयया युद्धादपगत इति कीर्तिरेव भविष्यतीति न मन्तव्यम् । यतो महारथाः त्वां भयात् रणादुपरतं मन्यन्ते ।

अपकीर्तिश्च सम्भावितस्य मरणादप्यधिका ॥

किञ्च धर्म्ये युद्धे मरणेऽपि वीरस्वर्गावाप्तिः, जये तु राज्यप्राप्तिश्च । अतो अभिमानत्यागेन सुखदुःखादिद्वन्द्वं समीकृत्य युद्धकरणे नैव पापावाप्तिः ॥ एवं तव ज्ञानविषयकोपदेशः कृतः ज्ञानसाधनविषयकोपदेशमिदानीं करोमि ।

फलापेक्षां त्यक्त्वा भगवत्प्रीत्यर्थं भगवत्प्रेरणानुसन्धानपूर्वकं स्वधर्मानुष्ठानमेव योगो नाम ज्ञानोपायः । एतादृशभागवतधर्मस्य प्रारम्भमात्रम् इच्छा वा निष्फला न भवति । भागवतधर्ममुपक्रम्य किञ्चिद् विघ्नादिना त्यागेऽपि प्रत्यवायो नास्ति । अल्पोऽप्ययं धर्मो महतो भयात् त्रायते । सत्स्वपि बहुवादिप्रोक्तबहूपायेषु मदुक्त एवायमुपायः श्रेयस्करः । प्रमाणैः निश्चितत्वात् । उपायान्तराणि तु प्रमाणैः अनिश्चितत्वात् वादिजनमनीषया कल्पितत्वाच्च उपायाभासा एव । अज्ञानिनो

वेदैः यन्मुखत उच्यते । तदर्थमादाय कामात्मानः सन्तः स्वर्ग एव पुरुषार्थ इति मन्यमानाः काम्ययज्ञाद्यनुष्ठानं श्रेयःप्रदमिति मन्यन्ते । तादृशकर्माचरणेन वेदोक्तेनापि भगवति मनःसमाधानं न भवति । अतः तादृशात् काम्यकर्मणो निष्क्रान्तो भव । कूपे यावत्प्रयोजनं तावत्तदधिकं च प्रयोजनं यथा समुद्रे भवत्येवं कर्मणो यत्फलं तावत् तदधिकं च ज्ञानेन भवति । अतो ज्ञानोपायमेव अनुतिष्ठ, कर्माचरण एव तवाधिकारो न तु फलेऽपि । अतो फलापेक्षयैव कर्माचरणं न कुरु । कर्मत्यागमपि न कुरु । ज्ञानात् कर्म जघन्यम् । अतो ज्ञानोपायमनुतिष्ठ ।

एवं योगानुष्ठानं कुर्वन्तो अन्तःकरणशुद्धिद्वारा मनीषाशब्दितापरोक्षज्ञानं लब्ध्वा जन्मबन्धविनिर्मुक्ताः सन्तः शाश्वतं पदं लभन्ते । यदा ते बुद्धिः सर्वं मोहं त्यजति, यदा च श्रुतिभिः विप्रतिपन्ना अपि बुद्धिर्भगवति निश्चाञ्चल्येन समाधीयते तदा योगं प्राप्स्यसीति ॥

एवमुपदिष्टो अर्जुनः पृच्छति- हे केशव ! समाधिस्थत्वमपरोक्षज्ञानिलक्षणमिति यत् त्वयोक्तं तन्मया अवगतम् । किन्तु तल्लक्षणं न सार्वत्रिकव्यवहारोपयोगि । तस्मात् सार्वत्रिकव्यवहारोपयोगिज्ञानिलक्षणं ज्ञानिप्रवृत्तिप्रकारं च ब्रूहीति ॥

अयमत्र भगवतः प्रत्युत्तरक्रमः - यदा सर्वान्मनोगतान् कामान् प्रजहाति भगवज्ज्ञानेन भगवत्प्रसादेन आत्मन्येव अलम्बुद्धिमान् तदा अपरोक्षज्ञानी इत्युच्यते । समसुखदुःख-राग,भय,क्रोधरहितो अपरोक्षज्ञानी इत्युच्यते । यदा कूर्मः स्वाङ्गानीव अनायासेन इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा अपरोक्षज्ञानीति ज्ञातव्यः ॥ अनेन सर्वेन्द्रियजयवत्वे सति कामक्रोधादिरहितः समसुखदुःखः अपरोक्षज्ञानीति तल्लक्षणमुक्तं भवति ॥

एवं चेत् सर्वेऽपि सर्वेन्द्रियजयसम्पादनेन अपरोक्षज्ञानं किमर्थं न लभन्ते इति चेत् - निराहार-त्वादिक्लिष्टोपायसाध्यत्वात्तस्य । निराहारे इन्द्रियशक्तिकुण्ठनद्वारा विषयविनिवर्तनेऽपि रसनेन्द्रियजयो न भवति । विषयाभिलाषनिवृत्तिरपि न भवति । तदुभयं भगवद्दर्शनेनैव भवति । विषयध्यानेन सङ्ग-काम-क्रोध-मोह-स्मृतिविभ्रम-

बुद्धिनाशप्रणाड्या आत्मनाशाख्यनरकाद्यनर्थप्राप्तेः बुभूषुणा विषय-ध्यानं त्याज्यम् । रागद्वेषौ विहाय आत्मवश्यैः इन्द्रियैः यावद्देहयात्रं विषयाननुभवन् प्रसादं लब्ध्वा दुःखान् जहाति । प्रसादरहितस्य पुंसो भगवति मनोयोगो दुःशकः । योगाभावे ध्यानाभावः । ध्यानाभावे मोक्षाभावः । मोक्षाभावे सुखाभावः । इदं प्रति द्रवणादेव हि इन्द्रियाणामिन्द्रियत्वम् । एवं स्वभावतः चरताम् इन्द्रियाणाम् अनु यदि मनश्चरति तर्हि समुद्रे नावं वायुरिव अस्य प्रज्ञामपहरति । तस्मात् सर्वेन्द्रियजय एव अपरोक्षज्ञानसाधनम् । स्वभावतः तद्वानेव अपरोक्षज्ञानी ॥

सर्वभूतानि येषु विषयेषु जाग्रति तेषु ज्ञानी स्वपितीव । सर्वभूतानि भगवद्विषये सुप्तानि तत्र जागर्ति ज्ञानी । मत्तस्य सञ्चार इव अतीवानुसन्धानराहित्येन ज्ञानी विषयान् अनुभवतीति भावः । यथा समुद्रो नदीजलागमने न प्रयतते, वर्षाकाले न वर्धते जलागमनेन, ग्रीष्मे जलानागमनेन न ह्रसते तथा ज्ञानी विषयसम्पादनाय न प्रयतते । न वा विषयप्राप्त्योत्सेकं प्राप्नोति, नापि विषयाप्राप्त्या अनुत्सेकं प्राप्नोति ॥ सर्वकामत्यागपूर्वकं निर्ममो निरहङ्कारः सन् चरति चेत् शान्तिं प्राप्नोति । अन्तकालेऽपि ब्राह्मीसञ्ज्ञकैतदवस्थायां स्थितो अप्राकृतशरीरं परं ब्रह्म आप्नोतीति ॥

गीतायां ब्रह्मसूत्रप्रतिफलनम्

गीतायां प्रथमतः देहात्मभेदं दृढं प्रतिपादयति कृष्णः । तदेव साधनमूलम् अन्यथा साधनमेव न सङ्गच्छते । भारतीयेतरधर्मेषु लौकिकानामेव विषयाणां प्राधान्यात् देहात्मभेदः नोक्तः । यद्यपि- 'झण् अवेस्ता' नामके पारसिकानां ग्रन्थे-

"All is not lost when death takes place. For death is not the end of life."

इत्यादिषूक्तः देहात्मभेदः । तथापि भारतीयानां तत्वशास्त्रात् प्रभावितोऽयम् इति अस्माभिः ज्ञायते । यतो हि- वैदिका इव पारसिका अपि अग्निं सूर्यञ्च अतितरां पूजयन्ति । अग्नेः शुचित्वायैव पृथिव्याश्च नैर्मल्याय शवान् न भूमौ क्षिपन्ति न दहन्ति वा । बैबल्-ग्रन्थे वा कुरान् ग्रन्थे वा देहात्मभेदः न प्रतिपादितः । गीतायान्तु -

"न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥" [६] इति द्वितीयाध्याये प्रतिपादितः

एवमेव पुराणेषु श्रेष्ठतमे श्रीमद्भागवते च एकादशस्कन्धे, एकादशाध्याये -

"देहस्थो न देहस्थः विद्वान् स्वप्नात् यथोत्थितः ।

अदेहस्थोऽपि देहस्थः कुमतिः स्वप्नदृग् यथा ॥ ८ ॥" [७]

इति देहात्मभेदः प्रतिपादितः । अत्र गीतायां पौनरुक्त्यादिकं प्रतीयते । तथाहि न जायते इति प्रथमपादे, अजः इति तृतीयपादे । न म्रियते इति प्रथमे । नित्यः इति तृतीये । न कदाचित् जायते म्रियते इति शाश्वतत्वमेवाह । न भूत्वा भविता इति पुराणत्वम् इति । 'न जायते न उत्पद्यते । जनिलक्षणा वसुविक्रिया आत्मनो न विद्यते' इति । तथा न म्रियते वा । वाशब्दः चार्थे । न म्रियते च इति । अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते कदाचिच्छब्दः सर्वविक्रिया प्रतिषेधैः सम्बध्यते यस्मान्नायम् आत्मा । भूत्वा भवनक्रियाम् अनुभूय पश्चात् अभाविता - अभावं गन्ता न पुनः तस्मात् न म्रियते । यो हि भूत्वा न भविता स म्रियते इत्युच्यते लोके । अतो न जायते यस्मादेवं तस्मादजः । यस्मान्नम्रियते तस्मान्नित्यश्च' इति । अस्य सम्बन्धितया ब्रह्मसूत्रस्य विमर्शः एवं भवति । प्रथमस्य पादद्वयस्य विवरणं, तृतीयतुरीयौ पादौ कुरुतः इति मतम् । भाष्येषु एवं प्रतिपादितमस्ति । अयं जीवोऽपि अजः नित्यश्च, अन्यथा पुनरुक्तेः । शाश्वतश्च न कदाचित् अस्वातन्त्र्यादिकं जीवस्वरूपं जहाति । इति । अत्र च प्रमाणं महाविष्णुपुराणे दृश्यते । तद्यथा

"अल्पशक्तिरसार्वज्ञं पारतन्त्र्यमपूर्णता ।

उपजीवकत्वं जीवत्वं ईशत्वं तद्विपर्ययः ॥

स्वाभाविकं तयोरेव नान्यथा स्यात् कथञ्चन ।

वदन्ति शाश्वतावेतौ अत एव महाजनाः ॥" [८] - इति ।

शाश्वतत्वं नाम शश्वदेकप्रकारतया वर्तित्वं प्रतिपादितम् । अन्यथा कथं सङ्गच्छते शाश्वतत्वम् । जीवस्य ब्रह्मभावे जीवत्वमनित्यं भवति । शाश्वतत्वं नोपपद्यते । यदि ब्रह्म जीवो जायते पुराणत्वं गतं भवति । यतो हि, स्वपुरातनत्वं ब्रह्म नाशयति जीवभावेन । अथ च पुराण इत्यस्य हनूमत्पैशाचरीत्या सदैकरूप इत्यर्थो भवति । तदा- पुनरुक्तं भवति ।

अयं तु आत्मा निरवयवत्वात् नवा एवेति पुराणः । न वर्धत इति शाङ्करभाष्योक्तमपि सङ्गच्छते । मोक्षेऽपि सावयवभोगः ब्रह्मसूत्रे उपनिषत्सु च स्पष्टः । रामानुजमतरीत्या पुराणशब्दस्य सर्वदा अपूर्ववत् अनुभाव्य इत्यर्थः । अर्थोऽयं स्याद्वादोन्नीत इति भाति । गोपालानन्दभाष्ये तु पुराणशब्दार्थ एवं उपपादितः । पुरापि नवः आत्मदर्शिभिः नित्यशः अपूर्ववत् अनुभवनीयः इति । तेन रामानुजभाष्ये यत् अस्पष्टं तत् स्पष्टीकृतं भवति । तत्र अनुभावनीयः इत्येवोक्तम् । कैरिति नोक्तम् । गोपालानन्दभाष्ये आकांक्षापूरणं कृतमिति रामानुजभाष्यविवरणरूपत्वमस्य भागस्य ज्ञायते ।।

न हन्यते हन्यमाने शरीरे इति विस्पष्टं देहात्मभेदमाह ।

"अन्तवन्त इमे देहाः नित्यस्योक्ता शरीरिणः ।

अनाशिनोऽप्रमेयस्य तस्माद्युद्ध्यस्व भारत ॥" [९]

इमे देहाः इति शरीरात्मभेदवतः जीवस्य शरीरात्माऽभेदवतः परमात्मनश्च भेदः स्पष्टः ।

तस्माद्युद्ध्यस्व इत्यत्र 'यस्मादेवं नित्यम् अविक्रियश्च आत्मा तस्माद्युद्ध्यस्व युद्धात् उपरमं माकार्षी इत्यर्थः । नहि अत्र युद्धकर्तव्यता विधीयते । युद्धे प्रवृत्त एव हि असौ शोकमोहप्रतिबद्धः तूष्णीमास्ते । अतः तस्य कर्तव्यप्रतिबन्धापनयनमात्रं भगवता क्रियते । तस्मात् युध्यस्व इति अनुवादमात्रं न विधिः ।

रामानुजभाष्ये तु तस्मात् देहस्य विनाश्यस्वभाववत्वात् आत्मनो नित्यस्वभाववत्वात् उभावपि न शोकस्थानमिति शस्त्रपातादिपरुषस्पर्शानवर्जनीयान् स्वगतान्यगतांश्च धैर्येण

अमृतत्वप्राप्तये अनभिसंहितफलं युद्धाख्यं कर्मारम्भस्व इति । अत्र गोपालानन्दभाष्ये अस्य श्लोकस्य तात्पर्यं न स्पष्टं निरूपितमिति भाति । यतः रामानुजभाष्ये अमृतत्वप्राप्त्यर्थं कर्म कर्तव्यमिति स्पष्टमुक्तम् । गोपालानन्दभाष्ये अत्र हेतुः विनाशित्वाविनाशित्वधर्मात् हेतोः युध्यस्व इत्युक्तम् । युद्धकरणे कारणत्वोक्तावपि फलं किमिति न स्पष्टं भवति । अमृतत्वप्राप्तिर्हि फलं भवति युद्धाय । नहि विना फलं कोऽपि कर्म कुरुते । अतः फलस्य अवश्यं वाच्यत्वात् फलानुक्तिः गोपालानन्दभाष्ये स्पष्टं प्रतीयते ।।

गीतातात्पर्ये- 'अनिच्छया देहहान्यादेरेव दुःखप्राप्तिः सिद्धा । तस्मात् अनाशिनोऽप्रमेयस्य विष्णोः पूजार्थं युध्यस्व, तत्प्रसादाधीनत्वाद् दुःखनिवृत्तेः सुखस्य च । आत्मनः नित्यत्वम् अविक्रियत्वं च युद्धे कथं हेतू भवतः । अत एव युध्यस्व इति यद्वर्तते तद्बलात्कारेण अनुवादरूपमित्याह । अतः नातीव सङ्गतमिदं भाष्यम् । विनाशस्वभावात्- युध्यस्वेति चेत् शतवर्षानन्तरं मरिष्यस्येवेति किं दिनत्रयानन्तरमेव म्रियस्व इति उक्तमिव भवति ।

माध्वभाष्ये तु गीतायाः आनन्तर्यसङ्गतिः स्फुटमभिव्यक्ता भवति । यदि शङ्कररीत्या कृष्णोक्तिः भवेत् तर्हि 'अन्तवन्त इमे देहाः इत्यनेन अथचैनं नित्यजातमिति इदं गतार्थं भवति । जातस्य ध्रुवं मृत्युरिति, अव्यक्तादीनि भूतानीति च इमौ श्लोकौ गतार्थौ भवतः । देही नित्यमवध्योऽयम् इतीदमपि गतार्थत्वं भजते । अत्र देहहान्यादिः दुःखाधायकः इति अनुभवसिद्धः । अतः न कोऽपि इच्छया देहं धत्ते । अनिच्छयैव देही भवति । अतः अनाशिनम् अप्रमेयं देवमेव सम्पूज्य तथैव समुपास्य मुक्तो भवति इति ज्ञायते । अत एव नित्यस्य इत्युक्तेऽपि अनाशिन इत्यनेन न पुनरुक्तिः । नित्यपदं शरीरिविशेषणम्, अनाशिपदं परमात्मविशेषणमिति सङ्गतं भवति ।

"न त्वेवाहम्" इत्यारभ्य "देही नित्यमवध्योऽयम्" [१०] इत्यन्तं- देहात्मैक्यं कृष्णः विस्तरेण निराकरोति । कुत इति चेत् देहदेहिभेदज्ञानमेव साधने कारणं सङ्गच्छते । ब्रह्मसूत्रेषु चतुर्भिरेव सूत्रैः देहदेहिभेदः भण्यते । कृष्णोक्तिः

स्वधर्मविमुखम् अर्जुनं धर्माभिमुखीकरणाय प्रवृत्ता । विशेषतः क्षत्रधर्मे प्रेरयितुम् । हत्या च देहस्यैव नात्मनः इति वक्तुम् । व्यासोक्तिस्तु ज्ञानेन सह प्रवृत्त्यर्थं इन्द्रियवितरण-व्यवस्थोपपत्त्यर्थम् इन्द्रियेषु पञ्चभूतभागव्यवस्थोपपत्त्यर्थं प्रवृत्ता इति सङ्गच्छति ।

३. उपसंहारः (Conclusion)

अनेन विचारेण इदं सिद्ध्यति यत् द्वितीयाध्यायस्य भाष्यद्वयेऽपि रामानुज-गोपालानन्दयोः साम्यं भूयिष्ठं वर्तते। तथापि क्वचित् गोपालानन्दमुनिः रामानुजमतस्यैव विवरणं करोति, क्वचित् नूतनार्थं वा एकान्तिकभक्तिपरकम् अर्थं वा योजयति। 'पुराण'-शब्दस्य व्याख्याने गोपालानन्दभाष्यं रामानुजभाष्यस्य पूरकं दृश्यते। युद्धस्य फलविषये तु रामानुजभाष्यं अधिकं स्पष्टम्। 'अभिक्रमनाश' श्लोके गोपालानन्दभाष्यं भक्तिपरं, रामानुजभाष्यं तु कर्मयोगपरमिति विशेषः।

४. सन्दर्भसूची (References)

[१] श्रीमद्भगवद्गीता - २.१२

[२] श्रीमद्भगवद्गीता - २.४०

[३] श्रीमद्भगवद्गीता - ६.४०

[४] श्रीमद्भगवद्गीता - ६.४०

[५] कठोपनिषद् - १.२.१८ (अथवा गीता २.२०)

[६] श्रीमद्भगवद्गीता - २.२०

[७] श्रीमद्भागवतपुराणम् - ११.११.८

[८] विष्णुपुराणम् / महाविष्णुपुराणम् (स्मृतिवाक्यम्)

[९] श्रीमद्भगवद्गीता - २.१८

[१०] श्रीमद्भगवद्गीता - २.३०

## ५. ग्रन्थसूची (Bibliography)

१. व्यासः, वेदः. श्रीमद्भगवद्गीता.

२. रामानुजाचार्यः. गीताभाष्यम्.

३. गोपालानन्दमुनिः. गीताभाष्यम्.

४. मध्वाचार्यः. गीताभाष्यम् / गीतातात्पर्यम्.

५. शङ्कराचार्यः. गीताभाष्यम्.

६. कठोपनिषद्.

७. श्रीमद्भागवतपुराणम्.